श्री पूर्णानन्दगिरि परिव्राजक परमहंसविरचित

श्यामारहस्यतन्त्रम्

'शंकर' हिन्दी व्याख्योपेतम्

व्याख्याकारः
पंडित हरिशंकरशास्त्री
विद्यारत्न, विद्यानिधि

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

हरिदास संस्कृत ग्रन्थमाला

३३५

******

६४ तन्त्रों का सार सर्व तन्त्रोत्तम

श्यामारहस्यतन्त्र

भाषाटीका सहित

टीकाकार

पंडित हरिशङ्करशास्त्री

विद्यारत्न, विद्यानिधि

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

पूर्वद्रष्टव्यम्

भो तांत्रिको ! आपकी चिरकालीन आशा पूर्ण हो गई जिस श्यामारहस्य तंत्र को तांत्रिक जन बाहर की हवा भी नहीं लगाते थे वही तंत्र आज छपाकर प्रकाशित किया गया है। इस तंत्र के द्वारा साधक, ब्रह्मा, विष्णु, शिव, इन्द्र, कुबेर, यम, देव, दानव, भूत, प्रेत, पिशाच, राक्षस, पन्नग, ब्रह्मराक्षस, बैताल आदि सम्पूर्ण चराचर को वश में कर सकता है। इसी के द्वारा मारण मोहन, वशीकरण उच्चाटन, आकर्षण आदि जिस जिस कार्य की आवश्यकता हो सिद्ध कर लीजिये। अष्टसिद्धि नवसिद्धि तो साधक के संमुख हाथ बांधे सदैव उपस्थित ही रहती हैं।

जिसके प्रभाव से ब्रह्मा, सृष्टि उत्पन्न करता है, विष्णु पालन करता है, शिव संहार करता है जिसके प्रभाव से जड़ चेतन स्थावर जंगम प्रतीयमान हो रहे हैं जिसके साधन से मुमुक्षु को मोक्ष प्राप्त होता है इस तंत्र में। उन्ही महामाया कालिका का विधान साधन प्रकारकवच, सहस्रनाम स्तोत्रनाम स्तोत्रादिकों के द्वारा वर्णन किया है. कालिका का पूजन प्रकार अत्युत्तमता से वर्णन है यह सामान्य दर्शाया है ग्रन्थ की गुरुता वाणी से कथन नहीं होती देखने से ही प्रतीत होती है जिसका तंत्रशास्त्र में रुचि है या जो कालिका के उपासक हैं अथवा ज़िनका विश्वास तंत्र में नहीं है उनको ही क्या सम्पूर्ण गृहस्थी को गृहस्थ की रक्षार्थ रखना योग्य है यदि आपको संस्कृत के गद्य पद्यों का आनन्द लेना है यदि आपको प्राचीन कविता को देखना है यदि आपको जगन्मोहिनी कालिका को प्रसन्न करना है और अपना हित चाहते हों तब अवश्य इस महान आश्चर्य ग्रंथ के ग्रहण करने में विलम्ब मत करो।

हरिशङ्कर शास्त्री

विषय सूची

❀ श्रीगणेशायनमः ❀

अथ श्यामारहस्य तंत्रम्।

भाषाटीका सहितम् ॥

मंगलाचरण।

गणेशंसिद्धिसदनं शारदां सुखदायिनीम्। शंकरं शंकरं नत्वा सर्वा पत्तिनिवारणम्॥ सर्वाभीष्टप्रदां शुभ्रां साधकानां मनोरमाम्। श्यामारहस्यतंत्रस्य कुर्वे व्याख्यां सुमंगलाम्॥

प्रथमः परिच्छेदः।

देवीं दानवदैत्यदर्पदलनेत्रहानुन्मूलयन्तीं शिवां ब्रह्मानन्दमहेशमौलिमणिभिः संसेवितांघ्रिद्वयाम्। नत्वा श्रीगुरुपादपद्मपरमामोदामृतप्लावितः पूर्णानन्दगिरिस्तनोति विमलां श्यामारहस्याभिधाम्।

स्वतन्त्रं वीरतंत्रञ्च तन्त्रं फेत्कारिणीं तथा। कालिकाकुलसर्वस्वं कालीतंत्रंच यामलम्॥

कुलचूडामणिञ्चैव कुमारीतंत्रमेवच। कुलार्णवं तथाकालीकल्पं भैरवतंत्रकम्॥ कालिकाकुलसद्भावं तथा चोत्तर तन्त्रकम्। गुरूणांच

जो दानव और दैत्य गणों का दर्प उन्मूलन करते हैं ब्रह्मा विष्णु और महेश्वरादि ईश्वर श्रेष्ठगण भी जिनके दोनों चरणों की सेवा करते हैं उन्हीं देवी शिवा को प्रणाम करके और श्री गुरु के चरणारविन्द के परमानन्द सुधा संदोह में प्लावित होकर पूर्णानंदगिरि श्यामारहस्य नाम्नी अतीव दुर्लभ तंत्रसंहिता प्रणयन करते हैं॥ १॥

स्वतन्त्र वीरतंत्र, फेत्कारिणीतंत्र कालिकाकुल सर्वस्व, कालीतंत्र, यामल, कुलचूडामणि, कुमारीतंत्र कुलार्णव, कालिकल्प, भैरवतंत्र, कालिकाकुलसद्भाव, उत्तरतंत्र

मतं ज्ञात्वा साधकानां तथा मतम् ॥ शुद्धिबुद्धिस्वभावार्थं वक्ष्यामि मोक्षकारिणीम् ॥

तदुक्तं स्वतंत्रे ।

क्रोधीशं विन्दुयुककान्ते ! त्रिमूर्त्यग्निसमायुतम् । त्रिर्लिखेत् परतो देवि ! हुंकारद्वयमेव च । मायाद्वयं समालिख्य अत्रिसंवर्त्त-सूक्ष्मयुक् ॥ त्रैकालिके सप्तवर्णन् पूर्ववत् परमेश्वरि ! स्वाहान्तेयं महाविद्या द्वाविंशत्यक्षरापरा ॥ अनया सदृशी विद्या नास्तिज्ञानेतु मामके ॥

कुमारीतन्त्रेऽपि । भैरव उवाच ।

अतिगुह्यतरं ह्येतत् ज्ञानात्मकं सनातनम् । अतीव च सुगोप्यञ्च कथितुं नैव शक्यते ॥ अतीव च प्रियासीति कथयामि तव प्रिये ! रूपाणि बहुसंख्यानि प्रकृतेः सान्ति भाविनि ! ॥ तेषां मध्ये महेशानि कालिरूपं मनोहरम् । विशेषतः कलियुगे नराणां भुक्तिमुक्तिदम् । तस्यास्तू पासकारश्चैव ब्रह्मविष्णुशिवादयः । चन्द्रःसूर्यश्च वरुण कवेरोऽग्निस्तथापरः ।
दुर्वासाश्च वशिष्ठश्च दत्तात्रेयो बृहस्पतिः । बहुना किमिहोक्तेन सर्वे देवा उपासकाः ॥ कालिकायाः प्रसादेन भुक्तिमुक्तिःकरेस्थिता ॥ तस्या मन्त्रं प्रवक्ष्यामि यतो रक्षेयगत्रयम् । ककारं वह्निसंयुक्तं रतिविन्दुस-

---

एवं गुरुवर्ग और साधकगणोंका मत यह सब विशेष जानकर शुद्ध बुद्धि स्वभावार्थ यह मोक्षजनक संहिता कीर्तन करूंगा ॥

कुमारीतंत्र में भैरवने कहा है कि काली का विषय अत्यन्त गुह्यतर है । यह अतीव गुप्त रक्खे । किसीके निकट नकहै, तुम मेरी अत्यन्त प्रिय हो, इसकारण तुम्हारे निकट कहता हूं ॥

हे भामिनि ! प्रकृति के बहुसंख्यक रूप हैं तिनमें हे महेश्वरी ! काली रूप हीं मनोहर है - विशेषतः कलियुग में यह काली रूप ही संपूर्ण लोक को भुक्ति मुक्ति प्रदान करता है । ब्रह्मा, विष्णु और शिवादि ईश्वरगण और चन्द्र, सूर्य, वरुण, कुवेर, अग्नि, दुर्वासा, वशिष्ठ, दत्तात्रेय, बृहस्पति, अथवा अधिक कहनेसे क्या है ? समस्त देवताभी उसीके वशीभूत हैं । कालिकाके प्रसाद से भुक्ति मुक्ति करस्थ होती है । उसका मंत्र कहता हूं । ककारको वह्निसंयुक्त और रतिविन्दु समन्वित

मन्वितम् ॥ त्रिगुणंच ततः कूर्चं युग्मं लज्जायुगं तथा । दक्षिणे कालिके चेति पूर्ववीजानि वेष्टयेत् ॥ वह्निजायावधिः प्रोक्तः कालिकाया मनुर्मतः । न सुसिध्य ह्यपेक्षास्ति नारिमित्रादिदूषणम् ॥

श्रुतिरपि–अर्थहनां ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीमाप्नोति सुभगां त्रिगुणयुक्तां कामरेफेन्दिरां विन्दुमेलनरूपां एतत्त्रिगुणितामादौ तदनु कूर्चद्वयम् । कूर्चवीजञ्च–व्योमषष्ठस्वर विन्दुमेलनरूपम् । तदेव द्विरुच्चार्य्य भुवनां द्वयम् । भुवना तु व्योमज्वलनेन्दिरा शून्यमेलनरूपा। तदुक्तं–दक्षिणे कालिके तवाभिमुख्यता । तदनु वीजसप्तकमुच्चार्य्य धृहद्भानुजायामुच्चरेत् । मत्वा शिवमयो भवेत् । सर्वसिद्धीश्वरो भवेत् । गतिस्तस्यास्ति नान्यस्य स तु नारीश्वरः स तु दैत्वोश्वरः स तु सर्वेश्वर इति ॥

भैरव उवाच ।

नात्र चिन्ताविशुद्धिर्वा नारिमित्रादिदूषणम् । न वा प्रयासऽबाहुल्यं समयासमयादिकम् ॥ देवैर्देवत्वविषये सिद्धैः खेचरसिद्धये । पन्नगैराक्षसैर्वन्यैर्मुनिभिश्च मुमुक्षुभिः ॥ कामिभिर्धर्मिभिश्चार्थलिप्सुभिः सेवितां पराम् । न चित्तव्ययवाहुल्यं कायक्लेशकरं न च ॥ तत्र

करके त्रिगुणित करै फिर कूर्चयुग्म और लज्जायुग्म ग्रहण करके "दक्षिणे कालिके" यह पद मिलाय संपूर्ण पूर्व वीज वेष्टन करने चाहियें । अंतमें वह्निजाया संयुक्त करै इसकोही कालीमंत्र कहते हैं ॥ ❀

इसमंत्र में किसीप्रकार सुसिद्धादि की अपेक्षा नहीं है । अरिमित्रादि दूषण भी नहीं है इसके मननमात्रसेही पुरुषशिवमय होसक्ता है और संपूर्ण सिद्धियों का ईश्वरत्व लाभ होता है । इस में किसी प्रकारका परिश्रम करना नहीं होता समय असमयकी भी अपेक्षा नहीं है । देवगण देवत्व सिद्धिके लिये सिद्धगण खेचर सिद्धि के लिये, कामिगण धर्मिगण, और द्रव्य की इच्छा करने वाले मनुष्य अपने अपने अभिप्राय सिद्धिके लिये इस भगवती कालिकाकी परिचर्या करते हैं । इस में वित्तव्यय

❀ इसका सन्निवेश इस प्रकार है क्रीं क्रीं क्रीं हूँ हूँ हूँ ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूँ हूँ हूँ ह्रीं ह्रीं स्वाहा । वह्नि शब्द में र, रतिविन्दु शब्द में दीर्घईकार का परचन्द्र बिन्दु है; तो क × ^ × ि ी × ँ = ह्रीं इस प्रकार हुआ । इस को त्रिगुणित करनेसे क्रीं क्रीं क्रीं होता है कूर्च शब्द में हूं, लज्जा शब्द में ह्रीं, वह्नि जाया शब्द में स्वाहा ॥

यश्चिन्तयेन्मन्त्री सर्वसिद्धिसमृद्धिदाम् ॥ तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः। गद्यपद्यमयी वाणी सभायां तस्य जायते ॥ तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः। राजानोऽपि च दासत्वं भजन्ते किं परे जनाः। वह्नेः शैत्यं जलस्तम्भं गतिस्तम्भं विवस्वतः॥ दिवारात्रिव्यत्ययञ्च वशीकर्तुं क्षमो भवेत्। सर्वस्यैव जनस्यैव वल्लभः कीर्तिवर्द्धनः॥ अन्ते च भजते देव्या गणत्वं दुर्लभं नरैः। चन्द्रसूर्य-समो भूत्वा वसेत् कल्पायुतं दिवि। न तस्य दुर्लभं किञ्चिद् यः स्म-रेत् घोरदक्षिणाम् ॥

अथास्याः सपर्य्याविधिर्लिख्यते—ब्राह्मे मुहूर्ते उत्थाय बद्धपद्मासनः शिरःस्थाधोमुखशुक्लवर्ण—सहस्रदलकमलकर्णिकास्थ—शशहीनशर-दिन्दुसुन्दर—चन्द्रमण्डलांतर्गन्तहंसपीठे निजगुरुं ध्यायेत् ॥ यथा— शुद्धस्फटिकसङ्काशं शुद्धक्षौमविराजितम्। गन्धानुलेपनं शान्तं वराभय-कराम्बुजम् ॥ मन्दस्मितं निजगुरुं कारुण्येनावलोकिनम्। वामोरुश-क्तिसंयुक्तं शुक्लाभरणभूषितम्॥ स्वशक्त्या दक्षहस्तेन धृतचारुकलेव-रम्। वामे धृतोत्पलायाश्च सुरक्तायाः सुशोभनम् ॥ परानन्दरसो-ल्लासलोचनद्वयपङ्कजम् ॥

(धनकाव्यय) वा कायक्लेश स्वीकार करना नहीं होता है। देवि कालिका सर्वविध सिद्धि और संपूर्ण समृद्धि प्रदान करती है। जो मंत्रशील पुरुष इनको चिन्ता करता है, समस्त सिद्धि सर्वदा उसके हस्तगत रहती है इस विषय में संदेह नहीं है। अधिक क्या सभामें उसके मुखसे गद्यपद्यमयीवाणी प्रादुर्भूत होती है । उसको देखते ही वादीगण तत्काल निष्प्रभ (प्रभाहीन) होते हैं। अन्यकी बात क्या कहूं स्वयं नरपति-गणभी उसका दासत्व करते हैं। वह व्यक्ति अग्निको भी शीतल, जलको भी स्तम्भित सूर्यकी गतिको भी अवरुद्ध, दिनको भी रात्रि और रात्रि का दिन करके सबको वशी-भूत करने में समर्थ होता है शत्रु मित्र आत्मपर (अपना पराया) सब लोकोंका वल्ल-भ और कीर्ति बंधन होता है शरीर छोड़कर चरम में देवीका सुदुर्लभगणत्व लाभ करता है चन्द्र सूर्यकी समान होकर अयुतकल्प (दशकल्प) स्वर्ग में अवस्थिति करता है। फलतः जो व्यक्ति दक्षिण कालिका और श्मशान कालिका का स्मरण करता है उस को कुछ भी दुर्लभ नहीं रहता ॥

इति ध्यात्वा दिव्याभिषेकेण गुरुणा संप्रदायानुगतकृतनामपूर्वकं मानसैरुपचारैराराध्य ऐं ह्रीं श्रीं हसखफ्रें हसक्षमलवरयुं हसक्षफ्रें श्री-अमुकानन्दानाथ श्रीअमुकदेवशर्मा श्रीगुरुपादुकां पूजयामि । इति गुरुपादुकां नत्वा दशधा जपसमर्पणं कृत्वा प्रणमेद् यथा—

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

अथ शारदाटीकाकारश्रीराघवभट्टमतेन तु शक्तिविषये गुरोर्ध्यानम् । शुक्लवर्णमेव न गौरम् । तदितरविषये शुक्लमेवेति निश्चितं वचनद्वयदर्शनात् । तद्यथा—

श्वेताम्बरधरं गौरं श्वेताभरणभूषितम् । अपिच—रक्तमाल्याम्बरधरं सुरक्तं पद्मविस्तरम् ॥

इति तु असमीचीनम् । श्वेतवर्ण गुरोर्ध्यानानन्तरं भवति शक्तिविषये तु तथा दर्शनात् । यथा ज्ञानार्णवे—

ब्रह्मरन्ध्रे सहस्रारे कर्पूरधवलो गुरुः । तस्मात् सम्प्रदायानुगत्या गुरोर्ध्यानं कुर्यात् ॥ इति शेषः ।

अथ गुरोराज्ञां गृहीत्वा मूलाधारपद्मकर्णिकास्थत्रिकोणान्तर्गत-स्वयम्भूलिङ्ग वेष्टनीं प्रसुप्तभुजगाकारां सार्द्धत्रिवलयां विद्युत्पुञ्जप्रभां

अब देवीकी पूजाविधि लिखते हैं । ब्राह्ममुहूर्त में उठ, बद्ध पद्मासन हो मस्तक व अधोमुखमें संस्थित शुक्लवर्ण सहस्रदलकमलकर्णिका में अधिष्ठित शरत्कालीन शशहीन चन्द्रमाकी समान सुन्दर चन्द्रमण्डल के अन्तर्गत हंसपीठ में निज गुरु का ध्यान करे । यथा वह शुद्ध स्फटिक सन्निभ, शुद्ध क्षौम विराजित, गंधानुलिप्त, शमगुण विशिष्ट, वराभयकर--पद्म समन्वित, मृदुहास्यसमलंकृत, सकरुण दृष्टिसंपन्न और इन के वामऊरु में शक्ति विराजमान है । उनके समस्त आभरण शुक्लवर्ण हैं, स्वकीय शक्ति दक्षिणहस्त में तदीय सुचारु कलेवर धारण किया है और उत्पल हस्त में होने से उन का वामभाग शोभा पाता है तिसके द्वारा उनकी परम शोभा का संचार हुआ है उनके नेत्र कमल परमानंद रासोल्लास में विकसित हैं । अनंतर गुरुकी पादुका पूजा पुरःसर उसमें दशवार नमस्कार करके जप समर्पणानन्तर प्रणाम करै । यथा-जो ज्ञान-रूप अंजन शलाका की सहायता से अज्ञानतिमिर में अंधीभूत (अंधे) लोकों के चक्षु उन्मीलित करते हैं, उन्हीं श्रीगुरुको नमस्कार है ।

अनंतर श्रीगुरुकी आज्ञा ग्रहण कर, मूलाधार पद्मकर्णिकास्थित त्रिकोण-मध्य-गत स्वयम्भूलिंग को जिन्होंने वेष्टन कियाहै, जिनका आकार प्रसुप्त (सोते हुये)

नीवारशूकतन्वीं कुलकुण्डलिनीं इष्टदेवतास्वरूपां हुंकारेण हंसइति मनुना वधे वनदहनयोगात् सचैतन्यां विधाय ब्रह्मवर्त्मना परमशिव नीत्वा चन्द्रमण्डले कुलगुरून् ध्यायेत् । तदुक्तं कालिकास्मृतौ—

मूलाधारे स्मरोद्दिव्यं त्रिकोणं तेजसां निधिम् । तस्याग्निरेखामानीय अध-ऊर्द्ध व्यवस्थिताम् ॥ नीलतोयदमध्यस्थताड़िल्लेखेव भासुरम् । नीवारशूकतन्वीञ्च सुपीतां भास्करोपमाम् ॥ तस्याः शिखाया मध्ये-च परमोर्द्धव्यवस्थिताम् । सब्रह्मा स स्वरः शान्तःसशिवःपरमस्वराट् । स एव विष्णुः सप्राणः, स कलाग्निः सचन्द्रमाः ॥ इति कुण्डलिनीं ध्यात्वा सर्वपापैः प्रमुच्यते । स महापातकेभ्यश्च पूतो भवति । सर्व-सिद्धिं कृत्वा भैरवो भवति ।

अथ कुलगुरून् ध्यायेत् यथा कुलचूड़ामणौ–मूलादिब्रह्मरन्ध्रान्त गुणं ध्यात्वा गुरुं स्मरेत् । प्रह्लादानन्दनाथाख्यं सकलानन्दमेवच ॥

भुजंग (सर्प) की समान है, जो सार्द्ध त्रिवलय परिमित और विद्युत् पुंजप्रभा और नीवार शूकर की समान तनुभावापन्न है उन्हीं इष्टदेवतास्वरूप कुलकुण्ड-लिनी को हुंकार सहित हंस इत्यादि मंत्रमें जागरितकर ब्रह्मवर्त्म योग परम शिवमें लाकर उसमें संयुक्त करै । अनन्तर उनके सहित कुलगुरु इत्यादि सबका एकत्र ध्यान करै ।

कालिका स्मृति में भी कहा है कि मूलाधारमें जो तेजोनिधि दिव्य त्रिकोण विराज-मान है उसको स्मरण कर, उस में अग्निरेखा आनयनपूर्वक उस शिखाके मध्य अधः ऊर्ध्वमें जो अवस्थिति करती है, जो नीलतोयद मध्यस्थ तडिल्लेखा (विजलीके रेख) की समान परम विकटस्वर भावयुक्त हैं जो नीवार शूकर की समान अतिसूक्ष्म स्वरूप संपन्न है जो सुन्दर पीतवर्ण और भास्कर सदृशी हैं उन्हीं परम ऊर्ध्वमें व्यवस्थिता कुलकुण्डलिनीका ध्यानकरै । क्योंकि वही ब्रह्मा, वही विष्णु, वही स्वर्ग, वही परम-स्वप्रकाश शिव, वही प्राण वही कालाग्नि और वही चन्द्रमा हैं। इसप्रकार कुलकुण्ड-लिनी का ध्यान करने से सर्व प्रकार के पाप दूर होते हैं । वही क्या संपूर्ण महापातकों से भी परम विशुद्धि प्राप्त होती है और सर्व विधि-सिद्धि संग्रह सहित भैरवत्व लाभ होता है ।

कुल चूडामणि में सब कुलगुरुओं का निर्देश किया है । यथा मूलादि ब्रह्म रन्ध्रा-न्त का ध्यान करके गुरुका स्मरण करे। प्रथम प्रहलादानन्दनाथ फिर यथाक्रम से

कुमारानन्दनाथाख्यं वशिष्ठानन्दनाथकम् । क्रोधानन्दसुखानन्दौ ध्यानानन्दंततःपरम् ॥ बोधानन्दं ततश्चैव ध्यायेत् कुलमुखोपरि । महारसरसोल्लास हृदयाघूर्णलोचनाः ॥ कुलालिङ्गनसंभिन्ना घूर्णिता-शेषमानसाः । कुलशिष्टैः परिवृता पूर्णान्तः करणोद्यताः ॥ वराभययुताः सर्वे कुलतन्त्रार्थवादिनः ।

एवं कुलगुरून्नत्वा विसृज्य कुलमातृकाम् ॥ कुलस्थाने समानीय स्नानार्थं तीर्थमाश्रयेत् । शाक्तं कुलगुरुं वत्स! स्मृतं कुलसुखावहम् ॥ रहस्यमद्भुतं प्रोक्तं गोप्तव्यं पशुसङ्कटे । कुलनाथं परित्यज्य ये शाक्ताः परसेवेन. । तेषां शिक्षा च यागश्च अभिचाराय कल्पते । तस्मात् सर्व प्रयत्नेन कुलीनं गुरुमाश्रयेत् ॥ कुलीनः सर्वविद्यानामधिकारीति गयिते । दीक्षागुरुः स एवात्मा सर्वमन्त्रस्य नापरः॥

अन्यच्च श्रुतौ—

प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेऽप्यमृतायमानाम् । अन्तः पदव्यामनुसञ्चरन्तीमानन्दरूपामबलां प्रपद्ये ॥ इति । अहं देवो न

सकलानन्दनाथ, वशिष्टानंदनाथ, क्रोधानन्दनाथ, सुखानन्दनाथ ध्यानानन्दनाथ, वोधानन्दनाथ, इनका ध्यान करे। ये सब कुलगुरु पद वाच्य हैं। इनका हृदय परमानंद रस में उल्लसित. लोचनघूर्णित और अन्तःकरण पूर्णभाव युक्त है। कुल शिष्यगणों ने इनको वेष्टन कर रक्खा है. यह सभी वराऽभय संपन्न एवं सभी कुल और तंत्रार्थ वादी हैं।

इस प्रकार कुलगुरु गणों को प्रणामकर विदादे, कुलमातृका को कुलस्थान में लाकर स्नानार्थ तीर्थ का आश्रय करै शाक्त कुलगुरुही कुलसुख देनेवाले कहकर निर्दिष्ट हुए हैं। इस विषय में जो अद्भुत रहस्य कथित हुआ है उसको पशु संकट में गायन करै। जो शाक्त कुलनाथ को परित्यागकर अपर (दूसरे) की सेवाकरते हैं, उनकी शिक्षा और याग समस्तही अभिचार में परिकल्पित होते हैं। इसी कारण सर्व प्रयत्न से गुरुका आश्रय ग्रहण करै। कुलीन गुरु ही सर्व विद्या के अधिकारी कहकर परिग-णित हैं। वही दीक्षागुरु हैं। क्योंकि वही सब मंत्रों की आत्मा हैं, अन्य कोई नहीं॥

श्रुतिमें भी कहा है. जो प्रथम प्रयाण में प्रकाशमान, प्रति प्रयाणमें अमृतायमान और अन्तःपदवी में अनुसञ्चरण करती हैं, उन्ही आनन्दरूपिणी अबला को शरण

चान्योऽस्मि ब्राह्मैवाहं न शोकभाक्। सच्चिदानन्दरूपोऽहमात्मानमिति भावयेत् ॥ प्रातःकृत्यमवश्यमेव नित्यं करणीयम्। प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितोऽर्चयेत्। तस्य पूजा च विफला शौचहीना यथा-क्रिया ॥

अथ नद्यादौ गत्वा कालिकारूपं सर्वं विभाव्य सुवर्णरजतात्मकं कुलगर्भमनामातर्जनीषु धृत्वा आचम्य मूलं स्मरन्। मलापकर्षकं कृत्वा आचम्य ॐ अद्येत्यादि कुलदेवताप्रीतिकामो मन्त्रस्नानमहं करिष्ये इति सङ्कल्प्य जले त्रिकोण चक्रं कृत्वा सूर्य्यमण्डलादङ्कुशमुद्रया तीर्थ-मावाह्य मूलान्ते ॐ आत्मतत्वाय स्वाहा। विद्यातत्वायस्वाहा। शिव-तत्वायस्वाहा। इति आचामेत् ॐ ह्रीं स्वाहा। इत्यनेन त्रिराचम्या-त्मानं त्रिःसंप्रोक्ष्य मूलेन मृत्तिकाया अङ्गलेपनं कृत्वा मूलं पठन् कुम्भ-मुद्रया स्वमूर्ध्नि त्रिर्जलमभिषिच्यांगुलीभिः श्रवणादीनि सप्तच्छि-द्राणि संरुध्य त्रिर्निमज्जेत्। तदुक्तं कुमारीतन्त्रे—

वेदाद्यञ्च तथा माया स्वाहेत्याचमनं मतम्। नीलतन्त्रेऽपि मृत्कु-शानपि संगृह्य गत्वा जलान्तिकं ततः ॥ मलापकर्षकं कृत्वा मन्त्रस्नानं समाचरेत्। विद्यया त्रिर्निमज्यैव आचामेत् पयसा पुनः ॥

करता हूं। तथाहि मैं ही देव हूं अन्य कोई नहीं। मैं ही ब्रह्म सुतरां किसी काल में भी मुझ को शोक भोग करना नहीं होना। मैं ही सच्चिदानंद विग्रह हूं। आत्मा की इसरूपमें भावना करै। नित्य अवश्यही प्रातःकृत्य करना चाहिये। जो व्यक्ति प्रातःकृत्य न करके भक्ति सहित देवीकी अर्चना करताहै, उसकी वह पूजा शौच हीन क्रिया की समान विफल होती है।

अनन्तर नद्यादि में गमन और सर्वतोभाव में कालिका के रूपकी चिन्ता कर अनामा और तर्जनीमें सुवर्ण रजतात्मक कुलगर्भधारण पूर्वक आचमन सहित मूलमंत्र स्मरणान-न्तर अघमर्षण करै। तदनंतर आचमन करके " ओंअद्येत्यादि " कह संकल्प कर जल में त्रिकोणचक्र निर्माण और अंकुशमुद्रा की सहायता से सूर्य-मण्डलसे तीर्थ आवाहन पुरः सर मूलमंत्र जपके अन्त में ओंआत्म तत्वाय इत्यादि कहकर आचमन करना चाहिये। अथवा ओं ह्रीं स्वाहा इत्यादि विधान से तीन वार आचमन और तीनवार आत्मा को संप्रोक्षण पूर्वक मूलमंत्र जपकी सहायता से मृत्तिका ग्रहण और उससे अंगलेपन कर मूलमंत्र का पाठ करै। पाठके अन्त में कुम्भ मुद्राकी सहायता से अपने मस्तक में तीनबार जलसेचन (मांथे से

कुलचूड़ामणौ—

कृष्णरक्तहरित्पीता विविधा मम मूर्त्तयः । तत्र यत् कुल शिष्यश्च स तद्रूपं परामृशन् ॥ दिवं सर्वामथोर्वीञ्च पाताल भूतसम्भवाम् । आचान्तः कुलदर्भेण स दर्भःकुलपुत्रकः ॥ कुलपात्रे तु दूर्वाञ्च सतिलं जसलं ततः । गृहीत्वा कुलदेवस्य प्रीतये स्नान-माचरेत् ॥ कृतसङ्कल्प एवादौ कुलचक्रं जले न्यसेत् । जलस्थानात समानीय कुलमुद्रांकुशेन च॥ कुलतीर्थानि तत्रैव समावाह्य शिवात्मकम् तत्तोयञ्च त्रिधापीत्वा त्रिधाच प्रोत्तणं मतम् ॥

अथ अंकुशमुद्रा । यथाज्ञानार्णवे—

दत्तमुष्टिं विधायाथ तर्जन्यंकुशरूपिणी । अंकुशाख्या महामुद्रा त्रैलोक्याकर्षणक्षमा ॥

तीन धार जल गिराना) कर संपूर्ण अंगुलियों के साहचर्य कहीं २में श्रवणादिसप्तछिद्र संरुद्ध करके तीनबार निमग्न होवै ।

कुमारीतंत्र में कहा है कि,वेदादि माया और स्वाहा इत्यादि ही आचमन कह कर परिगणित हैं । नीलतन्त्र में भी कहा है कि मृत्तिका और कुशग्रहण पूर्वक जला-न्ति (बावड़ी) को गमन और अघमर्षण करके मंत्रस्नान करें । विद्या तत्वकी सहायता से तीनबार अवगाहन कर पुनर्वार जल ग्रहणपूर्वक आचमन करना चाहिये । कुल चूडामणि में कहा है कि समस्त मूर्ति कृष्ण, रक्त, हरित और पीत इत्यादि भेद से नाना प्रकार हैं । तिनमें जो कुल शिष्य है वह वैसे ही परामर्श पूर्वक आचमन और कुलपात्र में दूर्वा एवं तिल सहित जल ग्रहण करके कुलदेवकी प्रीतिके लिये स्नान करै । अनन्तर संकल्प कर, जल में कुलचक्र निक्षेपपूर्वक जल स्थान से आय, उस स्थानमें ही कुल मुद्रांकुश द्वारा संपूर्ण कुल तीर्थों का आवाहनकर वह शिवात्मक जल तीन बार पान और तीनबार मंत्रका प्रोक्षण करै ।

अंकुशमुद्रा ? यथा ?—ज्ञानार्णवमें दश मुष्टिविधान पूर्वक तर्ज्जनी को अंकुश रूपिणी करे । इसकाही नाम अंकुशाख्य महामुद्रा है । इसके द्वारा त्रैलोक्य आकर्षण कर सकता है तीर्थावाहनमंत्र यथा—श्रीक्रम संहिता में गंगा, यमुना, गोदावरी, सरस्वती, नर्मदा, सिन्धु, कावेरी तुम संपूर्ण जलमें सन्निहित (स्थित) होओ । स्वतन्त्र में भी कहाहै यथा-साधकाग्रगण्य पुरुष मूलमंत्र पाठकरके कुम्भमुद्रा द्वारा मस्तक में जलका छींटादे तीन बार आचमन करै । अनन्तर आत्मतत्व, विद्यातत्व, और शिवतत्व

तीर्थावाहनमन्त्रो यथा श्रीक्रमसंहितायाम्—

गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

अथ स्वतन्त्रेऽपि—

मूलं पठन् मूर्ध्नि तोयं मुद्रया कुम्भसंज्ञया। क्षिप्त्वा वारत्रयं देवि! आचामेत् साधकाग्रणीः। आत्मविद्याशिवैस्तत्वैस्ततो यागग्रहं विशेत्॥

कुम्भमुद्रा यथा गुप्तार्णवे—

दक्षांगुष्ठे परांगुष्ठं क्षिप्त्वा हस्तद्वयेन तु। सावकाशाञ्चैव मुष्टिं कुम्भमुद्रां विदुर्बुधाः! सप्तच्छिद्राणि संरुध्य ततो मज्जेत् त्रिधा सुधीः॥ आत्मविद्याशिवैस्तत्त्वैराचामेत् साधकाग्रणीः। वह्निजायां ततो दत्त्वा शुद्धेन पयसा प्रिये!॥

ॐ मानध्वनि वज्रिणि महाप्रतिशरे रक्ष रक्ष हुं फट् स्वाहा। इति शिखाबन्धनम्। मूलेन तिलकं कृत्वा पूर्ववदाचम्य वैदिकां सन्ध्यां विधाय तान्त्रिकीं सन्ध्यां कुर्य्यात्। तदुक्तं कुमारीकल्पे-

प्रणवं पूर्वमुद्धृत्य मानान्ते च ध्वनीति च। वज्रिणीति पदं प्रोक्तं महाप्रतिशरे तथा॥ रक्षद्वयं हुं फट् स्वाहा इति च तदनन्तरम्॥ अनेनैव च मन्त्रेण रक्षां कुर्य्याद्विचक्षणः॥

रक्षामिति शिखाबन्धनरूपेण वस्त्राञ्चले ग्रन्थिबन्धनरूपेण वा कुर्य्यादित्यर्थः। शारदाटीकायाञ्च-

उक्तेनैव विधानेन कृत्वा स्नानञ्च तान्त्रिकम्। वैदिकीं तान्त्रिकीं सन्ध्यां कृत्वा तर्पणमाचरेत्॥

सहित यागगृहमें प्रविष्ट होवे। कुम्भमुद्राका नियम यही है कि दक्षिण हाथ के अंगूठे में बायें हाथ का अंगूठा- निक्षेप करके दोनों हाथों के द्वारा परस्पर असंश्लिष्ट भाव में मुष्टिबंधन (मुट्ठीबांधने) को कुंभ मुद्रा कहते हैं। अनन्तर परम धीमान् साधक सप्तछिद्र संवरण (ढक) करके तीन बार अवगाहन पूर्वक आत्मतत्व, विद्यातत्व और शिवतत्व द्वारा आचमन करे। अनन्तर निर्मल जल द्वारा वह्निजाया को दान करके "ओं मानध्वनि" इत्यादि मंत्र से शिखाबंधन और मूलमंत्र से तिलक करके पूर्ववत् आचमन सहित वैदिकी संध्या विधानानन्तर तान्त्रिकी संध्या करे॥

तान्त्रिकीसन्ध्या यथा तदुक्तं तत्रैव–पुनराचम्य विन्यस्य षड़ङ्गमपि मन्त्रवित् । वामहस्ते जलं गृह्य गलितोदकाविन्दुभिः ॥ सप्तधा प्रोक्षणं कृत्वा मूर्ध्नि मन्त्रं समुच्चरन् । अवशिष्टोदकं दक्ष हस्ते संगृह्य बुद्धिमान् ॥ इड़याकृष्य देहान्तः क्षालितं पापसञ्चयम् । कृष्णवर्णं तदुदकं दक्षनाड्या विरेचयेत् ॥ दक्षहस्ते च तन्मंत्री पापरूपं विचिन्त्य च । पुरतो वज्रपाषाणे प्रक्षिपदस्त्रमन्त्रतः ॥

अन्यत्रापि—

षड़ङ्गन्यासमाचर्य वामहस्ते जलं ततः । गृहीत्वा दक्षिणे चैव संपुटं कारयेत्ततः ॥ शिववायुजलपृथ्वीवह्निबीजैस्त्रिधा पुनः । अभिमन्त्र्य च मूलेन सप्तधा तत्त्वमुद्रया ॥ निक्षिपेत्तज्जलं मूर्ध्नि शेषं दक्षे विधाय च । शरीरान्तःस्थितं पापं क्षालयेत् साधकाग्रणीः ॥

तांत्रिकी संध्या यथा–पुनर्वार आचमन और षडङ्गविन्यास पूर्वक वामहस्त में जल ग्रहण कर गलित उदक बिन्दु समूह में (सड़े हुएजल के। बूंदों में) सप्तबार प्रोक्षण और मस्तक में मंत्र समुच्चारणानन्तर अवशिष्ट उदक दक्षिण हाथ में संग्रह कर इडा द्वारा आकर्षण और देहान्तर्वर्त्ती पाप समूह प्रक्षालन करै। फिर कृष्णवर्ण उस उदक को दक्षनाडी द्वारा विरेचन और दक्षिण हाथ में उस को पाप रूपसे चिन्ताकर अस्त्र मंत्र में पुरोवर्त्ती वज्र पाषाण में उस जलको प्रोक्षण करै। अन्यत्र भी कहा है कि षडङ्गन्यास करके बांयें हाथ में जलग्रहण पूर्वक दक्षिण हाथ में संपुट करना चाहिये। फिर शिव वायु, जल, पृथ्वी और वह्नि बीज की सहायता से पुनर्वार तीनबार अभिमंत्रित और मूल मंत्र में तत्व मुद्रा द्वारा सातवार वह जल मस्तक में न्यस्त करै। अवशिष्ट जल दक्षिण हाथ में लेकर शरीरान्तः स्थित पाप प्रक्षालन करै॥

अब प्रयोग कहते हैं-पूर्ववत् आचमन तदुपरान्त यथाक्रमसे षड़ङ्गन्यास, वाम हस्तमें जल ग्रहण, दक्षिण हस्तमें आच्छादन, हं, वं, इत्यादि मंत्र से अभिमंत्रण, मूल मंत्र उच्चारण, गलित उदक विन्दु द्वारा तत्वमुद्राकी सहायता से मस्तक में सप्तबार अभ्युक्षण, अवशिष्ट जल दक्षिण हस्त में ग्रहण तेजोरूपमें ध्यान इडाद्वारा आकर्षण

अथ प्रयोगः पूर्ववदाचम्य षडङ्गन्यासं कृत्वा वामहस्ते जलं निधाय दक्षहस्तेनाच्छाद्य हं यं वं लं रं इति त्रिरभिमंत्र्य मूलमुच्चरन् गलितोदकबिन्दुभिः तत्वमुद्रया मूर्द्धनि सप्तधाभ्युक्षणं कृत्वा शेषजलं दक्षहस्ते समादाय तेजोरूपं ध्यात्वा इड़याकृष्य देहान्तः पापं प्रक्षाल्य कृष्णवर्णं तज्जलं पापरूपं ध्यात्वा पिङ्गलया विरिच्य पुरः कल्पितवज्रशिलायां फड़िति प्रक्षिपेत् । इति तांत्रिकी सन्ध्या ॥

ततः हस्तौ प्रक्षाल्याचम्य जले यन्त्रं ध्यात्वा सावरणां देवतामावाह्य ऐशाने ऐं श्री अमुकानन्दनाथभैरवस्तृप्यतामिति देवतीर्थेन त्रिः सकृद्वा शुद्धोदकेन सन्तर्प्य वह्नौ परमगुरुं नैर्ऋत्यां परापरगुरुं वायव्यां परमेष्ठिगुरुं पूर्ववत् संतर्प्य मध्ये श्रीअमुकदेवता तृप्यतामिति यथाशक्तितः सन्तर्प्य एकैकांजलिना परिवारान् सन्तर्पयेत् ॥ अशक्तश्चेत् मूलमुचरन् सायुधसपरिवार-सवाहन-महाकालसहित-श्रीदक्षिणकालिकामाता तृप्यतामिति त्रिः सप्तधा वा ऋषीन् भैरवांतान् स्वकल्पोक्तविधिना स्वपित्रादीनपि सन्तर्प्य दूर्वाक्षतरक्तपुष्पा-

---

पूर्वक देहान्तवर्त्ती पाप प्रक्षालन और कृष्णवर्ण उस जलका पापरूप में ध्यान और पिंगलाद्वारा विरेचन, यह सम्पूर्ण कार्य करने के पीछे पुरः कल्पित प्रथम कल्पित वज्र शिला में अस्त्र मंत्रसे प्रक्षेप करै। यही तांन्त्रिकी संध्या है। अनन्तर हस्तप्रक्षालन आचमन, जलमें मंत्रध्यान, आवरण सहित देवता का आवाहन, ऐशान में ऐं श्री अमुकानंद इत्यादि कहकर देवतीर्थ में तीनबार वा एकबार विशुद्ध जल द्वारा तर्पण— यह संपूर्ण कार्य यथा क्रम से संपादन पूर्वक बह्नि में परम गुरु, नैऋतमें परापर गुरु, वायवीमें परमेष्टि गुरु-इनको पूर्ववत् सन्तृप्त करके मध्य में, श्री अमुक देवता तृप्त होवें, यह कहकर, यथाशक्ति उनके तर्पण सहित एक एक अंजलि द्वारा आचरण सबका तृप्त विधान करै। अशक्त (असमर्थ) होने से मूल मंत्र उच्चारण करके आयुध, परिवार, वाहन और महाकाल सहित श्री दक्षिण कालिका माता तृप्त होवें यह कहकर तीनबार वा सतबार भैरवान्त ऋषिगणों के और स्वल्पोक्त विधान में अपने पित्रादिकों

दिना अर्घ्यं कृत्वा ह्रीं हंसः मार्त्तण्डभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं स्वाहा इति सूर्य्याय त्रिरर्घ्यं समुत्थाय दत्त्वा सूर्य्यमण्डले देवीं ध्यात्वा दूर्वाक्षतविल्वपत्रजवापुष्पादिना अर्घ्यं कृत्वा देवीगायत्रीमुच्चरन् महाकालसहितायै श्रीमद्दक्षिणकालिकायै इदमर्घ्यं स्वाहा इत्यर्घ्यं दत्त्वा गायत्रीं यथाशक्तितः प्रजप्य देव्यै समर्पयेत्। तदुक्तम्। तर्पणादौ प्रयुञ्जीत तृप्यतां महाकालभैरवः पिता।

मूलान्ते तर्पयामीति स्वाहान्तं तर्पणं मतम्। एवंविधं तर्पणन्तु कृत्वा पापक्षयो भवेत्॥

कुलचूड़ामणौ च—

भैरवाय च देवाय भैरवेण च कर्तृणा। भैरवाख्यं प्रदातव्यं मन्त्रमुच्चार्य्य पूर्वतः॥ दातृदानग्रहीतृंश्च ततो लिङ्गानुरूपतः। भैरवीं भैरवात्मानं भावयेत् यदशेषतः॥ श्राद्धे विवाहे दाने च स्नानेनाङ्गप्रपूजने। एवं चिन्तापरे देवः प्रसीदति न संशयः॥

अन्यच्च—

एवमेव विधानेन यथाशक्ति च तर्पयेत्। मार्त्तण्डभैरवायेति त्रिरर्घ्यं कल्पयेत्ततः॥

का भी तर्पण करके दूर्वा, अक्षत और रक्तपुष्पादि द्वारा अर्घ्य सहित ह्रीं हंसः इत्यादि मंत्र में तीनवार सूर्य के सामने हो, अर्घ्य दे, सूर्य मण्डल में देवी का ध्यान करना चाहिये। फिर दूर्वा, अक्षत, बिल्वपत्र, और जवा पुष्पादि द्वारा अर्घ्य प्रस्तुत करके देवी गायत्री उच्चारण पूर्वक दक्षिण कालिका के उद्देश्य में वह अर्घ्य दे, यथाशक्ति गायत्री का जपकर देवी को समर्पण करै। जैसा कहा है तर्पण के आदि में 'तृप्यतां महाभैरवः पिता, इस प्रकार प्रयोग करके, फिर मूलांत में "तर्पयामि" इस प्रकार पद संयुक्त कर, शेष में स्वाहा शब्द मिलाले तो तर्पण होता है। इस प्रकार तर्पण करने से पाप क्षय होते हैं। कुल चूडामणि में कहा है प्रथम मंत्रोच्चारण करके भैरव देव को भैरवकर्तृक भैरवाख्य प्रदान करै। फिर लिंगानुरूप में दाता और दानग्रहीता को एवं भैरवी और भैरवात्मा की भावना करनी चाहिये। श्राद्ध, विवाह, दान, स्नान और अंग पूजन में इस प्रकार भावनापरायण होने से भगवान् भैरव प्रसन्न होते हैं, इस में संदेह नहीं। और भी कहा है, इस प्रकार के विधान में ही यथाशक्ति तर्पण करके "मार्तण्ड भैरवाय" इस प्रकार कहकर तीन बार अर्घ्य कल्पना करै।

कुलचूड़ामणौ च—

कुलसूर्य्याय देवाय त्रिरर्घ्यं तु प्रकल्प्य च । देवीं पितॄनृषींश्चैव तर्पयेत् कुलवारिणा ॥

नन्दिकेश्वरसंहितायाञ्च—

यावन्न दीयते चार्घ्यं भास्कराय निवेदनम् । तावन्न पूजयेद्विष्णुं शङ्करं वा सुरेश्वरीम् ॥ दिनेशाय तु चोत्तिष्ठन् वारिणा चाञ्जलित्रयम् । अष्टोत्तरशतावृत्या गायत्रीं प्रजपेत् सुधीः ॥ कालिकायै पदं प्रोक्त्वा विद्महे तदनन्तरम् । श्मशानवासिनीं ङेन्तां धिमहीति ततो वदेत् ॥ तन्नो घोरे पदं प्रोच्य प्रचोदयात् पठेदिति । अस्याः प्रभावमात्रेण महापातककोटयः ॥ सद्यः प्रलयमायान्ति साधकस्य च नान्यथा । रावणस्य वधाच्चैव रामचन्द्रो विमोचितः ॥ गुरुदाराकर्षणाच्च देवश्चन्द्रो विमोचितः । मातृवधात् परशुरामो मोचितोऽस्याः प्रसादतः ॥ सुरापानाच्च श्रीकृष्णो दत्तात्रेयस्तथैव च । एवमेषा महाविद्या गोप्तव्या चैव सुन्दरि ! ॥ महापातकयुक्तोऽपि प्रजपेद्दशधा यदि । सत्यं सत्यं महादेवि ! मुक्तो भवति तत्क्षणात् ॥

कुल चूडामणि में कहा है, भगवान् कुल सूर्य के उद्देश्य में तीन अर्घ्य कलिपत करके, कुलसलिल द्वारा देवी, पितृगण और देवगणों का तर्पण करना चाहिये। नन्दिकेश्वर संहिता के मत में भास्कर को अर्घ्य निवेदन न करके विष्णु वा महादेव अथवा महेश्वरी की पूजा न करै। उठकर सूर्य को तीन अंजलि जलदे, विशिष्ट विधान में अष्टोत्तर शत (१०८) बार गायत्री जप करै। उस गायत्री का प्रयोग यह है, यथा-प्रथम में "कालिकायै" फिर "विद्महे" तदुपरान्त "श्मशानवासिन्यै धीमहि" तदनन्तर-"तन्नो घोरे प्रचोदयात्" यह पद संयुक्त करै। इस गायत्री के प्रभाव मात्र से साधक के करोडों महा पातक शीघ्र नाश होते हैं, यह अन्यथा नहीं है। इसके ही प्रभाव से श्री रामचन्द्र जी रावण वध के पाप से विमुक्त हुए थे और भगवान् चन्द्रमा गुरुपत्नी गमन करके मुक्त हुए थे। उसके ही प्रसाद से परशुराम जी ने मातृवध के पातक से छुटकारा पाया था एवं श्रीकृष्ण और दत्तात्रेय इस के ही प्रभाव द्वारा सुरापान जनित पातक से मुक्त हुए थे हे सुन्दरि ! इस प्रकार से यह महाविद्या गुप्त रखनी चाहिये । इसका दश बार जपकरने से महापातक करने पर भी तत्काल उद्धार होता है यह सत्य सत्य ही कहता हूं ॥

अथ कुलचूड़ामणौ च—

उत्थाय कुलवस्त्रे च परिधाय कुलेन तु। तिलकं कुलरूपञ्च कृत्वा-चम्य कुलेश्वरः॥

स्वतन्त्रेऽपि—

मोक्षार्थी रक्तवस्त्रेण भोगार्थी श्वेतवाससा॥ मारणे कृष्णवस्त्रञ्च वश्ये रक्तं सदा गृही॥ उच्चाटे व्याघ्रचर्माणि वृक्षत्वक् स्तम्भकर्माणि। परिधाय ततो मन्त्री यागभूमिमथो विशेत्॥

तन्त्रान्तरे च—

ततश्च साधकश्रेष्ठो हृदि मन्त्रं परामृशन। अबहिर्मानसो योगी यागभूमिमथो विशेत्॥ जलशंखं करे कृत्वा गत्वा द्वारि महेश्वरि। क्षालयेद्धस्तपादौ च वक्ष्यमाणेन वर्त्मना॥

यागस्थानानि यथा। फेत्कारिण्याम्—

एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे॥ तत्रस्थः साधयेद् योगी विद्यां त्रिभुवनेश्वरीम्॥ पञ्चक्रोशान्तरे यत्र न लिङ्गान्तर-मीक्षते। तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा॥

स्वतंत्र में कहा है, मोक्षार्थी रक्तवस्त्र, भोगार्थी श्वेतवस्त्र मारणार्थी कृष्णवस्त्र, वश्यार्थी रक्तवस्त्र, उच्चाटनार्थी व्याघ्रचर्म और स्तम्भनार्थी वृक्ष की छाल पहर कर यागभूमि में प्रवेश करै। तंत्रान्तर में कहा है, अनन्तर साधकश्रेष्ठ हृदय में मंत्र परामर्शन पूर्वक अवहिर्म्मनस्क (एकाग्र मनसे) और योग परायण होकर यागभूमिमें प्रवेश करै। हेमहेश्वरि हाथ में जलशंखधारण पूर्वक द्वार देशमें गमन करके वक्ष्यमाण विधान में हाथ और पैर प्रक्षालन करै। फेत्कारिणी में समस्त याग स्थान इस प्रकार से निर्देश किये हैं। यथाः-एकलिंग, श्मशान, शून्यगृह और चतुष्पथ (चौराहे) में अवस्थिति कर योगावलम्बन सहित त्रिभुवनेश्वरी विद्या की साधना करै। जहां पंचकोश (पाँचकोश) मेंभी लिङ्गान्तर लक्षित नहो, उसकोही एकलिंग कहते हैं। उस स्थान मेंही अनुत्तम सिद्धि संग्रह होती है।

मुण्डमालातन्त्रे च--

नदीतीरे विल्वमूले श्मशाने शून्यवेश्मनि । एकलिङ्गे पर्वते वा देवागारे चतुष्पथे ॥ शवस्योपरि मुण्डे च जले वा कण्ठपूरिते । संग्रामभूमौ योनौ वा स्थले वा विजने वने । यत्र कुत्र स्थले रम्ये यत्र वा स्यात् मनोलयः ॥

अन्यत्रापि—

ऊषरे पर्वते वापि निर्जने वा चतुष्पथे । देवागारे देवशून्ये विल्वमूले नदीतटे ॥ स्वगृहे निर्जनारामे तथा चाश्वत्थसान्निधौ । अथैतेषामेकतमं स्थानमाश्रित्य यत्नतः ॥

ओं वज्रोदके हुं फट् स्वाहा । अनेन सव्येन जलमानीय आसनमभ्युक्ष्य उपरि उपाविश्य ओं ह्रीं विशुद्धयै सर्वपापानि शमय अशेषविकल्पमपनय हुं फट् स्वाहा इति पादौ प्रक्षाल्य पूर्ववदाचामेत् । तदुक्तं कुमारीकल्पे-

ओं वज्रोदके हुं फट् स्वाहामन्त्रेण मन्त्रवित् । जलमानीय सव्ये तु आसनं शोधयेत्ततः ॥ प्रणवं पूर्वमुद्धृत्य लज्जावीजं तथैव च । ततो विशुध्यन्ते सर्वपापानि शमयेदथ ॥ अशेषान्ते विकल्पं स्यात् अपनयेति ततःपरम् । कूर्चवीजं भवेन्मन्त्रं पादप्रक्षालने प्रिये ! ॥

मुण्डमाला तंत्र में कहा है, नदीतीर, विल्वमूल, श्मशान, शून्यगृह एकलिंग पर्वत, देवालय, चतुष्पथ, शवके ऊपर, शवमुण्ड, कण्ठपूरितजल, संग्रामभूमि, योनिस्थल, विजनबन, इन सब स्थानों में अथवा जहाँ मनका लय होसके, इस प्रकार रमणीक स्थल में साधना करै । अन्यत्र कहा है, उज्जट (भीमरूप) पर्वत, निर्जल चतुष्पथ, देवालय, विल्वमूल, नदीतट, स्वगृह, निर्जन, उपवन, पीपल के समीप इनमें एक उत्तम स्थान आश्रय करके, यत्नपूर्वक "ओं वज्रोदके" इत्यादि मंत्रसे सव्यहस्त में जल लेकर आसन अभ्युक्षण और उसके ऊपर उपवेशन (बैठ) करके, ओं ह्रीं विशुद्ध इत्यादि मन्त्र से पांव धोने के पीछे पूर्वकी समान आचमन करै । कुमारीकल्प में भी इसी प्रकार कहा है । यथा—ओं 'वज्रोदके' इत्यादि मंत्रसे जल लाकर आसन शोधन करै । फिर प्रथम प्रणव अर्थात् ओं उच्चार करके, तदुपरान्त लज्जावीज अर्थात् ह्रीं उद्धृत करै । अनन्तर "विशुद्धयै सर्वपापानि शमयेत्" कहकर "अशेष विकल्पं अपनय" यह पद संयुक्त करै ! फिर कूर्च बीज अर्थात् हुं शब्द संयुक्त करै । तो मंत्रका प्रयोग इसप्रकार हुआ-'ओं ह्रीं विशुद्धये सर्वपापानि शमयेत् अशेषविकल्पमय नय हुं फट् स्वाहा' । हे प्रिये ! यही पादप्रक्षालन मंत्र है

अथ वामे त्रिकोणवृत्तभूविम्बं विलिख्याधारशक्तये नमः इति संपूज्य तदुपरि अस्त्रमन्त्रेण शोधितं साधारपात्रं निधाय नमः इति संपूज्य अंकुशमुद्रया सूर्य्यमण्डलात्तीर्थमावाह्य ॐ इति गन्धपुष्पं दत्वा धेनुमुद्रां प्रदर्श्य ॐ इति दशधा जप्त्वा तज्जलेन गृहद्वारमभ्युक्ष्य द्वारदेवताः प्रपूजयेत् ॥ तदुक्तं तन्त्रान्तरे–

तत आचमनं कृत्वा सामान्यार्घ्यं प्रकल्पयेत् । त्रिकोणवृत्तभू-विम्बं मण्डलं रचयेत् सुधीः ॥ आधारशक्तिं संपूज्य तत्राधारं विनि-क्षिपेत् । अस्त्रमन्त्रेण संशोध्य हृन्मन्त्रेण प्रपूरयेत् ॥ निक्षिपेत्तीर्थमा-वाह्य गन्धादीन् प्रणवेन तु । दर्शयेद्धेनुमुद्रां वै सामान्यार्घ्यमिदं स्मृतम् । सामान्यार्घ्येण देवेशि ! पूजयेद्द्वारपार्श्वयोः ॥

धेनुमुद्रा यथा–

अन्योन्याभिमुखं श्लिष्टा कनिष्ठानामिका पुनः । तथाच तर्जनी-मध्या धेनुमुद्राऽमृतप्रदा ॥

अनन्तर वामपार्श्वमें त्रिकोण वृत्तभूविम्व अंकितकर "आधारशक्तयेनमः" कह विशेष प्रकारसे पूजाकर तिसके ऊपर अस्त्र मंत्र से शोधित आधार सहित पात्र न्यस्त करै। फिर "नमः" इस पदके प्रयोगान्त में सविशेष पूजा और अंकुशमुद्रा की सहायता द्वारा सूर्यमण्डल से तीर्थ आवाहन कर, प्रणवोच्चारण सहित गंध, पुष्प दान और धेनुमुद्रा प्रदर्शन करै। फिर प्रणवोच्चारण करनेपर दशवार जप और जल से गृह-द्वार अभ्युक्षण कर समस्त द्वार देवताओं की पूजा करनी चाहिये । तंत्रान्तर में भी इसी प्रकार कहा है, अनन्तर आचमन करके सामान्य अर्घ्यस्थापन और त्रिकोणवृत्त भू विम्व मण्डल की रचना करै। फिर आधारशक्ति की पूजा करके, उस में आधार निक्षेप करै। अनन्तर अस्त्र मंत्रसे संशोधन और हृन् मंत्र में प्रपूरण करके, तीर्थ आवाहन पूर्वक प्रणव सहित गंधादि निक्षेप और धेनुमुद्रा प्रदर्शन कर। इसकाही नाम सामान्यार्घ्य है। हे देवेशि ! सामान्यार्घ्यं द्वारा दोनों द्वारके पार्श्व की पूजा करै।

धेनुमुद्रा का प्रयोग यही है कि कनिष्ठा और अनाभिका को परस्परके अभिमुख में संश्लिष्ट करके तर्ज्जनी और मध्यमा को भी इसी प्रकार करै। इसकाही नाम धेनु-मुद्रा है। इसके द्वारा अमृत लाभ होता है।

द्वारदेवता यथा—

गणेशं क्षेत्रपालञ्च वटुकं योगिनीं तथा। ऊर्ध्वं वामे च दक्षे च अधश्चैव प्रकीर्त्तितम् ॥

अथ पूजा—द्वारोर्ध्वे गां गणेशं वामे क्षां क्षेत्रपालं दक्षिणे वां वटुकम् अधः यां योगिनीं एवं तत्रैव गां गङ्गां यां यमुनां श्रीं लक्ष्मीं ऐं सरस्वतीञ्च एवं चतुर्द्वारे सम्पुटवामाङ्गसङ्कोचेन पूजामण्डपान्तर्गत्वा नैर्ऋत्यां ब्रह्मणे नमः वास्तुपुरुषाय नमः इति गन्धपुष्पाभ्यां संपूज्याक्षतसिद्धार्थतिलान् नाराचमुद्रया श्रों सर्वविघ्नान् उत्सारय हुं फट् स्वाहा ॐ पवित्रवज्रभूमे हुं हुं फट् स्वाहा अनेन भूमिमभिमन्त्रयेत्। तदुक्तं स्वतन्त्रे—

भूमिव्योमस्थितान् सर्वान् विघ्नांस्तांस्तान् सहाक्षतैः। सिद्धार्थैस्तिलसंमिश्रैः प्रोत्सार्य्य त्वासने विशेत् ॥

अन्यत्रापि—

भूतापसर्पणं कुर्य्यात् मन्त्रेणानेन साधकः। यस्मिन् कृते स्थले भूता दूरं यान्ति सुरार्चने ॥ स्थितेषु सर्वभूतेषु नैवेद्यं मण्डलं तथा। विलुम्पति सदा लुब्धा न च गृह्णन्ति देवताः। तस्माद् यत्नेन कर्त्तव्यं भूतानामपसर्पणम् ॥

द्वार देवता सब यथा;—गणेश, क्षेत्रपाल, वटुक, योगिनी, यह द्वारके उर्ध्व, वाम, दक्षिण और अधोदिक में अवस्थिति करते हैं। इनकी पूजा यथा;—द्वारके उर्ध्व में गां गणेश, वाममें 'क्षां' क्षेत्रपाल, दक्षिण में वां वटुक, अधोभाग में 'यां' योगिनी इत्यादि कहकर गंध पुष्प द्वारा पूजा करके अक्षत, सिद्धार्थ, और तिल, यह सब नाराचमुद्रा द्वारा प्रदान पूर्वक, 'श्रों' सर्व विघ्नान्, इत्यादि मंत्रसे भूमि का अभिमन्त्रण करे।

स्वतंत्र में भी इसी प्रकार कहा है, कि भूमि और आकाश संस्थित संपूर्ण विघ्न परम्परा अक्षत, सिद्धार्थ और तिल की सहायता से प्रोत्सारित (दूर) होकर आसनपर विराजमान होवे। अन्यत्र भी कहा है कि साधक इस मंत्र द्वारा भूतापसर्पण करै, इस के द्वारा भूमिस्थ समस्त भूत दूर सेही भागजाते हैं जो सम्पूर्ण भूत होने से लुब्ध होकर सर्वदा नैवेद्य मण्डल विलुप्त करता है देवगण उसको ग्रहण नहीं करते। इसी कारण यत्नसहित भूतगणों की अपसर्पणा करै। कुमारीतंत्र में भी कहा है,

कुमारीतन्त्रेऽपि—

प्रणवं पूर्वमुद्धृत्य सर्वाविघ्नांस्ततः परम्। उत्सारय ततो हुं फट् स्वाहा च तदनन्तरम्॥ अनेनैव च मन्त्रेण विघ्नानुत्सारयेत् सुधीः। प्रणवं पूर्वमुद्धृत्य रक्ष रक्ष तदन्तरम्। हुं फट् स्वाहेति मन्त्रेण भूमिञ्च परिशोधयेत्॥ ततः पवित्रवज्रादौ प्रणवं पूर्वमुद्धरेत्॥ वर्मद्वयं ततश्चैव फट् स्वाहा तदनन्तरम्। अनेनैव विधानेन कुर्य्यात् भूम्यभिमन्त्रणम्॥

अथ आसनानि यथा—तदुक्तं मत्स्यसूक्ते—

मृदुचूड़कमासीनश्चान्येषु कोमलेषु वा। विस्तारेषु समाश्रित्य साधयेत् सिद्धिमुत्तमाम्॥ अर्वाक् षण्मासतो गर्भमृतमाहुर्मृदुं बुधाः। चूड़ोपनयनैर्हीनं मृतमचूड़कं विदुः॥ निवृत्तचूड़को बालो हीनोपनयनः पुमान्। यो मृतः पञ्चमे वर्षे तमेव कोमलं विदुः॥

स्वतन्त्रेऽपि—

कम्बले लोहिते वापि कृष्णे वा व्याघ्रचर्मणि। संन्यासी ब्रह्मचारी च विशेत् कृष्णस्य चर्मणि॥

प्रथम ओं फिर "सर्व विघ्नान्" फिर 'उत्सारय' फिर (हुं फट् स्वाहा) अर्थात् (ओं सर्वविघ्नानुत्सारयस्वाहा) इत्यादि मंत्र से संपूर्ण विघ्न उत्सारित करके फिर, ओं रक्ष रक्ष हुं फट् स्वाहा, इत्यादि मंत्र से भूमिशोधन और तदुपरान्त 'ओंपवित्रवज्र, इत्यादि मंत्र से भूमि का अभिमंत्रण करैं॥

अब समस्त आसन विधि लिखी जाती है। मृदु वा अचूड़क अथवा कोमल और विस्तार आदि अन्यान्य आसनमें आसीन होकर जिस भांति सिद्धि साधन में प्रवृत्तहोवे। छै महीने के अनधिक जो गर्भ में रहकर मर गया है, उसको ही पंडित गण मृदुकहते हैं। जिसका चूड़ा व उपनयन नहीं हुआ और उसी अवस्था में मरगया है, उसको अचूड़क कहते हैं। जिस बालक का चूड़ाकर्म तो होगया पर उपनयन नहीं हुआ है, वह यदि पांचवें वर्ष में मर गया है, पंडितगण उसको कोमल कहते हैं। स्वतंत्र में भी कहा है कि लोहित (लाल) व कृष्ण (काला) कम्बल अथवा व्याघ्रचर्म, वा कृष्णचर्म इन सब आसनों में संन्यासी और ब्रह्मचारी उपवेशन करें अर्थात् बैठें।

मत्स्यसूक्तेऽपि—

कृष्णसारद्वीपिचर्म अचूडकम्बलं तथा। पीतवस्त्रञ्च शुक्लं वा आसनाय प्रकल्पयेत् ॥

मुण्डमालातन्त्रे—

व्याघ्राजिनं सर्वसिद्धयै ज्ञानसिद्धयै मृगाजिनम्। वस्त्रासनं रोगहरं वेत्रजं प्रीतिवर्द्धनम् ॥ कौषेयं पुष्टिदं प्रोक्तं कम्बलं सर्वसिद्धिदम्। शुक्लं वा यदि वा रक्तं विशेषाद्रक्तकम्बलम् ॥ मृदुकोमलमास्तीर्णं संग्रामे पतितं हि यत्। जन्तुव्यापादितं वापि मृगं वापि वरासनम् ॥ गर्भच्युतं वा नारीणामथवा योनिजां त्वचम्। सर्वसिद्धिप्रदञ्चैव सर्वभोगसमृद्धिदम् ॥ त्वचं वा यौवनस्थानां कुर्य्याद्वीरवरासनम्। श्मशानकाष्ठघटितं पीठं वा यज्ञदारुजम् ॥ न दीक्षितो विशेज्जातु कृष्णसाराजिने गृही। उदासीनवनासीनस्नातकब्रह्मचारिणः ॥ कुशाजिनाम्बरैराढ्यं चतुरस्रं समन्ततः। एकहस्तं द्विहस्तं वा चतुरंगुलमुच्छ्रितम्। विशुद्धे आसने कुर्य्यात् संस्कारे पूजनं बुधः ॥ इति

अत्र मृतासनमवश्यमेव प्रत्यवायश्रवणात्। कालीतन्त्रे–मृतासनं विना देवि ! यो जपेत् कालिकां नरः। तावत्कालं नारकी स्यात् यावदाभूतसंप्लवम् ॥ यत्तु स्वतन्त्रादौ कम्बलाद्यासनमुक्तं तन्न स्वतन्त्रा-

---

मत्स्यसूक्त में भी कहा है, कृष्णसार और व्याघ्रचर्म, अचूडक, कम्बल, पीत वा शुक्लवस्त्र, इन सब में आसन कल्पना करै। मुण्डमाला तंत्र में कहा है व्याघ्रचर्म में सर्व सिद्धि, मृगचर्म में ज्ञानसिद्धि, वस्त्रासन में रोगनाश, वेत्रासन में प्रीतिवर्द्धन, कौशेय आसन में पुष्टि और कम्वल में सर्वसिद्धि लाभ होती है। शुभ्र वा रक्त विशेषतः रक्त कम्वल, संग्राम में पतित वा जन्तुकर्त्तृक व्यापादित (जानवरों से घायल) मृग उत्कृष्ट आसन अथवा स्त्रियों का गर्भच्युत अथवा योनिजात त्वक् सर्वसिद्धि प्रदान और सब प्रकार से भोग समृद्धि विधान करती है यौवनस्थ गणों के त्वक में भी वीर वरासन करै। श्मशानकाष्ठ का वा यज्ञ दारु की पीठ भी उत्कृष्ट आसन है। दीक्षित गृहीव्यक्ति कभी कृष्णसार के अजिन में उपवेशन न करै। उदासीन, बनासीन स्नातक यह कुश अजिन और वस्त्रावृत, समचतुष्कोण, एकहस्त वा दो हस्त परिमित, चार अंगुल ऊँचे आसनमें उपवेशन करैं। कालीतंत्र में कहा है, मृतासन के विना जो व्यक्ति देवीकालिका का जप करता है, वह यावत् प्रलय नरक में वास करता है। अतएव स्वतंत्रादि में जो कम्बलादिका आसन कहा वह स्वतंत्र आसन नहीं है तकयुक्तम्

सनं किन्तु मृतकयुतामिति बोद्धव्यम्। मृताभावे विष्टरमिति। तदुक्तम्-

मृताभावे विष्टरञ्च शवरूपंप्रकल्पयेत्।

अथ भूमौ त्रिकोणमण्डलं कृत्वा तत्र आधारशक्त्यादिभ्यो नमः इति संपूज्य तदुपरि विहितासनमारोप्य कृताञ्जलिः पठेत्। तदुक्तम्-

मेरुपृष्ठऋषिः प्रोक्तः सुतलं छन्द ईरितम्। कूर्मोहि देवता देवि! आसनाय प्रकल्पयेत्॥ विनियोगं ततः कृत्वा पठेत् धृत्वा समन्ततः। पृथ्वि! त्वया धृतालोका देवि! त्वं विष्णुना धृता॥ त्वञ्च धारय मां नित्यं पवित्रं कुरु चासनम्। इति धृत्वा तु देवेशि! कुशांस्तत्रैव दापयेत्॥ मायाबीजं समुच्चार्य्य आधारशक्ति मुच्चरेत्। कमलासनमालिख्य ङे नमोऽन्तं प्रपूजयेत्॥

कुमारीकल्पेऽपि-

आःकारान्तं सुरेखेच वज्ररेखे ततः परम्। हुं फट् स्वाहेति कुर्य्यात्तु मण्डलञ्च शवासने। वीरासनेनोपविशेत् संपूज्यासनमेव च।

समझना चाहिये मृतके अभाव में विष्टर आसन ग्रहण करै सो कहा है यथा—मृताभाव में विष्टरको शवरूप में कल्पना करलेना चाहिये।

अनन्तर भूमि में त्रिकोण मंडल की रचना करके उस में आधारशक्त्यादिभ्यो नमः] इत्यादि कह विशेष प्रकार से पूजा कर उस के ऊपर विहितासन स्थापन पूर्वक कृतांजलि होकर पाठ करै। सो कहा है। यथा-मेरुपृष्ठऋषि, सुतलंछन्द कूर्म देवता, आसन के लिये कल्पना करै। फिर इस प्रकार पाठ करै कि [हे पृथ्वि! तुम ने सब लोकों को धारण किया है, विष्णु तुमको धारण करते हैं। अतएव तुम मुझ को नित्य धारण और मेरे आसन को पवित्र करो।] यह कहकर समस्त कुश धारण और उस में प्रदान पूर्वक माया बीज और आधार शक्ति उच्चारण और तदुपरांत (कमलासनाय नमः) कहकर पूजा करै। कुमारी कल्प में कहा है, प्रथम आःकार, फिर (सुरेख) और फिर (वज्ररेख) में (हुं फट् स्वाहा) कहकर शवासन में मंडल की रचना करै। फिर आसनकी पूजा करके वीरासनमें विराजमान होवे। अनन्तर आसनके ऊपर तीनकुश डालकर (ह्रीं आधारशक्तये कमलासनायनमः) इत्यादि मंत्र से पूजा करके, फिर आः

अथ आसनोपरि कुशत्रयं दत्वा ह्रीं आधारशक्तये कमलासनाय नमः इति संपूज्य आः सुरेखे वज्ररेखे हुं फट् स्वाहा इति मन्त्रेण तत्र मण्डलिकां कृत्वा तदुपरि वीरासने उपविश्य विजयां स्वीकुर्य्यात् । तदुक्तम्

भावचूड़ामणौ–

विना हेतुकमास्वाद्य क्षोभयुक्तो महेश्वरः । न पूजां ममकुर्य्याच्च न ध्यानं न च चिन्तनम् ॥ तस्माद्भुक्त्वा च पीत्वा च पूजयेत् परमेश्वरीम् ।

विजयाकल्पेऽपि–

संविदासवयोर्मध्ये संविदैव गरीयसी । संविन्प्रयोगस्तेनेह पूजादौ साधकोत्तमैः । कर्त्तव्या च महापूजा करणीया सुनिन्दितैः॥

अन्यत्रापि–

आनन्देन विना भ्रंशो न च तृप्यन्ति देवताः । तस्मात् पूजादौ विजयास्वीकारः कार्य्यः । पुनश्चतुर्धा । ब्राह्मणी क्षत्रिया वैश्या शूद्रा च श्वेतरक्तकृष्णपीतप्रसूनभेदाः ।

तासां शुद्धिर्विजयाकल्पानुसारेण लिख्यते । संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदानघे ॥ भैरवाणाञ्च तृप्त्यर्थं पवित्रा भव सर्वदा । ओं

सुरेख, में 'वज्ररेख में (हुं फट् स्वाहा) इत्यादि मंत्र से उस में मंडलिका करके उस के ऊपर वीरासन में बैठकर विजया स्वीकार में प्रवृत होवे । भावचूडामणि में कहा है । यथा विजया स्वीकार नकरने से महेश्वर भी क्षोभयुक्त होकर मेरी पूजा ध्यान और चिन्ता नहीं कर सकते । इसी कारण भोजन और पान करके परमेश्वरी की पूजा करै। विजयाकल्प में भी कहा है. संविद् और आसव में संविद् ही श्रेष्ठ है । इसी लये साधक प्रवर पूजादि में संविद् प्रयोग करै। अन्यत्र भी कहा है आनन्द अर्थात् संविद् के विना पूजा खंडित होती है, देवतागणों को भी तृप्ति लाभ नहीं होती। इसी कारण पूजादि में विजयास्वीकार कर्तव्य है। यह विजया चार प्रकार है यथा-ब्राह्मणी, क्षत्रिया, वैश्या और शूद्रा । यह श्वेत, रक्त, कृष्ण और पीतवर्ण है कुसुम भेद से इस प्रकार चारभेद कल्पित हुए हैं। विजयाकल्पानुसार उस की शुद्धि लिखी जाती है। हे संविदे ! तुम ब्रह्म से उत्पन्न हुई हो । तुम ब्रह्म की पुत्री हो । तुम सब प्रकार से

ब्राह्मण्यै नमः स्वाहा। साधयेदपरां ततः ॥इत्यनेन अभिमन्त्रणम् ।

सिद्धिमूले प्रिये ! देवि ! हीनबोधप्रबोधिनि। राजाप्रजा वशङ्कारि शत्रुकण्ठत्रिशूलिनि ॥ ऐं क्षत्रियायै नमः स्वाहा शोधयेदपरां ततः। अज्ञानेन्धनदीप्ताग्ने ज्वालाग्ने ज्ञानरूपिणि। आनन्दस्याहुतिं प्रीतिं सम्यग्ज्ञानं प्रयच्छ मे। ह्रीं वैश्यायै नमः स्वाहा शूद्रां संशोधयेत्ततः ॥ नमस्यामि नमस्यामि योगमार्गप्रबोधिनि। त्रैलोक्यविजये मातः समाधिफलदाभव ॥ ह्रीं शूद्रायै नमः स्वाहा ओं अमृते अमृतोद्भवे अमृतवर्षिणि पदं ततः ॥

अमृतमाकर्षय द्वन्द्वं सिद्धिं देहि ततःपरम् । अमुकं मे ततो ब्रूयात् वशमानय ततः परम् । छिठान्तोऽयंमनुः प्रोक्तः चतुर्णांनाञ्च शोधने ॥

उत्तरतन्त्रे च—

मूलमन्त्रं ततो देवि ! तस्योपरि नियोजयेत्। आवाहनादिमुद्रांच धेनुयोनी ततःपरम् ॥ दिग्बन्धश्छोटिकाभिश्च तालत्रयपुरःसरः ।

पाप सम्पर्क हीन हो भैरवगणों को दान करने के लिये ही तुम्हारी सृष्टि हुई है। तुम सर्वदा पवित्र हो। तुम्हीं ब्रह्माणी हो। तुम को नमस्कार है। यह कह "स्वाहा" समुच्चारण पूर्वक अपरा का साधन करे। यथा तुम सिद्धि की मूल कारण हो। तुम सबकी परम प्रीति भाजन हो। तुम्हीं स्वप्रकाश युक्त हो। तुम्हीं बुद्धिहीन गणों को प्रबोधित करती हो। तुम्हीं राजा और प्रजा दोनों को वशीभूत करती हो। तुम्हीं शत्रुकंठकी त्रिशूलिनी हो। तुम्हीं क्षत्रिया हो तुमको नमस्कार है यह कह कर "स्वाहा" प्रयोग पूर्वक अपरा का साधन करे। यथा—तुम अज्ञानरूप ईंधन को पावक स्वरूप हो। तुम्हीं ज्वालाग्नि हो। तुम्हीं ज्ञानरूपिणी हो तुम मुझको सम्यग ज्ञान एवं प्रीति और आनन्दाहुति प्रदान करो। तुम्हीं वश्या हो, तुमको नमस्कार है यह कहकर प्रथम "ह्रीं" और अन्त में स्वाहा उच्चारण करके शूद्रा का साधन करे यथा—तुम योग मार्ग प्रबोधिनीहो। तुम्हीं त्रैलोक्यविजया हो। तुमको नमस्कार है, नमस्कार है। हे मातः! तुम मेरी समाधि का फल प्रदान करो। तुम्हीं शूद्रा हो. तुमको नमस्कार है। यह कह पूर्व में "ह्रीं" और अन्त में "स्वाहा" प्रयोग करके प्रथम ओं अमृते अमृतोद्भवे अमृत वर्षिणी" पदबंधन पूर्वक फिर यथाक्रम से "अमृतमाकर्षय अमृतमाकर्षय सिद्धिं देहि अमुकं मे वशमानय स्वाहा। इत्यादि पद परम्परा प्रयोजित करे इसका अर्थ यही है तुम अमृता और अमृत से उत्पन्न हुई हो एवं अमृत वर्षण करती हो। अतएव अमृत को आकर्षण करो आकर्षण करो मुझको सिद्धि प्रदान करो, अमुक को मेरे वश में लाओ। यही मंत्र उल्लिखित चतुर्विध विजयाशोधन में प्रयोजित होता है।

दिव्यदृष्ट्या तथा पार्ष्णिघातैर्विघ्नान् विघातयेत् ॥ सप्तधा तर्पयेद् ब्रह्मरन्ध्रे मूलं जपेत् मनुम् । गुरुपद्मे सहस्रारे तथा संकेतमुद्रया ॥ त्रिधैव तर्पयेत् मंत्री साधकः सिद्धिमानसः । ऐं वद वद पदं ब्रूयात् वाग्वादिनि ततःपरम् ॥ मम जिह्वाग्रे स्थिरा भव सर्वपदं ततः । सर्वशङ्करी स्वाहेति मंत्रेण जुहुयान्मुखे ॥

संकेतमुद्रया तत्वमुद्रया इत्यर्थः ॥

अथ साधकः वामकर्णोर्ध्वे अमुकानन्दनाथश्रीभैरवगुरुपादुकाभ्योनमः दक्षिणकर्णोर्ध्वे गां गणपतिं मध्येइष्टदेवतां नमस्कृत्य सामान्योदकेन पूजास्थानादिकमभ्युदय स्वदक्षिणे गन्धपुष्पादिकं वामे सुगन्धिजलं देवतायाः पश्चिमे कुलदेवताया द्रव्याणि अन्यत् पानञ्च देवतावामे धारयेत् । तदुक्तं कुलचूड़ामणौ—

कुलासनं ततो धृत्वा तदभ्यर्च्य यथासुखम् । कुलासनं ततो बध्वा गुरुपूजाक्रमेण च ॥ आत्मशुद्धिं पीठशुद्धिं शृणु शुद्धयादि भैरव ।

उत्तर तंत्र में भी कहा है, यथा—हे देवि ! अनन्तर उसके ऊपर मूल मंत्र नियोजित करै । फिर आवाहनी धेनु और योनिमुद्रा का प्रयोग है, तालत्रय [तीन ताल] प्रदान सहित छोटिका द्वारा दिग्बन्धन दिव्यदृष्टि सहकृत पार्ष्णिघात द्वारा समस्त विघ्नों को उत्सारित सातवार तर्पण और मूलमंत्र जप करना चाहिये । साधक सिद्धि की कामना से तीन वार गुरु पद्म सहस्रार में संकेतमुद्रा प्रदर्शन पूर्वक तर्पण और "ऐं वद वद ,, इत्यादि मंत्र से मुख में आहुति प्रदान करै ।

इस मन्त्र का अर्थ यही है, तुम वाग्वादिनी हो । अतएव मेरे वाक्यस्फूर्त्ति करो । मेरी जिह्वा के अग्र में स्थिर हो इत्यादि यह संकेतमुद्रा शब्द में तत्वमुद्रा समझनी चाहिये ।

अनन्तर साधक वामकर्णोर्ध्व में, अमुकानन्दनाथ श्री भैरव गुरु के पादुका युगल में नमस्कार दक्षिण कर्णोर्ध्व में गा गणपति को नमस्कार और मध्य में इष्ट देवता को नमस्कार करके, सामान्य उदक द्वारा पूजा स्थानादि अभ्युक्षित कर अपने दक्षिण में गंध पुष्पादि, देवता के वाम में सुगन्धि जल पश्चिम में कुल देवता के सब द्रव्य और अन्यविध पान देवता के वाम में धारण करै। कुल चूड़ामणि में कहा है, यथा—अनन्तर कुलासन धारण करके, यथासुख उसकी अभ्यर्चना और गुरुपूजा के क्रम से उसका बंधन करै । अनन्तर आत्मशुद्धि और पीठशुद्धि करके, यागभूमि

कृत्वाचार्घ्यं ततो विद्वान् कुर्य्यात् कुलविधेष्टितम् ॥ दीक्षिताभिः कुलीनाभिर्युवतीभिः कुलात्मभिः । देवतागुरुभक्ताभिर्वाञ्छितं यागभूमिषु ॥ नानाविधानि पुष्पाणि गन्धानि विविधानि च । कर्पूरजाती धूपादि वासितं पटवासितम् ॥ ताम्बूलं देयद्रव्यञ्च धूपदीपादिकंच यत् । सर्वालङ्कारभूषाभिर्भूषितः कौलिकेश्वरः ॥ मूलमन्त्रं तप्ततोयैः प्रोक्षितं स्थापयेत्ततः । सर्वस्वं दक्षिणे स्थाप्यं वामे चार्घ्यं निवेदयेत् । पश्चिमे देवतायाश्च कुलद्रव्याणि धारयेत् ॥

पश्चिमे पृष्ठे इत्यर्थः । कालिकापुराणेऽपि—मदिरां पृष्ठतो दद्यादन्यपात्रञ्च वामतः ।

कुलार्णवेऽपि—आत्मस्थानमनु द्रव्यं देहशुद्धिस्तु पंचमी । यावन्न कुरुते देवि ! तावद्देवार्चनं कुतः ॥ मार्जनाद्देहशुद्धिस्तु प्राणयोगादिभिः प्रिये ! षड़ङ्गानि न्यसेन्मन्त्री आत्मशुद्धिरितीरिता ॥ गृहीत्वा मातृकावर्णमूलमन्त्राक्षराणि तु । क्रमोत्क्रमाद्विरावृत्तिर्मंत्रशुद्धिरितीरिता ॥ पूजाद्रव्यादि संप्रोक्ष्य मूलास्त्राभ्यां विधानतः । धेनुमुद्रां दर्शयेच्च द्रव्यशुद्धिरितीरिता ॥ पीठे देवीं प्रतिष्ठाप्य सकलीकृत्य मंत्रवित् ।

में देवता, और गुरु गणों के प्रति भक्तिशालिनी, दीक्षिता, कुलीन युवती गणों का वांछित, कुलाचार विधिबोधित अर्घ्यविधान पूर्वक विविध गन्ध और पुष्प कर्पूर और जाती धूपादि सुवासित ताम्बूल और दीपादि देय द्रव्य, मूल मंत्र तप्त सलिल में प्रोक्षित करके स्थापित करै । तिसकाल सर्व अलंकारादि भूषणों से भूषित होवे । सर्वस्व दक्षिण में स्थापित करके वाम में अर्घ्य निवेदन और देवताके पश्चिम में समस्त कुलद्रव्य धारण करै यहां पश्चिम शब्द पृष्ठवाचक है । कालिकापुराण में भी कहा है, हे देवि ! आत्मशुद्धि स्थानशुद्धि, मंत्रशुद्धि, द्रव्यशुद्धि और देहशुद्धि न करने से किसी प्रकार अर्चनासिद्धि नहीं होसकी । हे प्रिये ! प्राण योगादि द्वारा मार्जन करने से देहशुद्धि सम्पन्न होती है । मंत्रशील पुरुष षडङ्गन्यास करै । इसकाही नाम आत्मशुद्धि है । मातृकावरण और मूल मंत्रके समस्त अक्षर ग्रहण करके क्रमोत् क्रमानुसार दो बार आवृत्ति करै । इसकाही नाम मंत्रशुद्धि है । मूल और अस्त्र मंत्र में विधानानुसार पूजा द्रव्यादि भली भांति प्रोक्षित करके धेनुमुद्रा प्रदर्शन करने को द्रव्यशुद्धि कहते हैं मंत्रवित् साधक देवी को पीठ में प्रतिष्ठापिता और दीप्तात्म ।

मूलमंत्रेण दीप्तात्मा अभिमाव्योदकेन च । त्रिवारं प्रोक्षयेद्विद्वान् देहशुद्धिरितीरिता । पंचशुद्धिं विधायेत्थं पश्चाद् यजनमाचरेत् ।

अन्यत्रापि । पंचशुद्धिविहीनेन यत् कृतं न च तत् कृतम् । पंचशुद्धिं विना पूजा अभिचाराय कल्पते ॥ आत्मशुद्धिः स्थानशुद्धिर्मन्त्रस्य शोधनं तथा । द्रव्यशुद्धिर्देहशुद्धिः पञ्चशुद्धिरितीरिता ॥

अथ कुमारीकल्पे—

पुष्पाधिष्ठाने पुष्पस्य प्रणवं पूर्वमुद्धरेत् । ततोऽभिषेकेति पदं शताभीति ततःपरम् । सेकेति च पदं प्रोक्त्वा हुं फट् स्वाहा ततःपरम् । अनेन मनुना देव्याः पुष्पाधिष्ठानमेव च ॥ प्रणवं पुष्पकेतुञ्च तथा राजार्हतेऽपि च । शताय सम्यगुक्त्वा च सम्बद्धाय ततश्च ओम् ॥पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसम्भवे । पुष्पचयावकीर्णे हुं फट् स्वाहेति ततः परम् ॥ विशोध्य पुष्पमेतेन जलं पूर्ववदाहरेत् ॥

ओं शताभिषेक ओं शताभिषेक हुं फट् स्वाहेति मंत्रेण पुष्पमधिष्ठाय ओं पुष्पकेतु राजार्हते शताय सम्यक् सम्बद्धाय इति पुष्पमभिमन्त्र्य पूजाद्रव्यादिकं मूलान्ते फडित्यनेन अभ्युक्ष्य धेनुमुद्रया अमृतीकृत्य वामपार्ष्णिघातत्रयं फडिति भूमौकृत्वा तर्जनामध्यमाभ्याम्

होकर, मूल मंत्रमें अभिवादित करके उदक द्वारा तीनबार प्रोक्षण करै इसका ही नाम देहशुद्धि है । इस प्रकार पञ्चविध शुद्धि विधान करके फिर यजन कार्य में प्रवृत्त होना चाहिये । अन्यत्र भी कहा है । उल्लिखित पंचशुद्धि हीन होकर जो किया जाता है, वह न करने में ही है । पंचशुद्धिके बिना पूजा करने से वह अभिचार रूप में कल्पित होती है । आत्मशुद्धि, स्थानशुद्धि, मंत्रशुद्धि, द्रव्यशुद्धि, और देहशुद्धि इनका ही नाम पञ्चशुद्धि है ।

कुमारीकल्पमें भी कहा है, पुष्पाधिष्ठान समयमें प्रथम प्रणव उद्धार करके फिर शताभिषेक पद संयुक्त कर "हुं फट् स्वाहा" प्रयोजित करै । इस में जो मंत्र हो उसके पढने पर देवीका पुष्पाधिष्ठान करके फिर प्रणवोद्धार पूर्वक "पुष्पकेतु" इत्यादि पद प्रयोग सहित जो मंत्र हो, तिसको पढ पुष्पशुद्धि करके पूर्ववत् सलिल आहरण करना चाहिये । "ओं शताभिषेक" इत्यादि मंत्रसे पुष्पाधिष्ठान करके 'ओं पुष्पकेतु राजार्हते" इत्यादि मंत्र से पुष्प को अभिमन्त्रण और मूलके अन्त में फट् शब्द प्रयोग पूर्वक पूजा द्रव्यादि क्रा अभ्युक्षण करै अनन्तर धेनुमुद्रा द्वारा अमृतीकरणानन्तर "फट्"

ऊर्ध्वोर्ध्वं तालत्रयं दत्त्वा तर्जन्यंगुष्ठाभ्यां छोटिकाभिर्दशदिग्बन्धनं कुर्य्यात्। दिव्यदृष्ट्या दिव्यान् विघ्नानुत्सार्य्य रमिति चतुर्दिक्षु वह्नि प्राकारं ध्यात्वा मूलमन्त्रेण स्वदेहं संमार्ज्य प्राणायामं कुर्यात्। तथा मूलाधारे नमः संयोज्य दक्षिणांगुष्ठेन दक्षिणनासापुटं धृत्वा मूलमंत्रं प्रणवं वा षोड़शवारं जपन् वामेण वायुमापूर्य्य कनिष्ठानामिकाभ्यां वामनासापुटमपि विधृत्य तमेवचतुःषष्ठि वारं जपन् वायुं कुम्भयित्वा पुनस्तं द्वात्रिंशद्वारं जपन् दक्षिणेन वायुं रेचयेत्। एवं क्रमोत्क्रमेण प्राणायामत्रये कृते एकः प्राणायामः। इत्थं वारत्रयं कुर्य्यात्। तदुक्तं स्वतन्त्रे–

पार्ष्णिघातकरास्फोटसमुदाञ्चितवक्त्रैः। तालत्रयमथो दद्यात् सशब्दं सम्प्रदाय च॥ ऋतुचन्द्रैर्नेत्रवासिर्वासैर्वेदाधिकैः प्रिये!। मात्राभिः प्रणवं जप्त्वा पूरकुम्भकरेचकैः॥ प्राणायामं ततःकृत्वा भूतशुद्धिं ततश्चरेत्॥

शब्द पुरःसर भूमि में तीनबार वाम पादुका पार्ष्णि (बायें पैरका आघात) घात और तर्जनी मध्यमाकी सहायतासे ऊर्द्धार्द्ध में तीनताल प्रदान करके तर्जनी और अंगुष्ठ द्वारा छोटिका प्रयोग सहित दशदिक् बंधन करै। फिर दिव्यदृष्टि द्वारा समस्त दिव्य विघ्न उत्सारित और "रम" इत्यादि मंत्र से चारों दिशा में वह्नि प्राकार ध्यान करके, मूल मंत्र से स्वकीय (अपनी) देह मार्जनपूर्वक प्राणायाम करै। यथा—मूलाधार में मन संयोजित और दक्षिण अंगुष्ठ में दक्षिण नासापुट् धारण करके, सोलह बार प्रणव वा मूलमंत्रका जप समाधान करनेपर वाम नासाद्वारा वायु आपूरण, एवं कनिष्ठा और अनामिका द्वारा वामनासापुट धारण और (६४) चौंसठबार प्रणव जप पुरःसर वायुको कुम्भित करै। फिर पुनर्वार बत्तीसवार जप करके दक्षिण में वायुका रेचन करै। इस प्रकार क्रमोत्क्रमानुसार तीन प्राणायाम विहित होने पर एकमात्र प्राणायाम साधित होता है। इस प्रकार तीन बार करै। स्वतंत्र में भी कहा है। यथा—पार्ष्णिघात और कराघात द्वारा शब्द सहित तीन ताल प्रदान करै। फिर सोलहवार और बत्तीसबार प्रणव जपनेपर पूरक कुंभक और रेचक द्वारा

अन्यत्रापि —मनो जीवात्मनः शुद्धिः प्राणायामेन जायते ॥

कालीतंत्रेऽपि—प्राणायामत्रयं कुर्य्यान्मूलेन प्रणवेनवा ।

ज्ञानार्णवेऽपि—कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणम् । प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना ॥

अथ गौतमीये—

भूतशुद्धिं लिपिन्यासं विना यस्तु प्रपूजयेत् । विपरीतं फलं दद्यादभक्त्या पूजनं यथा ॥

ततो भूतशुद्धिं कुर्य्यात् । तथा मूलाधारपद्मात् कुलकुण्डलिनीं प्रसुप्तभुजगाकारां सार्द्धत्रिवलयां स्वयम्भूलिङ्गवेष्टिनीं विषतन्तुतनीयसीं तड़ित्पुञ्जप्रभां हंस इति मन्त्रेण पृथिव्या सह स्वाधिष्ठानं समानीय तत्रस्थजले पृथिवीं विलीनां विचिन्त्य तस्माज्जलेन सह मणिपूरस्थवह्नौ तज्जलं विलीनं विचिन्त्य तस्मान्मणिपूरात् वह्निना सह अनाहत आनीय तत्रस्थवायौ वह्निं लीनं ध्यात्वा तस्मान्मरुता जीवात्मना सह विशुद्धस्थाकाशे वायुं लीनं कृत्वा तस्मादाकाशेन

प्राणायाम कर भूतशुद्धि करै । अन्यत्र भी कहा है, प्राणायाम द्वारा मन और जीवात्मा की शुद्धि होती है । कालीतंत्र में भी कहा है, मूलमंत्र वा प्रणव जप सहित तीनबार प्राणायाम करै । ज्ञानार्णव में भी कहा है, कनिष्ठा और अनामिका द्वारा नासा पुट् धारण करनेको प्राणायाम कहते हैं । इसमें तर्जनी और मध्यमाका प्रयोग करना नहीं होता गौतमीय में कहा है, भूतशुद्धि और लिपिन्यास न करके पूजा करने से अभक्तिकृत पूजाकी समान उससे विपरीत फल लाभ होता है । फिर भूतशुद्धि करै मूलाधार पद्म से सोते हुए सर्प की समान आकृति शालिनी सार्द्धत्रिवल (साढ़ेतीनवल) धारिणी स्वयंभूलिंग वेष्टिनि, मृणाल तन्तु की समान अतीव सूक्ष्म स्वरूपिणी तडित् पुंजकी समान प्रभाशालिनी कुलकुण्डलिनी को हंस इति मंत्र में पृथ्वी के सहित स्वाधिष्ठान में आनयन तत्रस्थ जल में पृथ्वी विलीन है इसप्रकार चिन्तन, मणिपुरस्थ अग्नि में वह जल लीन हुआ है इस प्रकार विभावन, उस मणिपुरसे वह्नि के सहित अनाहत में आनयन और तत्रस्थ जल में अग्नि लीन है इस प्रकार ध्यान करै। फिर उससे वायु और जीवनके सहित विशुद्धस्थ आकाश में वायुको लीन करके उस स्थान से आकाश

सह आज्ञाचक्रस्थमनसि आकाशं लीनं विचिन्त्य मनो नादे लीनं विधाय धरणी ध्वनिं समर्पयेत्। ततः सहस्रदलकमलकर्णिकास्थ चन्द्रमण्डलमध्यत्रिकोणान्तर्गतविन्दुरूपपरमशिवे कुण्डलिनी जीवात्मानञ्च नित्यैकरूपतां विभाव्य प्राणायामविधिना यमिति वायुवीजं धूम्रवर्णं षोडशवारं जपन् पापपुरुषेण सह शरीरं संशोष्य रमिति वह्निवीजं रक्तवर्णं चतुः शष्टिवारं जपन् तं संदह्य वमिति वरुणवीजं शुक्लवर्णं द्वात्रिंशद्वारं जपन् तद्भवामृतवृष्ट्या निष्पापं शरीरम् उत्पाद्य लमिति पृथ्वीवीजेन पीतवर्णं ध्यायन् शरीरं सुदृढ़ीकृत्य सोऽहमिति मन्त्रेण कुलकुण्डलिनीममृतलीलां पञ्चभूतजीवात्मानञ्च ब्रह्मपथेन स्वस्वस्थाने नियोजयेत्। तदा देवीरूपमात्मानं ध्यात्वा हृदि हस्तं निधाय जीवं न्यसेत्॥

यथा—आं ह्रीं क्रों हंसः श्री दक्षिणकालिकाया ! प्राणा इह प्राणा आं ह्रीं क्रों हंसः अमुष्याः जीव इह स्थित। आं ह्रीं क्रों हंस अमुष्याः सर्वेन्द्रियाणि आं ह्रीं क्रों हंसः अमुष्याः वामनश्चक्षुः, श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। इति जीवं न्यसेत्॥

के सहित आज्ञाचक्रस्थ मन में आकाश को लीन ध्यान कर मनको नादमें लीन और पृथ्वी ध्वनि समर्पण करै अनन्तर सहस्र दल कमल कर्णिका में प्रतिष्ठित चंद्र मंडल मध्यवर्त्ती त्रिकोण के अन्तर्गत बिन्दुरूप परम शिव में कुण्डलिनी और जीवात्मा, इन दोनों को नित्य एक रूपमें चिन्ता करके प्राणायाम विधानानुसार 'यम्' यह धूम्र वर्ण वायुवीज सोलहवार जपकर पाप पुरुषके सहित शरीर का शोधन करै तदनन्तर 'रं' यह रक्तवर्ण वह्नि बीज चौंसठवार जप और उसको दग्ध करके 'वम्' यह शुक्लवर्ण वरुण वीज बत्तीसवार जप और उस से समुद्भूत अमृत वृष्टि के द्वारा निष्पाप शरीर समुद्भावन पूर्वक, लम्, इस पीतवर्ण पृथ्वीवीज के ध्यान सहित शरीर को दृढ़ करै फिर 'सोहम्' मंत्रसे अमृत लोलाकुल कुण्डलिनी और पंचभूत जीवात्मा को ब्रह्मपथ योग में स्वस्वस्थान में नियोजित करै। तिसकाल देवी का रूप और आत्मा दोनों का ध्यान और हृदय में हस्तन्यस्त करके जीव न्यास करना चाहिये। यथा-आं ह्रीं क्रों इत्यादि मंत्र से जीव न्यास करै। स्वतंत्र में कहा है, यथा संहार क्रम योग के अनुसार पंचतत्त्व समुद्धार एवं वायु अग्नि और सलिलाद्धर में शोषण दाहन और साव्रन करके फेत्कारिणी तंत्र के मतसे जीवन्यास करै।

तदुक्तं स्वतन्त्रे—

संहारक्रमयोगेन पञ्चतत्त्वं समुद्धरेत् । शोषदाहप्लवान् कृत्वा वाय्वग्निसलिलाक्षरैः ॥ ततो न्यासं प्रकुर्वीत फेत्कारीतन्त्र ईरितम् ॥ देवीरूपं ततो ध्यायेदात्मानं कमलेक्षणे । ततो जीवं प्रविन्यस्य पाशादित्र्यक्षरेण तु ॥ प्राणमन्त्रेण मुक्तेन ततोऽमुष्याः पदं ततः । प्राणा इति पदं पश्चादिह प्राणाः पदं ततः सर्वेन्द्रियाण्यमुष्यान्ते वाङ्मनो नयनं ततः श्रोत्रघ्राणपदात् प्राणा इहागत्य सुखं चिरम् । तिष्ठन्तु वह्निजायान्तः प्राणमन्त्रोऽयमीरितः ॥

प्रकारान्तरश्च ज्ञानार्णवे—

विपरीतं प्राणमन्त्रं विलिखेत् पाशपूर्वकम् । प्राणप्रतिष्ठा मन्त्रोऽयं सर्वकर्माणि साधयेत् ॥

अमुष्या इति पदानि बोद्धव्यानि इति साम्प्रदायिकाः । अमुष्याः स्थाने षष्ठ्यान्तं नाम प्रयोक्तव्यं तदुक्तं नारायणीये—

अमुकपदं यद्रूपं यन्त्रमंत्रेषु दृश्यते । साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत् ॥

कुमारीकल्पेऽपि—

भूतशुद्धिं विधायेत्थं देवीरूपेण चिन्तयेत् ॥

अन्यत्रभी कहा है, यथा—हे कमलेक्षणे ! देवी रूप और आत्मा का ध्यान करके पाशादि तीन अक्षरों के सहित जीवन्यास करै । तिसकाल प्राण मंत्र उच्चारण करना चाहिये । उसकी विधि यही है प्रथम अमुष्या पद फिर प्राणाः अनन्तर इह प्राणाः सअमुष्याः सर्वेन्द्रियाणि वाङमनोनयन घ्राण श्रोत्रपदात् प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । इसकाही नाम प्राण मंत्र है । ज्ञानार्णव में कहा है, विपरीत प्राणमंत्र पाश पूर्वक लिखना चाहिये । इसकाही नाम प्राण प्रतिष्ठा मंत्र है । इस मंत्र के प्रभावसे संपूर्ण कर्म साधन कियेजातेहै कुमारी कल्पमें भी कहाहै, इस प्रकार भूतशुद्धि विधानकर

ओ आं ह्रीं क्रों फट् स्वाहा अनेन कायवाक्चित्तशोधनं कृत्वा रक्ष हुं फट् स्वाहा अनेन हृदि हस्तं दत्वा आत्मरक्षां विधाय स्ववामे लतां गुरुदेवतां नवयौवनगर्वितां विधाय भूतशुद्धिं प्राणायामान् कारयित्वा यथोक्तमाचरेत्। तदुक्तं तत्रैव।प्रणवः पूर्वमुच्चार्य्य विशेषासनमेव च। हुं फट् स्वाहा मनुः प्रोक्तं कायवाक् चित्तशोधने। रक्ष हुं फट् ततः स्वाहा मन्त्रः स्यादात्मरक्षणे ॥ ततः षोड़शवर्षीयां नारीमानीय मन्त्रवित्। युवतीं वा मदोन्मत्तां सुवेशां चारुहासिनीम्। सदा कामाभिलषितां सिन्दूराङ्कितभालिकाम्। साधके प्रेमसम्पन्नां वामे संस्थापयेत् बुधः ॥ तस्याश्च भूतशुद्धयादीन् कृत्वा तु मातृकां न्यसेत्। प्राणायामं मातृकाञ्च कारयित्वा यथाविधि ॥

अथ ऋष्यादिन्यासं कुर्य्यात्। यथा—कृताञ्जलिः भैरव ऋषिरनुष्टुप्छन्दः श्रीदक्षिणकालिका देवता ह्रीं वीजं हुं शक्तिः क्रीं कीलकं रक्षार्थकाममोक्षपुरुषार्थचतुष्टयसिद्धिपूर्वकदिव्यज्ञानद्रुतकवित्व पाण्डित्यासिद्धये विनियोगः। इत्यभिलष्य पुष्पेण अनामिकया वा

के देवी के रूपीको चिन्ता करै। और आँ ह्रीं इत्यादि मंत्रमें काय वाक्य और चित्त शोधन करके रक्ष हुं इत्यादि मंत्रसे हृदय में हस्तदान पूर्वक आत्म रक्षा करै फिर अपने वाम में नवयौवनगर्विता गुरु देवता विधान करके भूतशुद्धि और प्राणायाम के पीछे यथोक्त आचरण करै उसमें ही यह कहा है। यथा— प्रणव उच्चारण करके फिर हुं फट् स्वाहा उच्चारण करै, यही काय वाक् और चित्त शोधन मंत्र है। अनन्तर रक्ष हुं फट् इत्यादि मंत्र से आत्मरक्षा करै। तदनन्तर मंत्रवित् साधक षोडशवर्षीय सुवेश, सुहासिनी सर्वदा कामाभिलाषिनी, सिंदूरचर्चित मस्तक, युक्त साधक के प्रतिप्रेमभावयुक्त, मदोन्मत्त युवती रमणी लाकर वाम में संस्थापन और उसकी भूत शुद्धि आदिक क्रिया सम्पादन पूर्वक मातृका न्यास करै और यथा विधि प्राणायाम एवं मातृका और निष्पादन पूर्वक ऋष्यादि न्यास में प्रवृत्त होवे। यथा—कृतांजलि होकर इस प्रकार कहै, भैरव ऋषि, अनुष्टुप छंद, दक्षिणा कालिका देवता, इत्यादि।

न्यसेत् । यथा—शिरसि भैरवऋषये नमः मुखे अनुष्टुपछन्दसे नमः हृदि श्रीदक्षिणकालिकायै नमः गुह्ये ह्रीं वीजाय नमः पादयोः हुं शक्तये नमः सर्वाङ्गे क्रीं कालिकाय नमः । तदुक्तम्—

भैरवोऽस्य ऋषिः प्रोक्तः उष्णिकछन्द उदाहृतम् । देवता कालिका प्रोक्ता लज्जावीजन्तु कीलकम् ॥ शक्तिस्तु कूर्चवीजं स्यादनिरुद्ध-सरस्वती । कवित्वार्थे विनियोगः एवमृष्यादिकल्पना ॥

कवित्वार्थे विनियोगः इत्युपलक्षणम् । यद्यस्याभिलषितं तदर्थे विनियोग इत्यर्थः । तन्त्रे विविधश्रवणात् । तदुक्तं कालीक्रमे—

कीलकं चाद्यवीजन्तु चतुर्वर्गार्थसिद्धये ।

कुलचूड़ामणौ—

भैरवोऽस्य ऋषिः प्रोक्त उष्णिक्छन्द उदीरितम् ॥ दक्षिणा-कालिका देवी चतुर्वर्गफलप्रदा ।

अथ तन्त्रान्तर—

ऋषिं न्यसेन्मूर्ध्नि देशे छन्दस्तु मुखपङ्कजे ॥ देवतां हृदये चैव वीजन्तु गुह्यदेशके । शक्तिस्तु पादयोश्चैव सर्वाङ्गे कीलकं न्यसेत् ॥

गौतमीये—ऋषिश्छन्दोऽपरिज्ञानान्न मन्त्रः फलभाग् भवेत् ।
नैर्वीर्य्यं याति मन्त्राणां विनियोग अजानताम् ॥

अथ कराङ्गन्यासौ । ओं ह्रां अंगुष्ठाभ्यां नमः इत्यंगुष्ठयोः । ओं ह्रीं तर्जनीभ्यां स्वाहा इति तर्जन्योः । ओं ह्रूं मध्यमाभ्यां वषट् इति मध्यमयोः ओं ह्रैं अनामिकाभ्यां हुं इति अनामिकयोः । ओं ह्रौं

तंत्रान्तर में कहा है, मस्तक में ऋषिन्यास करे। मुख पद्म में छंद हृदय में देवता, गुह्य देश में बीज, दोनों पैरों में शक्ति और सर्वाङ्ग में कीलक विन्यस्त करै । गौतमीय में कहा है, ऋषि और छंद न जानने से मंत्र फलदायक नहीं होता और उसका विनियोग भी निर्वीर्य होता है ।

अब कराङ्गन्यास लिखते हैं। "ओं ह्रीं अंगुष्ठाभ्यां नमः" इत्यादि । इस वाही नाम करन्यास है । अथवा सर्वत्र नमस्कार के अन्त में करन्यास करै । अनन्तर 'ओं

कनिष्ठाभ्यां वौषट् इति कानिष्ठयोः । ओं ह्रः करतलपृष्ठाभ्यां नमः इति करतलपृष्ठयोःइति करन्यासःअथवा सर्वत्र नमस्कारान्तेन करन्यास ततः ओं ह्रां हृदयाय नमः इति हृदि तर्जनीमध्यमानामिकाभिर्न्यसेत् । ओं ह्रीं शिरसे स्वाहा इति शिरसि तर्जनीमध्यमाभ्याम् । ओं हूं सिखायै वषट् इति शिखायां मुष्टिकृताधोमुखांगुष्ठेन । ओं ह्रैं कवचाय हुं इति कवचे हस्तद्वयांगुलीभिः ओं ह्रौं नेत्रत्रयाय वौषट् इति नेत्रत्रये तर्जनीमध्यमानाभिकाभिः । ओं ह्रः करतलपृष्ठाभ्यां फट् इति करतलपृष्ठयोः । ततः ओं ह्रः अस्त्राय फट् इत्यने । तर्जनीमध्यमाभ्यां मूर्ध्नि ऊर्ध्वोर्ध्वं तालत्रयं दत्वा छोटिकाभिर्दशदिग्वन्धनं कुर्य्यात् ॥

तदुक्तं कालीतन्त्रे—

अङ्गन्यासकरन्यासौ यथावदाभिधीयते । षद्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत् ॥ हृदयाय नमः प्रोक्तं शिरसे वह्निवल्लभा । शिखायां वषडित्युक्तवं कवचाय हुमीरितम् ॥ नेत्रत्रयाय वौषट् स्यादस्त्राय फट् प्रकीर्त्तितम् । वीजं मंत्राद्यवींज न तु पारिभाषिकम् ॥ तन्त्रान्तरे स्मरणात् ।

ह्रां हृदयायनमः" यह कहकर हृदय में तर्जनी, मध्यमा और अनामिका द्वारा न्यासकरै । ओं ह्रीं इत्यादि कहकर तर्जनी और मध्यमा द्वारा मस्तक में न्यास करै । ओं ह्रीं इत्यादि कहकर मुष्टिकृत अधो मुख अंगुष्ठ में शिखान्यस्त करै । 'ओं ह्रैं' इत्यादि कहकर दोनों हाथों की सब अंगुलियों से कवच में न्यास करै । 'ओं ह्रौं' इत्यादि कहकर तर्जनी, मध्यमा और अनामिका द्वार नेत्र में तीन न्यास करै । 'ओं ह्रः' इत्यादि कहकर करतल पृष्ठ में न्यास करै "ओं ह्रः अस्त्राय फट्" इत्यादि कहकर तर्जनी और मध्यमा द्वारा मस्तक में ऊर्द्धोर्द्ध तीन ताल प्रदान करके कन अंगुली से दशदिक् बंधन करै । काली तंत्र में कहा है, यथा अंगन्यास और करन्यास यथावत् कथित होते हैं । प्रणवादिछै दीर्घ स्वराँत वीज द्वारा यथा क्रम से "हृदयानमः शिरसे स्वाहा" इत्यादि प्रयोग करै

स्वतंत्रेऽपि—

प्रणवं चाद्यवीजञ्च षड्दीर्घस्वरभाषितम्। कुर्य्यात् षडङ्गविन्यासं मूलखण्डत्रयेण वा ॥

अथ प्रकारः। आद्यसप्तवीजेन हृदयम्। द्वितीय खण्डषडक्षरेण शीर्षम्। तृतीयखण्डनवाक्षरेण शिखायाम्। पुनराद्येन कवचम्। द्वितीयेन नेत्रत्रयम्। तृतीयखन्डेनास्त्रम्। इत्थं वा अङ्गन्यासं कुर्य्यात्।

भैरवतंत्रेऽपि—

षडङ्गानि न्यसेन्मन्त्री त्रिः सकृद्वा यथाक्रमम् ॥

अथ वर्णन्यासं कुर्य्यात्। अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं नमो हृदि एं ऐं ओं औं अं अः कं खं गं घं नमो दक्षभुजे। ङं चं छं जं झं ञं। टं ठं डं ढं नमो वामभुजे। णं तं थं दं धं नं पं फं बं भं नमो दक्षजङ्घायाम्। मं यं रं लं वं शं षं सं हं क्षं नमो वामजङ्घायां न्यसेत्। तदुक्तं काली तंत्रे—

एवं यथाविधि कृत्वा वर्णन्यासं समाचरेत। अ आ इ ई उ ऊ ऋ ॠ लृ ॡ वै हृदये न्यसेत् ॥ ए ऐ ओ औ ततः अं अः क ख ग घ पुनस्ततः। न्यस्त्वा च दक्षिणभुजं स्पृशेत् साधकसत्तमः ॥ ङ च छ ज झ ञ ट ठ ड ढ तथा पुनः।

इति वामभुजेन्यस्य ण त थ द पुनः स्मरेत्। ध न प फ ब भ दक्षिणे जङ्घके न्यसेत्। म य र ल व श ष स ह क्ष वाम जङ्घके। तथैतल्लिखितवर्णास्वरसात् विन्दुरहितवर्णन्यासः। विरूपाक्षमते तु सविन्दुरेव न्यासप्रमाणम्। तदुक्तं कवचे लिखिष्यामः।

स्वतंत्र में भी कहा है, प्रणव और दीर्घ स्वर भाषित आद्य वीज षट्क और मूल बीज के तीन खंड द्वारा षडङ्ग विन्यास करै। आद्य सप्तवीज द्वारा हृदय, द्वितीय खण्ड षडक्षर द्वारा मस्तक, तृतीय खण्ड नवाक्षर द्वारा शिखा इत्यादि क्रम से अंगन्यास करै।

ऋषिर्ब्रह्मा भवेच्छन्दोगायत्री मातृका पुनः। देवता व्यंञ्जनं वीजं-शक्तयस्तु स्वरास्ततः॥ अव्यक्तं कीलकं ज्ञेयं न्यास उक्तः क्रमेण तु।

उक्त इति पूर्वोक्तऋष्यादिक्रमवत्। क्रमेण न्यस्येदित्यर्थः। षडङ्गं मातृकायाश्च साधकःकारयेत्ततः।

स्वराणां क्लीवहीनानां ऋ ॠ ऌ ॡ रहितानामित्यर्थ। एवं विधिना मातृका षडङ्गं कृत्वा ध्यायेत् यथा–

शरत् पूर्णेन्दुशुभ्रां सकलगुणमयीं नलिरक्तत्रिनेत्रां शुक्लालङ्कारभूषां शशिमुकुटजटाटोपयुक्तां प्रसन्नाम्। पुस्तीस्रक्पूर्णकुम्भान्। वरमपि दधतीं शुक्लपट्टाम्बराढयां वाग्देवीं पद्मवक्त्रां कुचभरनमिताम् चिन्तयेत् साधकेन्द्रः॥

एवं ध्यात्वा ललाटादिक्रमेण अकारादिक्षकारान्तं क्रमेण न्यसेत्। यथा श्रीक्रमे–

ब्रह्मरन्ध्रे तथा वक्त्रे वेष्टने नयनद्वये। श्रतिनासापुटद्वन्द्व गण्डोष्ठद्वयकेऽपिच॥ दन्तयुग्मे च मूर्द्धास्ये षड्र्णान् षोड़श न्यसेत्। दोःपत्सन्धिषु साग्रेषु पार्श्वयुग्मे न्यसेत् पुनः॥ पृष्ठनाभिद्वये चैव जठरे

अनन्तर वर्णन न्यास करै। यथा–अं आं इत्योबि ब्रह्मऋषि गायत्री छंद, मातृका देवता, व्यंजन वर्णवीज, समस्त स्वरशक्ति, अव्यक्त कीलक क्रमानुसार न्यास करै। अनन्तर साधक मातृका देवी का षडङ्गन्यास करै और विधि, विधान से मातृका का षडङ्गन्यास करके ध्यान करै यथा—शरत्काल के पूर्ण चन्द्रमा की समान शुभ्रवर्णा, नाना विध गुणयुक्त चंचल और लोहितवर्ण तीननेत्र युक्त श्वेत वर्ण के भूषणों से भूषित, पुस्तक, माल्य (माला) और पूर्ण कुंभ धारिणी, श्वेतवर्ण, पट्टवस्त्र में मण्डित देह, पद्मकी समान वदन मण्डल युक्त और कुचभरे। नमित देह वाग देवताकी चिन्ता करै। इस प्रकार से ध्यान करके, ललाटादिक्रमसे यथाक्रम अकार से क्षकार पर्यन्त न्यास करना चाहिये। यथा—श्रीक्रममें कहा है, ब्रह्मरन्ध, वदन, वेष्टन, दो नेत्र, दो श्रवण, दो नासापुट, गण्ड और दो ओष्ठ दन्त युग्म और मस्तक, इन सबमें सोलह स्वर विन्यास करै। बाहु और पद संधि, दोनों पार्श्व, पृष्ठ और नाभि, जठर

विन्यसेदथ । त्वगसृङ्मांसमेदोऽस्थि मज्जशुक्राणि धातवः । प्राण-जीवौ च परमौ यकारादिषु संस्थिताः । एवं क्रमेण देवेशि न्यस्तव्या एतदात्मिकाः ॥ हृदोर्मूलेऽपि विन्यस्य तथापरगले न्यसेत् । करमूले हृदारभ्य पाणिपादयुगे तथा ॥ जठराननयोर्व्याप्तिं न्यसेदित्यर्ण रूपिणीम् ॥ एवं ज्ञानार्णवे । अन्यच्च ललाटमुखवृत्ताक्षीत्यादि ।

अथ प्रयोगः- अंनमो ब्रह्मरंध्रे ललाटे वा आं नमो मुखवृत्ते एवं क्रमेण मकारपर्यन्तं विन्यस्य । यं त्वगात्मनेनमः । रं असृगात्मने नमः । लं मांसात्मने नमः । रं मेद आत्मने नमः । वामांशे ककुदि वा शं असृग्रात्माने नमः । षं मज्जात्मने नमः । सं शुक्रात्मने नम । हं प्राणात्मने नमः । लं जीवात्मने नमः । चं परमात्मने नमः इति विशेषः ॥

पंचाशदक्षरन्यासः क्रमेणैव प्रकाशितः । ओमाद्यन्तो नमोऽन्तश्च-सविन्दुर्विंदुवार्जितः । मायालक्ष्मीवीजपूर्वो न्यस्तव्य उच्यते बुधैः॥ लला-टेऽनामिकामध्ये विन्यसेन्मुखवृत्तके । तर्जनीमध्यमानामा वृद्धानामा च नेत्रयोः । अंगुष्ठं कर्णयोर्न्यस्य कनिष्ठांगुष्ठकौनसोः । मध्यास्तिस्रो

इन सबमें न्यास करै । त्वक, अस्थि, मांस, मेद, शोणित, मज्जा, शुक्र, सब धातु प्राण जीव, यह यकारादि में प्रतिष्ठित हैं । हे देवि ! ! उल्लिखित क्रमानुसार वह २ समस्त वर्ण उस उस पदार्थ में न्यस्त (संयुक्त) करै । हृदय मूलमें विन्यास करके फिर अपर गलमें विन्यास करना चाहिये । अनन्तर हृदयसे आरंभ करके कर मूल पाणि पाद युग (हाथपैर) एवं जठर और आनन में वर्णरूपिणी व्याप्ति (व्यासहोने वाली) न्यस्त करै ।

अब प्रयोग वर्णित होता है ।-यथा ओ नमो ब्रह्मरन्ध्र इत्यादि क्रम से मकार पर्य-न्त विन्यस्त करके येत्वगात्मा को नमस्कार रं, अमृतात्मा को नमस्कार लं मासात्मा को नमस्कार, 'रं' मेद आत्मा को नमस्कार बामस्कन्ध वा कुकुद (कंधे) में शं असृ-गात्मा को नमस्कार षं मज्जात्मा को नमस्कार से शुक्रात्मा को नमस्कार हं प्राणात्मा को नमस्कार, लं जीवात्मा को नमस्कार, चं परमात्मा को नमस्कार, इत्यादि विधान में न्यास कार्य समायन करै । क्रमानुसार यह पञ्चाशदक्षर न्यास प्रकाशित हुआ । इस के आदि अंत में ओ३म्, अन्त में नमः शब्द और विंदु प्रयोग करना, चाहिये । अथवा विंदु न देने पर भी चलता है पण्डितगण कहते हैं, प्रथम माया और लक्ष्मी

मामोष्ठयोर्न्यसेत् ॥ अनामां दन्तयोर्न्यस्य मध्यमामुत्तमांगके । मुखे-ऽनामां मध्यमां च हस्तेपादे च पार्श्वयोः ॥ कनिष्ठानामिका मध्यास्ता-स्तु पृष्ठे प्रविन्यसेत् । ताः सांगुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत्। हृदये च तलं सर्वमंसयोश्च ककुत्स्थले । हृत्पूर्वं हस्तपत्कुक्षिमुखेषु-तलमेवहि ॥ एतास्तु मातृकामुद्राः क्रमेण परिकीर्त्तिताः । अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः—

अथ श्रीकण्ठन्यासो यथा—

विन्यसेन्मातृकास्थाने श्रीकण्ठादीन् यथाक्रमम् । पूर्णोदर्य्यादिभिः सार्द्धं मातृकार्णसमन्वितान्॥ श्रीकंठोऽनन्तसूक्ष्मौ च त्रिमूर्तिरमरेश्वरः। अर्घीशो भारभूतिश्चातिथीशः स्थाणुको हरः ॥ झिण्टीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः । अक्रूरश्चमहासेनः षोड़शेस्वरमूर्त्तयः ॥ पश्चात् क्रोधीशचण्डेशपञ्चान्तकशिवोत्तमाः । अथैकरुद्रकूर्मैकनेत्राद्ध चतुराननाः ॥ अजेशः सर्वसोमेशस्तथा लांगलिदारुकौ । अर्द्धनारी-श्वरश्चोमाकान्तश्चाषाढिदंडिनौ ॥ स्युरत्रिमीनमेषाख्या लोहितश्च

बीज न्यस्त करना चाहिये। ललाट, अनामिका और मुख मण्डल में यथा क्रमसे तर्जनी, मध्यमा और अनाभिका, दोनों नेत्रों में वृद्धा, दोनों कर्णों में अँगुष्ठ नासिका के दोनों छिद्रों में कनिष्ठा और अंगुष्ठ, दोनों गंड में मध्यत्रय (तीनों के बीच में) दोनों ओष्ठ में मध्यमा, दोनों दंत पंक्ति में अनामा, उत्तमाँग में मध्यमा, मुख में अनामा, हस्त में मध्यमा, पाद और दोनों पार्श्व में कनिष्ठा और अनाभिका, और पृष्ठ में तत्तत अंगुली न्यस्त करके नाभि में उसके सहित अंगुष्ठ और कुक्षि में वह सब विन्यस्त करे। अनन्तर हृदय में दोनों अंश में, ककुत् [कंधा] प्रदेश में हस्त, पद कुक्षि और मुख में वह सब विन्यस्त करै। यह सम्पूर्ण मातृका मुद्रा यथाक्रम से कही गई। इन को न जानकर विन्यास करने से वह न्यास सर्वदा निष्फल होता है।

अब श्री कंठन्यास कहते हैं। यथा मातृका स्थान में पूर्णोदरी प्रकृति के सहित मातृका वर्ण युक्त श्रीकंठादि यथाक्रमसे न्यस्त करै। श्रीकंठ अनंत, सूक्ष्म, त्रिमूर्त्ति अमरेश्वर, अर्घीश, भारभूति, अतिथीश, स्थाणुक, हर, झिंटीश, भौतिक, सद्योजात, अनुग्रहेश्वर, अक्रूर, महासील और महादेव, यह सोलह स्वर की मूर्त्ति हैं। इन कोही श्री कंठादि कहते हैं।

और क्रोधीश, चण्डेश, पंचात्मक, शिवोत्तम एकरुद्र, कूर्म, एकनेत्र, अर्द्ध चतुरानन, अजेश, सर्वसोमेश, लांगल, दारक, अर्द्धनारीश्वर, उमाकांत आषाढ़ी, दंती, अत्रि,

शिखी तथा । छगलांडद्विरंडेशौ समहाकालवालिनौ । भुजङ्गेश पिनाकीश खड्गेशाख्यावकेश्वरः ॥ श्वेतभृग्वीशनकुलि शिवाः संवर्त्तकः स्मृतः ॥ एते रुद्राः स्मृता रक्ताधृतशूलकपालकाः । पूर्णोदरी स्याद्विजया शाल्मली तदनन्तरम् ॥ लोलाक्षी वर्तुलाक्षी च दीर्घघोणा समीरिता । सुदीर्घमुखी गोमुख्यौ दीर्घजंघा तथैवच ॥ कुम्भोदर्य्यूर्द्ध्वकेशी च तथा विकृतमुख्यपि । ज्वालामुखी ततो ज्ञेया पश्चादुल्कामुखी तथा ॥ चुल्लीमुखी विद्यामुखी चैताः षोड़श शक्तयः । महाकालीसरस्वत्यौ सर्वसिद्धिसमन्विते ॥ गौरी त्रैलोक्यविद्याच मन्त्रशक्तिस्ततः परम् । आत्मशक्तिर्भूतमाता तथा लम्बोदरी मता ॥ द्राविणी नागरी भूयः खेचरी चैव मंजरी । रूपिणी वीरणी पश्चात् काकोदर्य्यपि पूतना ॥ स्याद्भद्रकाली योगिन्यौ शंखिनी गर्जिनी तथा । सकालरात्रिकुब्जिन्यौ कपर्दिन्यपि वज्रिणी ॥ जया च सुमुखी प्रोक्ता रेवती माधवी तथा । वारुणी वायवी प्रोक्ता पश्चाद्रक्षोविदारिणी ॥ ततश्च सहजालक्ष्मीर्व्यापिनी माययान्विता । एतारुद्राङ्कपीठस्थाः सिन्दूरारुणविग्रहाः । रक्तोत्पलकपालाढ्या अलंकृतकराम्बुजाः ॥

अथ प्रयोगः यथा—अं श्रीकण्ठ पूर्णोदरीभ्यां नमः इति ललाटे । आं अनन्तवीजाभ्यां नमः इति मुखवृत्ते । एवं क्रमेण सर्वं कुर्य्यात् ।

मीन, मेष, लोहित, शिखी, छगलाण्ड, द्विरण्डश, महाकालवाली, भुजंगेश, पिनाकीश खड्गेश, वकेश्वर, श्वेतभृग्वीश, नकुली, शिव, संवर्त्तक, इन को रुद्र कहते हैं। यह सब रक्तवर्ण और सभी शूल एवं कपालधारी है। और पूर्णोदरी, विजया, शाल्मली लोलाक्षी, वर्त्तुलाक्षी, दीर्घघोणा, दीर्घमुखी, गोमुखी, दीर्घजंघा, कुम्भोदरी, ऊर्द्ध्वकेशी, विकृतमुखी, ज्वालामुखी, उल्कामुखी चुल्लीमुखी, विद्यामुखी, यह सोलह शक्ति हैं। महाकाली, सरस्वती, गौरी, त्रैलोक्यविद्या, मंत्रशक्ति, आत्मशक्ति, भूतमाता, लम्बोदरी, द्राविणी, नागरी, खेचरी, मञ्जरी, रूपिणी, कारिणी, काकोदरी, पूतना, भद्रकाली, योगिनी, शंखिनी, गर्जिनी, कालरात्रि, कूजिनी, कपर्द्दिनी, वज्रिणी, जया, सुमुखेश्वरी, रेवती, माधवी, वारुणी, वायवी, रक्षोविदारिणी, सहजा लक्ष्मी और माया, यह रुद्रगणों की अंक पीठस्थ और सभी सिंदूर की समान लोहित शरीर सभी रक्तोत्पल और कपालहस्ता और समस्त ही अलंकृत कराम्बुज हैं। इन का प्रयोग। यथा—ओं श्री कण्ठपूर्णोदरी दोनों को नमस्कार है। यह कहकर ललाट में न्यास करै। इत्यादि।

अथ षोढ़ान्यासः। तदुक्तं वीरतन्त्रे—

केवलां मातृकां कृत्वा मातृकां तारसंपुटाम्। मातृकापुटितं तारं न्यसेत् साधकसत्तमः॥

ओं अं ओं एवं तथैव मातृकापुटितं एवं कामपुटितं तत् पुटितं कामम्। शक्तिपुटितं तत्पुटितां शक्तिम्। लज्जापुटितं तत्पुटितां लज्जाम्। मन्त्रपुटिताम् तत्पुटितं मन्त्रम्। पुनरनुलोमाविलोमतः केवलमन्त्रं मातृकास्थाने न्यस्य अष्टोत्तरशतेन व्यापकं कुर्य्यात्।

इति गुप्तेन दुर्गाया अङ्गषोढ़ा प्रकीर्त्तिता। तारायाः कालिकायाश्च तन्मुख्याश्च तथापि वा॥ कृतेऽस्मिन्न्यासवर्य्ये तु सर्वं पापं प्रणश्यति। विषापमृत्युहरणं ग्रहरोगादिनाशनम्॥ दुष्टसत्वा विनश्यन्ति शत्रवोयान्ति मित्रताम्। कविता लहरी तस्य द्राक्षारसपरम्परा॥ अणिमाद्यष्टसिद्धिस्तु तस्य हस्ते व्यवस्थिता। कायिकं वाचिकं वापि मानसञ्चापि दुष्कृतम्॥ सर्वं तस्य विनाशत्वं याति न्यासस्य चिन्तनात्। पुरस्कृत्य चयं याति यत्किञ्चिदुपपातकम्। यद्रूपं दृश्यते योहि स तद्रूपञ्च गच्छति॥ यं नमान्ति महेशानि! षोढा पुटितविग्रहाः। अल्पायुः स भवेत् सद्यो देवता कम्पते भिया॥

अब सोढ़ान्यास कथित होता है। वीरतंत्र में कहा है, केवल मातृका विधान पूर्वक प्रणव पुटित मातृका और मातृका पुटित प्रणव विन्यस्त करै। यथा 'ओं अं ओं' इस प्रकार मातृकापुटित और कामपुटित एवं तत्पुटित काम इत्यादि। पुनर्वार अनुलोम और विलोम क्रम से मातृका स्थान में केवल मंत्रन्यास करके अष्टोत्तर शत द्वारा व्यापक विधान करै। इसका ही नाम दुर्गा और कालिका का अंगषोढा है। इस षोढा विधान करने से सम्पूर्ण पाप नष्ट होते हैं। विष और अपमृत्यु दूर होती है, गृहरोगादि दूर होते हैं, दुष्ट सत्व विनाशित होते हैं, शत्रुओं में मित्रता होती है मुखसे द्राक्षारसधारा की समान रसमयी कविता लहरी निर्गत होती है, अणिमादिक आठ सिद्धि हस्तगत होती हैं, कायिक, वाचिक और मानसिक पाप सम्पूर्ण इस न्यास के चिंतामात्र से ही तत्काल दूर होते हैं, और जो कुछ उपपातक हैं, वह भी इसी प्रकार नष्टहोते हैं, हे महेशानि! षोढा पुटित विग्रह व्यक्ति गण जिसको नमस्कार करते हैं, वह व्यक्ति शीघ्र अल्पायु होता है और देवतागण भी उसके भयसे कम्पित होते हैं।

अथ तत्वन्यासः । मूलविद्या स्वतन्त्रे—

आत्मविद्या शिवैस्तत्वैस्तत्वन्यासं समाचरेत् ॥

अथ जीवन्यासं कुर्य्यात् । यथा कुमारीतन्त्रे—

ब्रह्मरन्ध्रे भ्रुवोर्मध्ये ललाटे नाभिदेशके । गुह्ये वक्त्रे तु सर्वांगे सप्तबीजान् क्रमान् न्यसेत् ॥

अथ प्रयोगः- आद्यबीजमुच्चार्य नमो ब्रह्मरन्ध्रे एवं द्वितीयबीजं भ्रुवि । तृतीयं भाले चतुर्थं नाभौ पंचमं गुह्ये षष्ठं वक्त्रे । सप्तमं सर्वांगे न्यसेत् । ततः प्रणवपुटितमूलेन व्यापकन्यासं कुर्य्यात् नवधा सप्तधा पंचधा वा मस्तकादिपाद पर्य्यंतं पादादिमस्तकांतं न्यसेत् । तदुक्तं भैरवतन्त्रे-

पंचधा नवधा वापि मूलेन सप्तधा तथा ॥

व्यापकं कुर्य्यादित्यादि । स्वतन्त्रेऽपि—

मूलेन व्यापकं न्यासं नवधा कारयेत् प्रिये ॥

इतिमहामहोपाध्यायश्रीपरमहंसपरिव्राजकश्रीपूर्णानन्दगिरिविरचिते श्यामारहस्येन्यासांतविवरणंनामप्रथमःपरिच्छेदः ।

अब तत्वन्यास कथित होता है । स्वतन्त्र में कहा है, आत्मतत्व, विद्यातत्व; और शिवतत्व द्वारा तत्व न्यास करे । फिर जीव न्यासकरै । जैसा कि कुमारी तन्त्र में कहाहै; ब्रह्मरन्ध भ्रू, ललाट, नाभिदेश, गुह्य, वक्त्र (मुख)और सर्वांग में यथाक्रम से सप्तबीज न्यस्त करें ।

प्रयोग यथा-आद्यबीज उच्चारण करके ब्रह्मरन्ध में नमः इस प्रकार कहै फिर द्वितीय बीज भ्रू में, तृतीय बीज ललाट में, चतुर्थ बीज नाभि में, पंचम बीज गुह्य में, षष्ठ बीज वक्त्र में और सप्तम बीज सर्वांग में न्यस्त करै । फिर प्रणव पुटित मूल मन्त्र में व्यापक न्यास करके नव (९) बार, सात बार, वा पाँचवार मस्तकादि पद पर्यंत और पादादि मस्तक पर्यंत न्यास करै । भैरवतंत्र में इसी प्रकार कहा है,-यथा पाँच बार, नवबार, अथवा सातबार मूल की सहायता से व्यापक न्यास करै, इत्यादि स्वतंत्र में भी कहा है, हे प्रिये ! मूल की सहायता से नौ बार व्यापक न्यास करना चाहिये ॥

इति श्री महामहोपाध्याय श्रीपरमहंसपरिव्राजकश्रीपूर्णानंदगिरि विरचित श्यामारहस्य भाषाटीकासहित न्यासान्त विवरण नाम प्रथमपरिच्छेदः ॥ १ ॥

अथ द्वितीयः परिच्छेदः ।

अथान्तर्यजनं वक्ष्ये दृष्टादृष्टफलप्रदम् । गुरुध्यानं प्रकुर्वीत यथा पूर्वं विशालधीः ॥ स्नायाच्च विमले तीर्थे पुष्करे हृदयाश्रिते । विन्दुतीर्थेन वा स्नायात् पुनर्जन्म न विद्यते ॥

इड़ासुषुम्ने शिवतीर्थकेऽस्मिन् ज्ञानाम्बुपूर्णेऽथतत: शरीरे । ब्रह्माम्बुभिः स्नाति तयोः सदा यः किं तस्य गाङ्गैरपिपुष्करैर्वा । इति स्नानम् ॥

शिवशक्त्योः समायोगो यस्मिन् काले प्रजायते । सा सन्ध्या कुलनिष्ठानां समाधिस्थैः प्रतीयते ॥ इति सन्ध्योपासनम् ॥

अथ मूलधारात् कुलकुण्डलीं सोमसूर्य्याग्निरूपिणीं समुत्थाप्य परविन्दुं निर्भिद्य देहदेवतां तर्पयेत् । तदुक्तम्–

चन्द्रार्कानलसंजुष्टाकुलितं यत् परामृतम् । तेनामृतेन दिव्येन तर्पयेत्तेन देवताम् ॥ इति तर्पणम् ।

ब्रह्मरन्ध्रादधोभागे यच्चान्द्रं पात्रमुत्तमम् । कलासाधनं संपूर्य्य तर्पयेत्तेन खेचरीम् ॥ इत्यर्घ्यसाधनम् ।

जिसके द्वारा दृष्ट अदृष्ट फल प्राप्त होता है इस समय वही अन्तर्यजन कहते हैं। विशाल बुद्धि पुरुष पूर्वकी समान यथाविधानसे गुरुका ध्यान करै और हृदयाश्रित विमल पुष्कर तीर्थ में अथवा विन्दु तीर्थ में स्नान करै, तो पुनर्जन्म नहीं होता । इडा और सुषुम्ना इन दोनों को शिव तीर्थ कहते हैं। यह ज्ञानरूपी जलसे पूर्ण है। जो व्यक्ति ब्रह्म सलिलमें अर्थात् इन दोनों तीर्थ में सर्वदा स्नान करता है उसको गंगाजल अथवा पुष्करके जलमें स्नान करने की कोई आवश्यकता नहीं है । यह स्नान वर्णित हुआ । जिस समय शिव और शक्ति इन दोनों का मिलाप होता है कुलनिष्ठगणों की वही सन्ध्या है समाधि परायण होनेपर उसकी प्रतीत होसकी है । संध्योपासन वर्णित हुई ।

अनन्तर मूलाधार से सोम सूर्याग्निरूपिणी कुलकुण्डलिनी को समुत्थापित (उठाना) और परविन्दु को निर्भेद करके देह देवताका तर्पण करै। यही कहा है, यथा—जो परमामृत चन्द्र सूर्य और अग्नि से संजुष्ठ (मिलित) और आकुलित है, उसी दिव्य अमृतसे देवताका तर्पण करै । यह तर्पण वर्णित हुआ । ब्रह्मरन्ध्र के अधोभाग में, जो चंद्र संबंधीय पात्र हैं, उसको कलासाधन की सहायता से पूरण करके उसके द्वारा खेचरीका तर्पण करै। इसकाही नाम अर्घ्यसाधन है । विमल बुद्धि

आधार लिङ्गनाभौ हृदयसरसिजे तालमूले ललाटे द्वेपत्रे षोड़शारे द्विदशदशदले द्वादशार्द्धे चतुष्के। वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वरांश्च वर्णौ कोदण्डमध्ये न्यसतु विमलधीन्यासिसम्पत्तिसिद्ध्यै॥ इति मातृकार्णान् कण्ठच्छदक्रमेण ध्यायेत्।

अथ षडंगन्यासः तदुक्तं गौतमीये-

इज्यमानहृदर्थोऽयं हृदये स्याच्चिदात्मकः। क्रियते तत्परत्वेन हृन्मन्त्रेण ततः परम्॥ सर्वज्ञादिगुणोत्तुंगे संविद्रूपे परात्मनि। क्रियते विषयाहारः शिरोमन्त्रेण देशिकः॥ हृच्छिरोरूपसिद्धौ नियता भावनादृढा। क्रियते निजदेहस्य शिखामन्त्रेण देशिकः॥ मन्त्रात्मकस्य देहस्य मन्त्रवाच्येन तेजसा। सर्वतो धर्ममंत्रेण अहन्यहनि संवृतिः॥

इति अहिंसनीयवह्निलक्षणम्। यत्र क्षणे हिंस्राणां हिंसोपाया न प्रवर्त्तते इत्यर्थः।

यो ददाति परं ज्ञानं संविद्रूपे परात्मनि। हृदयादिमयं तेजः स्यादेतन्मैत्रसंज्ञितम्॥ आध्यात्मिकादिरूपं यत् साधकस्य विनाशयेत्। अविद्याशतमंत्रं तत्परं धाम समीरितम्॥

इति षडङ्गन्यासं विधाय ध्यानं कुर्य्यात्। यथा उदयाकरपद्धत्यां-

---

साधक आधार में, लिंग भि में, हृदय सरोज में, तालु मूल में ललाट में, षोड़शारमें, द्विदश दशदल में, षड़ दल पद्म, चतुर्दल में वासन्त में और बाल म एवं ड क, फ, उ, ठ, सहित कण्ठदेश में और कोदण्ड में न्यास सम्पत्ति सिद्धिके लिये ह, उ, क्ष, और संपूर्ण स्वर संयुक्त करें। इस प्रकार से कण्ठच्छद क्रमानुसार समस्त मातृका वर्गका ध्यान करे॥

अथ षडङ्गन्यास कीर्तन किया जाता है। गौतमीय में कहा है, हृदयमें जो चिदात्मक वस्तु है, वह सबकोही साधनीय है अर्थात् सबकोही उसका साधन करना चाहिये। इसी कारण तत्पर होकर हृन्मन्त्र द्वारा उसकी साधना करे। संवित् साक्षात् परमात्मा का रूप है। सर्वज्ञादि गुण परम्परा की सहायतासे उस परमात्मा ने संसार में सबकी अपेक्षा उच्चस्वरूप लाभ किया है। साधक शिरोमंत्र की सहायता से उस में उल्लिखित चिदात्मक वस्तु की साधना करते हैं इसका ही नाम अहिंसनीय वह्नि लक्षण है। इस प्रकार षडङ्गन्यास विधानपूर्वक ध्यान करना चाहिये। जैसे—

शक्तिद्वयपुटांतस्थं लक्ष्यत्रयसुसंस्थितम् । ज्योतिस्तत्त्वमय ध्यायेत् कुलाकुलनियोजनात् ॥

अथवा-शृङ्गाटद्वयमध्यस्थं शक्तिद्वयपुटीकृतम् । सदा समरसं ध्यायेत् कालं तत्कुलयोगिनाम् ॥

अन्यच्च-किरणस्थं तदग्रिस्थं चन्द्रभास्करमध्यगम् ॥ महाशून्येन यत्कृत्वा पूर्णस्तिष्ठति योगिराट् ॥

महाशून्य इति सर्वोपाधिविनिर्मुक्ते । पूर्ण इति सर्वोपाधि विनिर्मोक्षात् विभागविरहात् । पूर्ण एव भवतीति । अथवा-निरालम्बपदे शून्ये यत्तेज उपपद्यते । तद्धर्ममभ्यसेन्नित्यं ध्यानं तत्कुलयोगिनाम् ॥

तद्धर्ममिति अन्तःकरणस्थं अभ्यसेदिति वारंवारं कुर्य्यादित्यर्थः॥ इति ध्यानम् ॥

अर्चयन् विषयैःपुष्पैस्तत्क्षणात्तन्मयो भवेत् । न्यासस्तन्मयताबुद्धिः सोऽहम्भावेन पूजयेत् ॥

तन्मयेति तदेवात्मतत्त्वज्ञानम् । सोऽहमिति तत्त्वम्पदबोधनार्थं परिचिन्तनमात्रम् । विषयपुष्पाणि यथा—

अमायमनहङ्कारमरागमपदं तथा । अमोहकमदम्भञ्च तत्त्वेर्ष्याक्षोभकं तथा ॥ अमात्सर्य्यमलोभञ्च दशपुष्पंविदुर्बुधाः । अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहम् ॥ दयापुष्पं क्षमापुष्पं ज्ञानपुष्पञ्च

उदयाकर पद्धति में कहा है-कुलाकुल नियोजन सहित ज्योतिस्तत्वमय ध्यान करै। अथवा शृङ्गाटद्वितय (भाल मध्य में) मध्यस्थित और दो शक्ति पुटित समरस ध्यान करै। अन्यत्र भी कहा है, उपाधि शून्य, आलम्बन शून्य ब्रह्मपद में जो तेज उत्पन्न होता है, उसी अन्तःकरणस्थ तेज का वारम्बार ध्यान करै । यही कुल योगी गणों का ध्यान है।

भली भांति पुष्प की सहायता से पूजा करने पर तत्काल साधक तन्मय होता है। तन्मयतां बुद्धि का नाम न्यास है। सोह—भाव में पूजा करनी चाहिये। यहाँ तन्मयता शब्द में आत्मतत्व ज्ञान है। सोहं शब्द में तत्व, पद शोधनार्थ, परिचिन्तन मात्र पूजा का उपकरण, यही भावार्थ है । विषयपुष्प शब्द में अमाया, अनहङ्कार, अमोह, अमद, अमात्सर्य अलोभ, इत्यादि समझना चाहिये। इसके अतिरिक्त, अहिंसा, इन्द्रिय

चन्दनम् । इत्यष्टसत्पाभिः पुष्पैः पूजयेत् परमेश्वरीम् ॥ इति पूजनम् ।

माला पंचाशिका प्रोक्ता सूत्रं शक्तिशिवात्मकम् । ग्रथिता कुंडली शक्तिः कल्पान्ते मेरुसंस्थिता ॥

एवं विधिना वर्णमालामुपस्कृत्य सुमेरुरूपं कृत्वा अकारादिक्ष-कारान्तम् । लकारादि श्रीकंठांन्तम् मूलमंत्रं जप्त्वा परतेजसि समर्पयेत् ॥

अथ होमः—आत्मानमपरिछिन्नं विभाव्यांतरं वा परमात्म ज्ञा-नात्मस्वरूपं चतुरस्रं चित्कुण्डमानंदमेखलायुतम् अर्द्धमात्राकृतयो-निभूषितं नाभौ ध्यात्वा तन्मध्यस्थ ज्ञानाग्नौ जुहुयात्। यथा मूलांते नाभौ चैतन्यरूपाग्नौ हविषा मनसा स्रुचा ज्ञानप्रदीपिते नित्यमक्ष-सिद्धहोम्यहं स्वाहा । अनेन प्रथमाहुतिं दद्यात् ॥

मूलांते-धर्माधर्महविर्दीप्त आत्माग्नौ मनसा स्रुचा । सुषुम्ना वर्त्मना नित्यमक्षवृत्तिर्जुहोम्यहम् ॥ स्वाहा—इति द्वितीयाहुतिं दत्वा॥ मूलांते—प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनी स्रुचा । धर्माधर्मकल-स्नेहपूर्णं वह्नौ जुहोम्यंह स्वाहा । अनेन तृतीयाहुतिं दद्यात् ॥

ततो मूलान्ते—

अन्तर्निरंजर्निनिबन्धनमेधमाने मायान्धकार परिपंथिनि संवि-दग्नौ ॥ कस्मिश्चिदद्भुतमरीचि विकाशभूमौ विश्वं जुहोमि वसुधां

निग्रह, दया, क्षमा और ज्ञान, इन पाँच को भी पुष्प कहते हैं । इन सब पुष्पों में परमे-श्वरी की पूजा करनी चाहिये । इसका ही नाम पूजा है ।

पञ्चाशत (पचास) वर्ण की माला एवं शिव और शक्ति को सूत्र कहते हैं । इस प्रकार विधान से वर्णमाला उपस्कृत (बनाय) कर, आकार से क्षकार और लकार से श्रीकण्ठ पर्यन्त मूलमंत्र जप पूर्वक परम तेज में समर्पण करै ।

अनन्तर होम करना चाहिये । यथा—आत्माको अपरिच्छिन्न विचार अथवा जो परमात्मा स्वरूप हैं, जो आनन्दरूप मेखला युक्त और अर्द्धमात्रा कृत योनि मण्डित है। उसी चतुरस्र चित्कुण्डका नाभि में ध्यान करके तिसके मध्यस्थित ज्ञानरूप अग्नि में आहुति प्रदान करै यथा—मूलान्ते इत्यादि कहकर प्रथम आहुति दे। अनन्तर मूलान्त में धर्म और अधर्मरूप हवि द्वारा प्रज्वलित अग्निमें मनरूप स्रु च (प्रीति) द्वारा सुषुम्ना वर्त्मयोगमें आहुति देताहूं यह कह स्वाहा उच्चारणकर दूसरी आहुति प्रदान करै । अनन्तर मूलांतमें प्रकाशाकाश कहकर तीसरी आहुति प्रदानपूर्वक पुन-र्वार मूलमंत्र उच्चारण करके अन्तर्निरञ्जन इत्यादि कहकर अन्तर्यजन करै तो

दिशि वावसानम् ॥ इत्यंतर्यजनं कृत्वा साक्षाद् ब्रह्ममयो भवेत् । न तस्य पापपुन्यानि जीवन्मुक्तो भवेत् ध्रुवम् ॥

इतिमहामहोपाध्यायश्रीपरमहंसपरिव्राजकश्रीपूर्णानंदगिरिविरचिते श्यामारहस्येन्यासांतअंतर्यजनं नामद्वितीयः परिच्छेदः ।

अथ तृतीयः परिच्छेदः ।

अथ साधकः कुलवेशं कृत्वा कुलवेशंच कारयित्वा पीठ न्यासं कुर्य्यात् ॥

तदुक्तं कुमारीतन्त्रे -

ततः स्त्रीवेशधारी स्यात् सिंदूराङ्कितभालकः । शृंगारोज्ज्वलवेशाढ्यस्ताम्बूलपूरिताननः । एवं वेशादिकं कृत्वा वनितामपि कारयेत् । पीठन्यासं ततः पश्चादाधारशक्तिपूर्वकम् ॥ प्रकृतिं कमठं चैव शेषं पृथ्वीं तथैव च । सुधाम्बुधिं मणिद्वीपं चिंतामणिगृहं तथा ॥ श्मशानं पारिजातञ्च तन्मूले रत्नवेदिकाम् । तस्योपरि मणेः पीठं न्यसेत् साधकसत्तमः ॥ चतुर्दिक्षु मुनीन् देवान् शिवांश्चशवमुंडकान् । धर्मांश्चैवाप्यधर्मांश्च पादगात्र चतुष्टये ॥

पादगात्र चतुष्टयंतु—दक्षांस—वमुख-दक्षजङ्घा—दक्षपार्श्वादिकम् ॥

साधक साक्षात् ब्रह्ममय होता है। पाप पुण्य कुछ नहीं रहता और जीवन्मुक्ति लाभ करसक्ता है।

इति श्री महामहोपाध्याय श्रीपरमहंसपरिव्राजक श्रीपूर्णानंदगिरी विरचित श्यामारहस्य श्रीपण्डितहरिशंकरकृत भाषाटीका सहित अन्तर्यजन नामक द्वितीय परिच्छेदः ॥ २ ॥

अनन्तर साधक स्वयं कुल वेश करके और कराकर पीठन्यास करे । कुमारी तंत्र में कहा है । यथा-अनन्तर स्त्री वेश धारण करके भालदेश (मस्तक में सिंदूर लगाना चाहिये और शृंगार योग्य उज्ज्वल वेश धारण पूर्वक ताम्बूल द्वारा मुख पूर्ण करे । स्वयं इस प्रकार वेशादि करके स्त्री को भी इसी प्रकार वेश पहिरावे। अनंतर आधार शक्ति पूर्वक पीठन्यास करे । प्रकृति, कमठ, शेष, पृथ्वी सुधाम्बुधि मणिद्वीप चिन्तामणि, गृह, श्मशान पारिजात, इसके मूल में एक वेदिका और उसके ऊपर मणिपीठ न्यस्त करै। फिर चारों ओर में मुनिगण देवगण, शिवगण, और समस्त शवमुण्ड एवं पादगात्र चतुष्टय में धर्म और अधर्म वर्ग विन्यास करै। दक्षिण

हृदि कन्दं तथा पद्मं सूर्यं सोमं महेश्वरि। वैश्वानरं तथा सत्त्वं रजश्चैव तमस्तथा ॥ आत्मानञ्चैव विन्यस्य शक्तिं हृत्पद्मके न्यसेत्।

आत्मानमिति आत्मशब्देनात्मचतुष्टयमुच्यते। शक्तिर्यथा-

इच्छा ज्ञाना क्रिया चैव कामदा कामदायिनी। रतीरतिप्रियानंदा तथैव च मनोन्मनी ॥ वाग्भवं प्रथमं चाक्त्वा परायै तदनंतरम्। अपरायै द्विरूपायै हेमौ वाच्यावतःपरम् ॥ सदाशिव महा तं पद्मासनं तथा। नम इत्येव मंत्रोऽयं पीठन्यास उदाहृतः। एवं पीठे देहमये चिंतयेदिष्टदेवताम्।

अथादौ कामकलारूपमात्मानं विभाव्य मूलाधारात् कुंडलिनीं परमशिवांतं ध्यात्वा चंद्रामृतेन संप्लाव्य करकच्छपिकया पुष्पं गृहीत्वा सुषुम्नया आवाह्य हृदयाष्टदलरक्त पद्ममध्ये ध्यायेत्। तदुक्तं स्वतंत्रे-

अतः कामकला ध्यानमावाह्य कालिकां शिवाम्। कूर्माख्यमुद्रया पुष्पैश्चक्रमध्ये निधापयेत् ॥

स्कंध, दक्षिणमुख, दक्षिण जंघा, दक्षिण पार्श्व नाभि और वामपार्श्व, इन सबका नाम पादगात्र चतुष्टय है। हे महेशानि! हृदय में कंद, पद्म, सूर्य, सोम, वैश्वानर, सत्व, रज, तम और आत्मा न्यस्त करके हृत् पद्म में शक्ति न्यास करै यहाँ आत्मशब्द में आत्म चतुष्टय समझना चाहिये। शक्ति शब्द में इच्छा, ज्ञाना क्रिया कामदा कामदायिनी, रति, रतिप्रिया,आनन्दा और मनोन्मनी जाने। प्रथम वाग्भव अर्थात् ऐं उच्चारण करके फिर परायै अपरायै द्विरूपायै ऐसा कहना चाहिये। अनन्तर सदा शिवाय महा प्रेताय पद्मासनाय नमः इस प्रकार पद प्रयोग करै।

अनन्तर आदि में कामकलारूप आत्मा की विशेष प्रकार भावना कर मूलाधार से परम शिव पर्यंत कुण्डलिनी के ध्यानान्तर चन्द्रामृत द्वारा संप्लावित और कर कच्छपिका (कछुई) द्वारा पुष्प ग्रहण पूर्वक सुषुम्ना द्वारा आवाहन करके हृदयस्थी अष्टदल रक्तपद्ममें ध्यान करना चाहिये स्वतंत्र में यही कहा है। यथा—अतएव काम कला का ध्यान करके परम मंगल रूपिणी कालिका को अवाहन पूर्वक कुसुम मुद्राकी सहायता से समस्त पुष्प निवेदन करके चक्र में सन्निधापित (स्थापित) करै।

अथ कामकला यथा।

मुखं विंदुयदाकारं तदधः कुचयुग्मकम्। सर्वविद्या मृता पूर्ण सर्ववाग्विभवप्रदम् ॥ सर्वार्थसाधकं देवि सर्वरंजन कारकम्। तदधः सपरार्द्धंच सुपरिष्कृतमण्डलम् ॥ सर्वदेवादि भूतान्तःसर्वदेवनमस्कृतम्। सर्वाह्लादसुसंपूर्णं सर्ववश्यप्रवश्यकम्। एतत् कामकलाध्यानं सुगोप्यं साधकोत्तमैः।

श्रीक्रमेऽपि—

या सा मधुमती नाम्ना मायामोहनकारिणी। बाह्याभ्यन्तरयोगेन चिन्तनीयाञ्च तां शृणु॥ त्रैलोक्यमेकरूपेण स्वात्मानमेकरूपिणम्। एकाकृतिस्वरूपेण सर्वां शान्तिं विचिन्तयेत्॥ कामयेत् कामिनीं सर्वां देवीमीश्वररूपिणीम्। चिन्तयेत् सुन्दरीं देवीं सर्वव्यापककारिणीम्। ईकारः सर्वमन्त्रः स्यादपरं स्याच्चतुष्टयम्। विन्दुत्रयस्य देवेशि! प्रथमे देवि! वक्त्रके॥ विन्दुद्वयं स्तनद्वन्द्वं हृदि स्थाने नियोजयेत्। हकारार्द्धकलां सूक्ष्मां योनिमध्ये विचिन्तयेत्॥ तथा कामकलारूपां मदनांकुरगोचरे। उद्यदादित्यसङ्काशां सिन्दूराभां स्तनद्वयं॥ विंदुं सङ्कल्प्य वक्त्रेतु स्फुरद्दीपशिखां प्रिये। आधाराद् ब्रह्मरन्ध्रान्तं तन्त्र

अब कामकला वर्णित होती है। यथा—मुख विन्दु की समान आकार युक्त उसके निम्न में कुच युगल वह सर्वविध विद्यारूपी अमृत में पूर्ण है सर्वविध वाग्विभव प्रदान और सर्वविध मनोरथ समाधान और सबका मनोरंजन करती है। उसके नीचे अपरार्द्ध सुपरिष्कृत मण्डलमें अलंकृत है। संपूर्ण देवता और भूतवर्ग इसके अन्तर्निष्ठ हैं सम्पूर्ण देवता उसको नमस्कार करते हैं वह सब प्रकार के आह्लाद में परिपूर्ण औ सबकीवशीकरण स्वरूपहै। इस प्रकारकामकलाका ध्यानकरै यह ध्यान अत्यन्तगुप्त रखना चाहिये। श्री क्रममें भी कहा है, मधुमती नामक जो माया सब को मोह उत्पन्न करती है, बाहर और भीतर उसकी जिसरूपमें चिन्ता करनी चाहिये सो श्रवण करो। एकरूप में त्रैलोक्य, एकरूप में स्त्री आत्मा और एकरूप में सर्वविध शान्ति की चिन्ता करनी चाहिये। उस ईश्वर रूपिणी देवी को यावतीय कामिनी रूपमें और सर्व व्यापक कारिणी सुंदरी रूप में ध्यान करै। प्रथम देवी के वक्र में तीन विन्दु और हृदय में दो विन्दुस्वरूप स्तनद्वन्द्व (दोनों छाती) नियोजित करके सूक्ष्म हकारार्द्ध कालयोनि में चिन्ता करै। फिर मदनांकुर गोचर में कामकला रूपकी भावना करनी चाहिये। यह कामकला उदय हुए प्रभाकर (चंद्रमा) की समान और सिंदूरवत् आभा युक्त है।

मार्गेण भावयेत् ॥ कामबिंदुरहं देवि तत्रस्थां परमेश्वरीम् । शिव-शक्तिमयींदेवी तदधःस्थात् कुचद्वयम् ॥ तदधः सपरार्द्धेच चिद्रूपां परमां । कलाम् सापि कुंडलिनी शक्तिः कामकलास्वरूपिणी ॥ सा शिखावर्त्मे गच्छन्ती भित्वा ग्रन्थिं चतुर्दश । प्रविश्य परमार्गन्तु सूक्ष्म मार्गस्वरूपिणी ॥ सापि च त्रिविधा सृष्टिर्ब्रह्मविष्णुस्वरूपिणी । सञ्चिन्त्य साधक श्रेष्ठस्त्रैलोक्यं वशमानयेत् ॥ एतत्ते कथितं देवि कामकलाविनिर्णयम् । गोप्तव्यं हि प्रयत्नेन यदि च्छेदात्मनो हितम् ॥

अथ कूर्ममुद्रा यथा । कालिकापुराणे—

वामहस्तस्य तर्जन्यां दक्षिणस्य कनिष्ठिकाम् । तथा दक्षिणतर्जन्यां वामांगुष्ठेन योजयेत् ॥ प्रोन्नतं दक्षिणांगुष्ठं वामस्य दक्षिणादिकाः । अंगुलीर्योजयेत् पृष्टे दक्षिणस्य करस्यच ॥ वामस्य पितृतीर्थेन मध्य-मानामिके तथा । अधोमुखे च ते कुर्य्यात् दक्षिणस्य करस्यच ॥ कूर्म-पृष्ठसमं कुर्य्याद्दक्षिणस्य करस्य च । एवंविधः सर्वसिद्धिं ददाति पा-णिकच्छपः । कुर्य्यात्तु नयनाग्रे तु निमील्य नयनद्वयम् । समं काय-

---

हे प्रिये ! दोनों स्तन में विन्दु कल्पना करके वदन मण्डल में आधार से ब्रह्मरन्ध्र पर्यंत तंत्र मार्गानुसार स्फूर्तिमती कीदीप शिखारूपमें चिंता करै। मैंही वह बिन्दुरूप काम हूं साक्षात् परमेश्वरी उस बिंदुमें विराजमान है। उसके अधोवर्ती दोनों कुच शिवशक्ति मय हैं उसके अधोभाग स्थित सपरार्द्ध चित्स्वरूपिणी परमा कला है। इस कांही नाम कामकला स्वरूपिणी कुण्डलिनी शक्ति है। यह चौदह ग्रंथि भेद कर शिखावर्त्ममें गमन और सूक्ष्ममार्ग रूप एवं परमार्थमें प्रवेश करतीहै। यही त्रिविधा सृष्टि और यही ब्रह्मा विष्णु स्वरूपिणी है। इसकी चिंता करने से साधक श्रेष्ठ होकर तीनों लोकों को वशीभूत कर सक्ता है। हे देवी ! मैंने तुम्हारे निकट यह कामकला का स्वरूप कीर्तन किया। अपने हित की कामना होने से इसको यत्न सहित गुप्त रखना चाहिये।

कूर्ममुद्रा यथा-कालिका पुराण में लिखा है वामहस्त की तर्जनी में दक्षिण हस्त की कनिष्ट अंगुली और दक्षिण हस्त की तर्जनी में वामहस्त का अंगुष्ठ योजना (मिलाय) करके दक्षिण हस्त के अंगुष्ठ को ऊंचा कर वामहस्त की मध्यमादि सब अंगुली दक्षिण हस्त के क्रोड़ में, न्यस्त करै। फिर वामहस्त की तर्जनी और अंगुष्ठ के मध्यभाग में दक्षिणहस्त की अनामिका और मध्यमा अधोमुख में संयोजित करके, दक्षिण हस्त का पृष्ठ देश कछुए की पीठ के समान ऊंचा करना चाहिये इसका नाम पाणिकच्छप या कूर्ममुद्रा है। इसके द्वारा सर्व प्रकार की सिद्धि संग्रहीत होती है।

शिरोग्रीवं कृत्वा स्थिरतरो बुधः । ध्यानं समारभेन्मन्त्री सर्वपाप विनाशनम् ॥

ध्यानं यथा स्वतंत्रे-

देव्या ध्यानं प्रवक्ष्यामि सर्वदेवोपसेविताम् । अञ्जनाद्रिनिभां देवीं करालवदनां शिवाम् ॥ मुण्डमालावकीर्णांसां मुक्तकेशीं स्मितानानाम् । महाकाल हृदम्भोजे स्थितां पीनपयोधराम् ॥ विपरीतरतासक्तां घोरदंष्ट्रां शिवैः सह । नागयज्ञोपवीताञ्च चन्द्रार्द्धकृतशेखराम् ॥ सर्वालङ्कारयुक्ताञ्च मुण्डमालाविभूषिताम् । मृतहस्तिसहस्रैस्तु काञ्चीबद्धां दिगम्बरीम् ॥ शिवाकोटिसहस्रैस्तु योगिनीभिर्विराजिताम् । रक्तपूर्णमुखाम्भोजां मद्यपानप्रमत्तकाम् ॥ वह्न्यर्कशशिनेत्रान्तु वह्निविन्दुयुताननाम् । विगतासुकिशोराभ्यां कृतकर्णावतंसिनीम् ॥ कण्ठावसक्तमुण्डालीं गलद्रुधिरचर्चिताम् । श्मशानवह्निमध्यस्थां ब्रह्मकेशववन्दिताम् ॥ सद्यश्छिन्नशिराः खड्गवराभीतिकराम्बुजाम् । तत्र वामोर्द्धहस्तेन कपालं तदधः शिरः ॥ दक्षिणोर्द्ध-हस्ते अभयं तदधो वरामिति ॥

दोनों नेत्र निमीलित (बंदकर) करके नासाग्र में इसका विधान करे एवं काय, शिर और ग्रीवा समभावमें रख, स्थिरतरहो ध्यानमें प्रवृत होवे। तो समस्त पाप नष्ट होतेहैं

ध्यान यथा—स्वतंत्र में कहा है, संपूर्ण देवता जिसकी सेवा करते हैं, उसी देवी का ध्यान कहता हूं । वह अंजन पर्वत सन्निभा, स्वप्रकाशयुक्त, करालवदना, परम मँगल स्वरूपिणी, मुक्तकेशी, स्मेरानना, मुण्डमाला समलँकृत गलदेश युक्त, महाकाल के हृत् पद्ममें अधिष्ठिता पीनपयोधरा, विपरीतरतासक्त, शिवगण में परिवेष्ठिता, भयँकर दँष्ट्रा सँपन्न सर्व्व यज्ञोपवीत में अलँकृता, अर्द्ध चँद्रकृत शेषर शालिनी, सर्वालङ्कार-भूषित, मुण्डमाला में अलँकृत, सहस्र मृत हस्ति के काञ्ची दाम में विमण्डित दिग्वस्त्रा, शिवा कोटि सहस्र की समभिव्याहारिणी योगिनियों में परिवारिता, रक्तपूर्ण मुखपद्म से सुशोभिता, मदपान में मत्तभावापन्न, सूर्य, सोम और अग्निरूप तीन नेत्र में विमण्डित है। उसका बदन मण्डल शोणित संसर्ग से समुज्ज्वलित हुआ है। इसने दो मृत बालकों का कर्णमूल में भूषण धारण किया है। कण्ठदेश विलम्बिनी मुण्डमाला से रुधिर राशि ने गिरकर उसका सर्वशरीर चर्चित किया है। वह श्मशानालय और अग्निमें अवस्थिति करतीहै ब्रह्मा और केशव उसकी बँदना करते हैं उसके हस्त में सद्य छिन्नमस्तक, खड्ग, वर और अभय विराजमान है तन्मध्य वामार्द्ध हस्त में कपाल और उसके अधोवर्त्ती हस्त में मस्तक एवँ दक्षिण की ओर

तदुक्तं महाकालकृतस्तवे-

ऊर्द्ध्वे वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधःसव्ये चाभीर्वरञ्च ॥ इत्यादि-

ध्यानान्तरं यथा भैरवतन्त्रे-

करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् । कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम् ॥ सद्यश्छिन्नशिरः खड्गवामाधोर्द्ध्वकराम्बुजाम् । अभयं वरदं चैव दक्षिणोर्द्ध्वधः पाणिकाम् ॥ महामेघप्रभां श्यामां तथैवच दिगम्बरीम् । कण्ठावशक्त मुण्डालीं गलद्रुधिरचर्चिताम् ॥ कर्णावतंसतानीतशवयुग्मभयानकाम् । घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम् ॥ शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम् । सृक्कद्वयगलद्रक्तधाराभिःस्फुरिताननाम् ॥ घोररूपां महारौद्रीं श्मशानालयवासिनीम् । दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम् ॥ शवरूप महादेव हृदयोपरि संस्थिताम् । शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् । महाकालेन च समं विपरीत-

---

उर्द्ध्ववर्त्ती हस्त में अभय और उसके अधोभाग में वर विराजमान है महाकालकृत स्तव में भी इसीप्रकार लिखा है यथा-वाम करतलके ऊर्द्ध में कृपाण, उसके अधोभाग में छिन्नमुण्ड, दक्षिण करमें अभय और वर इत्यादि।

ध्यानांतर यथा—भैरव तन्त्रे—दक्षिण कालिका का भजनी करै वह करालवदना, घोरा, मुक्तकेशी, चतुर्भुजा, अलौकिक स्वभाव युक्त और मुण्डमाला विभूषित हैं। उसको वाम ओर के अधः और ऊर्द्ध कर कमल में सद्य छिन्न शिर और खड्ग विराजमान है; दक्षिण हस्त के अध और ऊर्द्ध में अभय और वर शोभित है। उसकी प्रभा महामेघ की समान है। वह श्यामा और दिगम्बरी है। उसके कण्ठ में मुण्डमाला दोलायमान है। गिरती हुई रुधिर धारा में उसका कलेवर चर्चित होता है। उसके कर्ण में शव युग्मका भूषण है। उससे वह भयानक हुई है। उसके दंष्ट्रा घोर भावापन्न हैं। पयोधर पीनोन्नत हैं। शव समूह के कर समूह में उसकी काँची (कौंधनी) निर्मित हुई है। उसका वदन मण्डल सहास्य है। उसके दोनों स्रक् (गलफू) से जो रुधिर धारा गिरती है तिसके द्वारा उसका आनन प्रस्फुरित [खिला] हुआ है। वह घोर रूपा, एवं रौद्र प्रकृति और श्मशान में वास करती है। वह शवरूप महादेव के हृदयों पर अवस्थिति करती है। शिवागण भयंकर स्वरसे उसके चारों ओर चीत्कार करते हैं। वह महाकाल के सङ्ग विपरीत रत में मत्त है। वह त्रिजगत् की धात्री है

रतातुराम्। भजेत्रिजगतां धात्रीं स्मेरामनसरोरुहाम्। एवं संचिन्तयेत् कालीं धर्मकामार्थसिद्धिदाम् ॥

अथानयोरेकतरेण देवीं ध्यात्वा मानसोपचारैराराध्य पूर्ववज्जपहोमं कृत्वा नमस्कारं स्तोत्रपाठं च कुर्य्यात् ॥ यंत्र निर्माणार्थं पात्राणि यथा मुंडमालातंत्रे—

ताम्रपात्रे कपालेवा श्मशाने काष्ठनिर्मिते । शनिभौमदिने वापि शरीरे मृतसम्भवे ॥ स्वर्णरौप्ये च लौहेवा चक्रमभ्यर्च्य यत्नतः॥

स्वतन्त्रेऽपि—

इत्थं विन्यस्तदेहः सन् चक्रराजं समालिखेत् ॥ सुवर्णे रजते ताम्रे पाषाणे वाष्टधातुषु ॥ इति ॥

अथ वहिः पूजार्थं वक्ष्यमाणगन्धाष्टकलिप्ते स्वर्णादिकुण्डगोलस्वयम्भूकुसुमागुरुलिप्ते वा स्वर्णरजतताम्रशलाकया विन्दुकण्टकेन पुष्पेण वा मन्त्रमुच्चारणम्। विन्दुमायायुत त्रिकोणपंचवृत्ताष्टदलपद्मचतुरस्रं चतुर्द्वारात्मकम् यन्त्रराजं लिखेदिति सत्सम्प्रदाया वदन्ति। तथाच कालीतंत्रे-

आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत्। ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम् ॥ ततो वृत्तं समालिख्य लिखेदष्टदलं ततः। वृत्तं विलिख्य विधिवल्लिखेत् नूपुरयुग्मकम् ॥

उसका वदन सरोरुह मृदु मन्द हास्य में अलंकृत है । धर्म, कामार्थ सिद्धिदायिनी कालिका को इस रूप में चिंता करै। इन दोनों के एकतर ध्यान द्वारा देवी का ध्यान करके मानस उपचार समूह में आराधना कर पूर्व की समान जप होम सहित नमस्कार स्तोत्र पाठ करै।

यंत्र निर्माणार्थ सम्पूर्ण पात्र यथा-मुण्डमालातंत्रे-ताम्रपात्र में, कपाल में, श्मशान काष्ट निर्मित पात्र में, शनिवा मङ्गलवार में मृत व्यक्ति के देह में सुवर्ण चाँदी वा लोहे के पात्र में यत्नसहित यंत्र की अभ्यर्चना करै । स्वतन्त्र में भी कहा है इस प्रकार अंगन्यास करके सुवर्ण, रजत, ताम्र, पाषाण अथवा अष्टधातु में यंत्रराज अंकित करै।

अनन्तर वहिः (बाहिरी) पूजा के लिये निम्नलिखित अष्टविध गंध में विलिप्त प्रदेश में सुवर्ण, रजत (चाँदी) वा ताम्र निर्मित शलाका अथवा विंदुकण्टक पुष्पद्वारा मंत्रोच्चारण सहित विंदु और मायावीज युक्त त्रिकोण पञ्चवृत अष्टदल पद्म चतुरस्र और चतुर्द्वार युक्त यंत्रराज अङ्कित करै। सत् सम्प्रदाय गण इसप्रकार कहते हैं। तथा कालीतन्त्रमेंभी लिखाहै, आदिमें त्रिकोण विन्यस्तकरके उसके बाहर त्रिकोण विन्यस्त करना चाहिये। अनंतर उत्कृष्ट विधानसे तीन त्रिकोण अङ्कित करै। तदनंतर गोलाकार लिखकर अष्टदल लिखना चाहिये। विहित विधान में वृत अङ्कित कर दो नूपुर

स्वतन्त्रेऽपि—

स्वयम्भू कुसुमं कुण्डगोलोत्थं रोचनागुरु । काश्मीरमृगनाभी च शिह्लण्च चन्दनद्वयम् ॥ एष गन्धः समाख्यातः सर्वदा चण्डिका-प्रियः । एतेन गन्धयोगेन योनिचक्रं समालिखेत् । योनिद्वयं ततः कुर्य्यात् कोणषट्कं ततः प्रिये ! ततश्चाष्टदलं भूमिं चतुर्द्वारैः समन्वि-ताम् ॥ एतत्ते कथितं चक्रमत्र पुष्पाञ्जलिं किरेत् ॥

कुमारीकल्पेऽपि—

आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् । बहिस्त्रिकोणमालिख्य कोणषट्कं लिखेद्बहिः ॥ मध्ये तु बैन्दवं चक्रं बीजमायाविभूषितम् । षट्कोणात् तु बहिर्वृत्तं ततोऽष्टदलकं लिखेत् ॥ बहिर्वृत्तेन संयुक्तं नूपुरेकेण संयुतम् । ज्ञात्वैवं मुक्तिमाप्नोति यन्त्रराजं न संशयः ॥ एतत् तु विलिखेत्ताम्रे कुण्डगोलविलेपिते । स्वयम्भू कुसुमैर्युक्ते कुंकु-मागुरुसेविते ॥

ननु उक्त पञ्चदशकोणं कथमुक्तं स्वतन्त्रादि तन्त्रविरोधात् । न च वाच्यं कालीतंत्रमतमिति तत्रैव पूजायां षट्कोणपदश्रुतेः । तद्यथा ।

कालीं कपालिनीं कुल्लां कुरुकुल्लां विरोधिनीम् । विप्रचित्तान्तु संपूज्य बहिः षट्कोणके बुधः ॥

(पृथ्वीपर) लिखे स्वतंत्र में भी इसीप्रकार लिखा है, यथा—स्वयम्भू कुसुम गोरोचन, अगरु काश्मीर (केशर) मृगनाभि- शिहल (सिहलोजय) रक्तचंदन और श्वेतचंदन, इनका ही नाम गन्ध है । यही सर्वदा चण्डिका को प्रिय है । इस गन्ध-योग में ही योनिचक्र लिखना चाहिये । फिर दो योनि लिखकर कोणषट्क पातन करे । अनन्तर अष्टदल और चतुर्द्वार समन्वित भूमि लिखै । तुम्हारे निकट यह चक्र वर्णन किया । इस चक्र में ही पुष्पांजलि विकरण करे । कुमारी कल्प में भी कहा है, प्रथम त्रिकोण अङ्कित करके उसके बाहर त्रिकोण अङ्कित करे । बाहिरी त्रिकोण लिख-कर बाहिरेकोण षटक् संयुक्त करना चाहिये । मध्य में बीज और माया विभूषित बिंदुचक्र लिखकर षट्कोण से बाहिरे अष्टदल और वृत्त संयुक्त करना चाहिये । इस प्रकार बहिर्वृत्त और भूपुरैक समन्वित यंत्रराज जानसकने से निःसंदेह मुक्ति लाभ होती है । स्वयम्भू कुसुम सहित कुंकुम और अगर समन्वित एवं कुण्डगोल विलिप्त ताम्रपात्र में उल्लिखित यंत्रराज लिखना चाहिये । यदि कहो कि यहांपर किस प्रकार से पन्द्रह कोण का उल्लेख किया है । इसमें स्वतंत्रादि के सहित विरोध होता है । तो यह कालीतन्त्र का मत है । इस प्रकार नहीं कहसकते । क्योंकि कालीतन्त्र में ही

इति बहिरुपादानं व्यर्थमेव । अन्तः षट्कोणाभावात् वचनान्तर दर्शनाच्च । तथा कालीतन्त्रे—

पंचशक्तिं समालिख्य अधोवक्त्रां सुलक्षणाम् ॥

कालिकाश्रुतौ च-

त्रिकोणं त्रिकोणं नवकोणं पद्मम् ।

कुलसंभवेऽपि—

त्रिकोणं विन्यसेत् पद्मे पुनश्चापि त्रिकोणकम् । नवकोणं पुनस्तत्र तन्मध्ये स्थापयेत् शिवाम् ॥

तस्मात् षट्कोणमत्र शक्त्यात्मकमिति । ननु एवं त्रिकोण द्वयान्तर्गत भैरवीचक्रवत् नवकोणं मतान्तरं स्यात् नैवं तदा तत्रैव पूजायां महाविरोधः । तद्यथा कुलसंभवे—

कालीं कपालिनीं कुल्लां कुरुकुल्लां विरोधिनीम् । विप्रचित्तां न्यसेच्चैव वहिः षट्कोणके बुधः ॥ उग्रामुग्रप्रभां दीप्तां परात्रिकोणके न्यसेत् नीलां घनां वलाकाञ्च तथैवापरके त्रिके ॥ मात्रां मुद्रां मिता ञ्चव परात्रिकोणके वुधः ॥

एतदुक्तं भवति षट्कोणावरणे अपरात्रिकोणके तयावरणम् तथापरे त्रिकोणत्रयं अपरं त्रयं यजेदित्यस्य अर्थो मवन्मते तु त्रिकोणं नास्त्येव त्रिकोणशब्दस्य केवलं त्रिकोणात्मके शृङ्गाटके शक्तित्वात्

अनन्तर यथोक्त मंत्रोच्चारण सहित गंध और पुष्प द्वारा पूजा करके वौषट् मन्त्रसे अक्षत सहित स्वयम्भू कुसुमदान फट्मन्त्र से धूपपात्र प्रोक्षण, पूजन सम्मुख में स्थापन और वाम तर्जनी द्वारा स्पर्श करना चाहिये। फिर घंटा की पूजा और बामहस्त द्वारा उसका वादन, मध्यमा, अनामिका और अंगुष्ठ द्वारा धूपदान, देवता, गायत्री और मूलमन्त्र जप और तीनबार उत्तोलन करके देवी को धूपित करै । अनन्तर सन्मुख में दीपपात्र स्थापन एवं पूर्ववत् प्रोक्षण और पूजन निष्पादन करके बामहस्त की मध्यमा द्वारा दीपपात्र स्पर्श, दीपनिवेदन, पूर्ववत् घंटावादन, एवं पूर्ववत् मध्यमा और अनामिका के मध्य में अंगुष्ठाग्र द्वारा दीपपात्र धारण करके प्रदर्शन कर तदुपरांत मधु द्रव्य सम्मुख करके 'ओं कालिकालि' इत्यादि मन्त्र से सात बार अभिमन्त्रित करने के पीछे ग्रासमुद्रा द्वारा पात्रग्रहण, दक्षिणहस्त द्वारा शुध्यादिसंग्रह और दोनों हाथों से मिलाकर मूलमन्त्र के अंत में शुध्यादि सहित आसव निवेदन

ज्य मूलमन्त्रान्ते शुद्ध्यादिसहितमासवं निवेदयामीति दद्यात्। ततो नैवेद्यं स्वर्णादिपात्रे कृत्वा त्रिकोणमण्डलोपरि पुरतः संस्थाप्य हुमिस्यवगुण्ठ्य यामिति वायुबीजेन संशोध्य रमिति वह्निबीजेन संदह्य वमिति वरुणबीजेन धेनुमुद्रया अमृतीकृत्य तदुपरि मूलं सप्तधा प्रजप्य वामांगुष्ठेन नैवेद्यपात्रं स्पृशन् नैवेद्यं निवेदयामीति दक्षिणहस्ते तत्त्वमुद्रया उत्सृजेत्। ततो जलगण्डूषं दत्त्वा प्राणादिपञ्चमुद्रां दर्शयन् वामहस्ते ग्रासमुद्रां दर्शयेत्। ततः पुनराचमनीयं दत्त्वा कर्पूरादियुक्तताम्बूलं वामांगुष्ठेन धृत्वा ताम्बूलं निवेदयामीति दद्यात्। सर्वमर्घ्यजलेन उत्सृजेत्। ततस्तन्त्रमुद्रया अर्घ्यामृतेन देवीं त्रिः संतर्प्य योनिमुद्रां दर्शयेत्॥

तदुक्तं तन्त्रान्तरे—

मध्यमानामिकाभ्यान्तु अंगुष्ठाग्रेण पार्वति!। दद्याच्च विमलं गन्धं मूलमन्त्रेण देशिकः॥ अंगुष्ठतर्जनीभ्यान्तु चक्रे पुष्पं निवेदयेत्। यथा गन्धं तथा देवि! धूपं दद्याद्विचक्षणः॥ मध्यमानामिकाभ्यान्तु मध्यपर्वणि देशिकः। अंगुष्ठाग्रेण देवेशि धृत्वा दीपं निवेदयेत्॥

करना चाहिये। अनन्तर सुवर्णादिपात्र में नैवेद्य करके त्रिकोणमण्डल के ऊपर सम्मुख स्थापन, कूर्चमंत्र से अवगुण्ठन वायुबीज की सहायता से संशोधन वन्हि बीज द्वारा संदहन, वरुणबीज की सहायता से धेनुमुद्रा योग में अमृतीकरण, उसके ऊपर सातवार मूलमन्त्र जप, और वाम अंगुष्ठ से पात्र को स्पर्श कर तत्व मुद्रा द्वारा उत्सर्जन करे। फिर जलगण्डूष प्राणादि पंचमुद्रा प्रदर्शन करने के पीछे वाम हस्त में ग्रासमुद्रा दिखानी चाहिये तदनन्तर पुनर्वार आचमनीय प्रदान करके बायें हाथ के अंगूठे से कर्पूरादि युक्त ताम्बूल ग्रहण कर उसको निवेदन और समस्त अर्घ्यजल के सहित उत्सर्जन करे। अनंतर तत्वमुद्रा सहित अर्घ्यामृत द्वारा देवीको तीनवार तृप्त करके योनिमुद्रा दिखावे। तंत्रांतर में कहा है यथा—मध्यमा, अनामिका और अंगुष्ठाग्र द्वारा मूलमंत्र की सहायता से विमलगंध दान करना चाहिये। अंगुष्ठ और तर्जनी द्वारा चक्र में पुष्प निवेदन एवं गंध और धूपदान करे। मध्यमा, अनामिका, और अंगुष्ठाग्र द्वारा मध्यपर्व में दीपधारण करके निवेदन और मूलमंत्र से तीनवार गायत्रीको उत्तोलन करके तत्वादमुद्रा प्रदर्शन करने के पीछे नैवेद्य निवेदन करे। शारदा टीके में कहा है, धूपभाजन मंत्र में प्रोक्षण, हृन्मंत्र में

उत्तोलनं त्रिधा कृत्वा गायत्र्या मूलयोगतः । तन्त्राख्यमुद्रया देवि ! नैवेद्यंच निवेदयेत् ॥

मूलेन आचमनं ताम्बूलं तेन मुद्रया ददात् ।

शारदाटीकायाञ्च—

धूपभाजनमंत्रेण प्रोद्याभ्यर्च्य हृदात्मना । मन्त्रेण पूजितां घण्टां वादयन् गुग्गुलं दहेत् ॥

अन्यत्रापि—

गजध्वनि ततो मन्त्र मातः स्वाहेत्युदीर्य्य च । अभ्यर्च्य वादयन् घण्टां सधूपैर्धूपयेत्ततः ॥

तन्त्रांतरे च—

ततः समर्पयेत् धूपं घण्टावादनसंयुतम् । एवं दीपदाने घंटा वादनमिति साम्प्रदायिकाः ॥

अथ गन्धादिनिवेदनस्थानम् यथा यामले—

निवेदयेत् पुरोभागे गन्धं पुष्पच भूषणम् । दीपं दक्षिणतो दद्यात् पुरतो न तु वामतः ॥ वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे । नैवेद्यं दक्षिणे चापि पुरतो न तु पृष्ठतः ॥

दीपमिति घृतयुक्तश्चेत् दक्षिणे तैलयुक्तं चेद्वामे इति साम्प्रदायिकाः । एवं सिता वर्त्तिश्चेत् दक्षिणतः रक्ताचेद्वामतः संमुखे तु न नियमः । नैवेद्यमिति सिद्धान्नं चेत् देवतावामे आमान्नं चेद्दक्षिण इत्यपि बोद्धव्यम् ।

अभ्यर्चन (पूजा) और 'फट्' की सहायता से पूजित घंटा बजाकर गुग्गुल जलाना चाहिये । तन्त्रांतर में कहा है, अनंतर घंटा बजाने के संग धूप निवेदन करै । साम्प्रदायिक गणोंने दीपदान में भी इसीप्रकार घंटा बजाने की विधि निर्देश की है । गंधादि निवेदन के स्थान यथा—यामल में कहा है । पुरोभाग में गंध, पुष्प और भूषण, दक्षिण में दीप, वाम में धूप और दक्षिण में नैवेद्य प्रदान करै । दीप कभी सम्मुख वा वाम में न दे । और नैवेद्य भी कभी सम्मुख वा पीछे से निवेदन न करै । सम्प्रदायिक मतसे घृतयुक्त प्रदीप दक्षिण में और तैलयुक्त दीप वाम में निवेदन करै । इसप्रकार श्वेतवर्त्ति (सफेदवत्ती) दक्षिण में और रक्तवर्त्ती वाम में प्रदान करनी चाहिये । सम्मुख नहीं नैवेद्य सिद्धान्न होने से देवता के वाम में और आसन न होने से दक्षिण में, यह समझना चाहिये ।

अथ पुष्पनियमो यथा मुण्डमालायाम्—

पुष्पाण्यपि तथा दद्यात् रक्तकृष्णसितानि च । श्वेतं रक्तं जवा-पुष्पं करवीरं तथा प्रिये ? ॥ टगरं मल्लिका जाती मालती यूथिका तथा। धुस्तूराशोकवकुलं श्वेतकृष्णापराजिता ॥ बकपुष्पं बिल्वपत्रं चम्पकं नागकेशरम् । मल्लिका झिण्टिका कांची रक्तं यत् परिकीर्त्तितम् ॥ अर्कपुष्पं जवापुष्पं वर्वरंच प्रियं भवेत् । अष्टम्यांच विशेषेण तुष्टा भवति पार्वती ॥ पद्मपुष्पेण रक्तेन सन्तुष्टाः सर्वदेवताः। कृष्णं वा यदि वा रक्तं कालिका वरदा भवेत् ॥ श्मशानधुस्तुरेणैव तुष्टा स्वप्नावती परा । अन्यपुष्पैश्च विविधैः सन्तुष्टा देवि ! पार्वती ॥ आमलक्यास्तु पत्रेण तुष्टा भवति पार्वती । अष्टम्यांच चतुर्दश्यां नाना पुष्पैः समर्चयेत् ॥ श्मशाने रात्रिशेषे वा शनिभौमदिने तथा ।

मत्स्यसूक्ते—

सुगन्धिश्वेतलोहितकुसुमैरर्चयेद्बुधः ॥ बिल्वैर्मरुवकाद्यैश्च तुलसीवार्जितैः शुभैः । ओड्रपुष्पैर्विशेषेण वज्रपुष्पेण मिश्रितम् ॥ सर्वं पुष्पं प्रदातव्यं भक्तियुक्तेन चेतसा । देवानामित्युपलक्षणं देवीनामिति बोद्धव्यम् ॥

पुष्प नियम । यथा—मुण्डमालातंत्र में कहा है, रक्त, कृष्ण और श्वेत वर्ण समस्त पुष्प प्रदर्शन करै । श्वेत और रक्त भेद में द्विविध जवा और द्विविध करवीर, टगर (सुहागा) मल्लिका, जाती (चमेली) मालती, यूथी, धुस्तर, अशोक, बकुल शुक्ल और कृष्ण भेद से दो प्रकार की अपराजिता (विष्णुकान्ता) बक पुष्प, विल्वपत्र, चंपक, नागकेशर, मल्लिका पीलीकटसरैया कांची (तरी चोंटली) और अर्क पुष्प (आकका फूल) यह सब देवीको प्रिय हैं । विशेष करके अष्टमी में यह सब प्रदान करने से पार्वती तुष्ट होती हैं रक्तवर्ण पद्म पुष्प प्रदान करने से संपूर्ण देवता संतुष्ट होते हैं । कृष्ण वा रक्तवर्ण जो कोई पुष्पप्रदान किया जाय उससे कालिका वरप्रदान करती है । स्वप्नावती श्मशान धुस्तूर (श्मशान का धतूरा) से ही संतुष्ट होती है । अन्यान्य विहित पुष्प और आमलकी के पत्र प्रदान करने से, पार्वती प्रसन्न होती हैं । अष्टमी और चतुर्दशी में शनि और मंगलवार में श्मशान में वा रात्रि के शेष में, विविध पुष्प दान सहित अर्चना करै । मत्स्यसूक्त में कहा है, सुन्दर गंधयुक्त श्वेत और

तदुक्तं तन्त्रांतरे—

देवीपूजा सदा कार्य्या जलजैः स्थलजैरपि । विहितैर्वा निषिद्धैर्वा भक्तियुक्तेन चेतसा ॥ पूजनीया सदा भक्त्या नृणां शीघ्रफलाप्तये ॥

अथ पुष्पदानविधानम् यथा तदुक्तं शारदाटीकायांम्—

पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम् । दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणम् ॥ अधोमुखं फलं नेष्टं पुष्पांजलिविधौ न तत् ।

अथ नैवेद्यं यथा । तदुक्तं मत्स्यसूक्ते—

पायसं कृषरं दद्यात् शर्करागुड़संयुतम् । गव्यं मुखे मधुपयस्तथान्यानि निवेदयेत् ॥ शालमत्स्यञ्च पाठीनं गोधामांसमनुत्तमम् । अन्नञ्च मधुना युक्तं यत्नाद्दद्याच्च मन्त्रवित् ॥

कृषरं तिलतण्डुलमित्यर्थः । पाठीनं वोयालाख्यमत्स्यमित्यर्थः ।

अन्यत्रापि—

कन्दुपक्वं स्नेहपक्वं घृतसंयुक्तपायसम् । मनः प्रियंच नैवेद्यं दद्याद्देव्यै पुनः पुनः ॥

लोहित, वर्ण कुसुम (पुष्प) विल्व, मरुवक विशेषतः ओड़ पुष्प (गुडहर पुष्प) और वज्र पुष्प मिश्रित समस्त पुष्प भक्तियुक्त चित्त से प्रदान करै, तुलसी प्रदान न करै । तन्त्रान्तर में कहा है विहित हों अथवा निषिद्ध हों, जलज और स्थलज पुष्पों के द्वारा भक्तियुक्त चित्त से सर्वदा देवी की पूजा करने से शीघ्रफल लाभ होगा ।

पुष्प विधान । यथा—शारदा टीका में कहा है पुष्प वा फल अथवा पत्र अधोमुख होकर न दे, इस से दुःख उपस्थित होता है । जिस रूप में वह सब उत्पन्न हुए हैं उसी भाव में अर्पण करें । पुष्पांजलि प्रदान करने के समय अधोमुख होकर फलदान की विधि विहित नहीं है । अब नैवेद्य दान की विधि लिखी जाती है मत्स्यसूक्त में कहा है पायस (खीर) शर्करा गुड़ समेत कृषर गव्य दुग्ध (गायका दुग्ध) मधु और अन्यान्य समस्तद्रव्य निवेदनकरे । मंत्रवित् साधक यत्नपूर्वक शालमत्स्य पाठीन, गोधामांसऔर मधुयुक्तअन्न प्रदानकरै । इसस्थलमें कृषर शब्दमें तिल, तंडुलहों । पाठीनशब्दमेंबोदालमत्स्य समझना चाहिये । अन्यत्र भी कहा है । यथा—कन्दपक्व, स्नेहपक्व, घृतसम्पृक्त पायस और इच्छानुसार मन को प्रियनैवेद्य बारम्बार प्रदान करै कन्दपक्व शब्द में भ्रष्ट

कन्दुपक्कं भृष्टतण्डुलपृथुकादिकम् स्नेहपक्वं लड्डुकादि ॥

कुमारीकल्पेऽपि—

ताम्बूलं च सकर्पूरं नारिकेलं सशर्करम् । पायसं सघृतंचैव आर्द्रकं सगुडं तथा ॥ सतण्डुलं तिलं चैव दधि चैवं सशर्करम् । जम्बीरं पनसं चैव आम्रातक फलं तथा । कदलीं तिन्तिड़ीं चैव श्रीफलं फलमुत्तमम् । करंजं वकुलंचैव तालं खर्जूरमेव च ॥ अन्यानि च सुगन्धीनि स्वादूनि च फलानि च ॥

मुण्डमालायामपि—

दधि क्षीरं गुड़श्चान्नं पायसं शर्करान्वितम् । पायसं क्षौद्र-मांसंच नारिकेलं समोदकम् । शशकं मेषकं चैव आर्द्रकंच सश-र्करम् । शालमत्स्यंच पाठीनं शकुलं गडकं तथा ॥ मद्गुरं चेलिषं दद्यात् मांसं माहिषमेव च । पक्षिमांसं वरारोहे ! डिम्बं नानासमुद्भवम् ॥ कृष्णच्छागं महामांसं गोधिकां हरिणीं तथा । जलजे मत्स्यमांसे च गण्डकीमांस मेव च ॥ नानाव्यञ्जनदुग्धानि व्यञ्जनानि बहूनि च ॥

नैवेद्यपात्रं यथा । यामले—

तैजसेषु च पात्रेषु सौवर्णे राजते तथा । ताम्रे वा प्रस्तरे वापि

तण्डुल पृथूकादि जानना स्नेह पक्व शब्द में लड्डूकादि । कुमारीकल्प में भी कहा है । यथा कर्पूर सहित ताम्बूल शर्करा के संग नारिकेल [नारियल] घृत सहित खीर गुड सहित अदरख तण्डुल सहित तिल शर्करा सहित दधि, जम्बीर, (नींबू) पनस [कटहर] आम्रतक (अम्बाडा) कदली तिन्तिडी (विपाबिल) श्रीफल,ी करञ्ज, बकुल, ताल, खजूर एवं अन्यान्य सुस्वाद और सुगन्धित सम्पूर्ण फल प्रदान करै । मुण्डमाला में कहा है दधि, दुध, गुड सहित पायस, क्षौद्रमांस, नारिकेल, मोदक अन्न, खरगोश, मेष (भेड) शर्करा सहित अदरख, शाल, पाठीनमत्स्य, शकुल, गडक मद्गुर, इलिष, भैंसे का मांस, पक्षीमांस, नानासम्भूत, डिम्ब कालाबकरा, महामांस, गोधिका हरिणी मांस, गण्डकी मांस एवं अनेक व्यञ्जन और दूध प्रदान करै । नैवेद्य पात्र यथा–यामले विविध तैजस पात्र में अथवा सुवर्ण के पात्र में वा चांदी के पात्रमें या तांबे के पात्र में किंवा पत्थर और पद्मपत्र में अथवा यज्ञदारुमय पात्र में नैवेद्य कल्पना करै । हे महेश्वरि ! इन सबका अभाव होने से स्वहस्तगठित उपयुक्त ऊर्ध्व-

पद्मपत्रेऽथवा पुनः। यज्ञदारुमये वापि नैवेद्यं कल्पयेत् बुधः । सर्वभावे तु माहेशि ! स्वहस्तघटितं यदि ॥ यद्योग्यमर्घ्यपात्रे तु तद्विधाय निवेदयेत् । अन्यैस्तोयैर्यदुत्सृष्टमर्घ्यपात्र स्थितंच यत् ॥ न गृह्णाति महादेवी दत्तं विधिशतैरपि ।

अथ कृताञ्जलिः ! श्रीदक्षिणकालिके ! आवरणं ते पूजयामीति आज्ञां गृहीत्वा अग्नीशासुरवायव्यसंमुखे दिक्षु च देव्याःषडङ्गे वा षडङ्गदेवतां ध्यात्वा न्यासोक्तमन्त्रेण यजेत् ।

तदुक्तम् कुलार्णवे-

अग्नीशासुरवायव्यमध्यदिक्ष्वङ्गपूजनम् । इति ।

तन्त्रान्तरे च-

इष्ट्वा हृदयमाग्नेय्यामैशान्यान्तु शिरो यजेत् । नैर्ऋत्यांच शिखा पूज्या वायव्यां कवचं यजेत् ॥ अभ्यर्च्य पुरतो नित्यं दिक्षु वास्त्रम-थार्चयेत् । अपिच । वन्ह्यादिदिक्षु वा पूज्यातस्तदङ्गेषु च क्रमात् ॥

ध्यानं यथा-

तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः । वरदाभयधारिण्यः प्रधानतनवस्त्रियः ॥ अथ गुरुपंक्तित्रयं पूजयेत् ।

पात्र में नैवेद्य निवेदन करै । इनके विना अन्य पात्र में शतशतविधि अनुसार प्रदान करने से महादेवी उसको ग्रहण नहीं करती । अनन्तर हाथ जोड़कर " श्री दक्षिणकालिके " इत्यादि कह, आज्ञाग्रहण कर अग्निकोण, वायुकोण, नैर्ऋतकोण और ईशानकोण के सम्मुख एवं दिक्समूह अथवा देवी के षडङ्ग में षडङ्ग देवता का ध्यान करता हुआ न्यासोक्त मंत्र से पूजा करै । कुलार्णव में कहा है यथा-अग्निकोणादि चतुष्कोण मध्यभाग और दिशाओं में अङ्ग पूजा करनी चाहिये। तन्त्रांतर में भी कहा है अग्निकोण में हृदय की पूजा करके ईशानकोण में मस्तक, नैर्ऋतकोण में शिखा और वायुकोण में कवच की पूजा करनी चाहिये । पूजा के अन्त में सम्मुख सब ओर अस्त्रकी पूजा करनी चाहिये । फिर कहा है, अग्नि इत्यादि दिशाओं में उन उन सब अङ्गों सहित यथाक्रम से देवी की पूजा करै । ध्यान यथा-तुषार इत्यादि । अनन्तर तीन गुरु पंक्तियों की पूजा करनी होती है । शारदा टीका में कहा है यथा-वायुकोण से ईशानकोण पर्य्यन्त गुरुपंक्ति की पूजा करै । इसमें असमर्थ होने से गुरु चतुष्टय

तदुक्तं शारदाटीकायाम्—

वायव्यादीशपर्य्यन्तं गुरुपंक्तिं समर्चयेत् । तदशक्तौ गुरुचतुष्टयं तदशक्तौ गुरुत्रयम् ॥

तद्दैवतं ऋषिमात्रं वा । अथ गुरुपंक्तिर्यथा । तदुक्तं भावचूड़ामणौ—

भैरव उवाच—

मातर्देवि ! महामाये ! बन्धमोक्षप्रवर्तिनि ! । इदानीं श्रोतुमिच्छामि गुरुक्रममनुत्तमम् ॥

देव्युवाच—

गुरुक्रमस्तु बहुधा मन्त्रविस्तारगौरवात् । कालीनामप्यनादित्वात् तत् कथं कथयामि ते ॥ न ज्ञात्वा गुरुकुलं ह्येव नष्टमार्गो भविष्यसि । नष्टमार्गो नात्र विद्ये न तादृक् फलगोचरम् ॥ गुरूणां शिष्यभूतानां नास्ति चेत् सन्ततिक्रमः। मन्त्रतन्त्राश्च विद्याश्च निष्फला नात्र संशयः॥ विंशतिं पुरुषान् वापि नवसप्तत्रयोऽपि वा । अज्ञात्वा गुरुवंशानां शिष्यश्च नष्टसन्ततिः ॥ स्ववंशादधिकं ज्ञेयं गुरुवंशं महाशुभम् । जनकादधिको ज्ञेयो मन्त्रदश्च महेश्वर ! ॥ तस्मात् सर्वत्र देवेश ! संक्षेपात् शृणु तान् गुरून् । आदौ सर्वत्र देवेश ! मन्त्रदः परमोगुरुः ॥

और इसमें भी असमर्थ होने से गुरुत्रय अथवा तद्दैवत ऋषिमात्र की पूजा करनी चाहिये।

अब गुरुपंक्ति लिखी जाती है। भाव चूड़ामणि में कहा है, यथा—भैरव ने कहा है हे मातः देवि महामाये ! तुम बन्धन और मुक्ति की हेतु हो अब गुरुक्रम श्रवण करने की मेरी इच्छा है देवी ने कहा भगवती काली अनादि हैं। उनके मन्त्र भी अनेकप्रकार हैं इसलिये गुरुक्रम भी अनेक विधि में विच्छिन्न है अतएव किसप्रकार उसका वर्णन करूँ? हे देव ! कुलगुरु को न जानने से नष्टमार्ग होना होता है। नष्टमार्ग की विद्या साधन में किसी प्रकार का फल उत्पन्न नहीं होता। गुरु के वंश को अपने वंश की अपेक्षा भी श्रेष्ठ जानना चाहिये । हे महेश्वर! जो मन्त्र देता है उसको पिता की अपेक्षा भी अधिक जानना चाहिये। अतएव हे देवेश ! संक्षेप से गुरु गणों का विषय श्रवण करो। प्रथम सर्वत्र मंत्रदाता गुरु ही सब से श्रेष्ठ हैं । तुम परापर गुरु और

परापरगुरुस्त्वं हि परमेष्टिरहं ततः । सर्वतन्त्रेषु विद्यासु स्वयं प्रकृतिरूपिणी ॥ ततः पुरुषरूपश्च ततः स्वगुरुसन्ततिः । तत्रैव हि मदंशाश्चमद्भक्ताश्च विशेषतः ॥ शैवमन्त्रेषु पुरतः सर्वत्रसिद्धिदायिकः । दिव्यौघा गुरवो देव ! सिद्धौघा गुरवस्तथा ॥ मानवौघाः समासेन कथयामि तवाग्रतः । तत्रादौ कालिका देवी तस्याः शृणु गुरुक्रमम् ॥ महादेवी महादेवस्त्रिपुरा चैव भैरवः । दिव्यौघाः गुरवः प्रोक्ताः सिद्धौघान् कथयामिते ॥ ब्रह्मानन्दः पूर्णदे...श्चलश्चित्तश्च लाचनः । कुमारः क्रोधनश्चैव वरदः स्मरदीपनाः ॥ माया मायावती चैव मानवौघान् शृणु प्रिये ! ॥ विमनः कुशलश्चैव भीमः शूरः सुधाकरः । मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः ॥ मूलदेवो रन्तिदेवो विघ्नेश्वरहुताशनौ । समरानन्दसन्तोषौ कालिकागुरवः स्मृताः ॥

अथ देवीं प्रति भैरववाक्यम्—

तदुक्तं तन्त्रार्णवे—

दिव्या वसन्ति ये नित्यं सिद्धिभूमाविहापि च ॥ मानवौघा मानवेषु मम रूपधराः सदा । आनन्दनाथशब्दान्ता गुरवः सर्वसिद्धिदाः ॥ स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकीर्त्तिताः । मानवौघान्तिके देवि ! स्वगुरुं परि..जयेत् ॥

मैं परमेष्ठी गुरु हूं सम्पूर्ण तंत्र और विद्या में हूं मैं ही स्वयम् प्रकृति और तिसके पीछे अपने गुरु की सन्तति हूं उसमें भी विशेष करके मदीय भक्तगण मेरे अंश स्वरूप हैं ॥ हे देव ! दिव्यौघ, सिद्धौघ और मानवौघ भेदसे गुरु तीन प्रकार के हैं संक्षेपसे तुम्हारे निकट इनका वृत्तान्त कहती हूं । तिनमें देवी कालिका प्रथम है । तिनका गुरुक्रम श्रवण करो । महादेवी और महादेव एवं त्रिपुरा और भैरव यह दिव्यौघ गुरु हैं । सिद्धौघ गुरु का वृत्तान्त कहती हूं, श्रवण करो । ब्रह्मानन्द, पूर्णदेव, चलचित्त, लोचन, कुमार, क्रोधन, वरद, स्मरदीपन, माया, मायावती, यह मानवौघगुरु हैं और विमल, कुशल, भीम, शूर, सुधाकर, मीन, गोरक्षक भोजदेव, प्रजापति, मूलदेव, रन्तिदेव विघ्नेश्वर, हुताशन, समरानन्द, सन्तोष यह कालिका गुरु हैं ॥

देवी के प्रति भैरववाक्य । यथा—तन्त्रार्णवे–जो मेरा रूप धारणपूर्वक मनुष्यगण सिद्ध भूमि में और इस लोक में बास करते हैं वह दिव्यस्वरूप गुरुगण मानवौघ नाम से परिगणित हैं उनको आनन्दनाथ कहते हैं वह सर्वविध सिद्धि विधान करते हैं । इनमें गुरुरूपिणी स्त्रियों को अम्बा शब्द से निर्देश करते हैं । हे देवि ! मानवौघ

अथवा प्रातकृत्येषु यत्सामान्यगुरुकुलमुक्तं तदेवार्चयेत् ।

तद्यथा भावचूड़ामणौ-

अथवा सर्वशास्त्रेषु गुरवः पूर्वसूचिताः ।

कुलचूड़ामणौ च-

एकचित्तमना भूत्वा शृणु वत्स ! समाहितः । येषु येषु च मंत्रेषु ये ये ऋषिगणा स्मृताः ॥ ते ते पूज्याः सपर्य्यादौ संक्षेपाद्गदितं मया अज्ञात्वा गुरुकुलं वा गुरुत्रितयमर्चयेत् ॥ चतुष्टयं वा सङ्कोचो न च कार्य्यस्ततः परम् । गुरुःपर गुरुश्चैव परापरगुरुस्तथा ॥ परमेष्टि गुरुश्चैव कथिता गुरवस्तव । गुरुपूजां विना वत्स ! यदि पूजां समाचरेत् ॥ निष्फला मम सा पूजा ज्ञातव्या साधकोत्तमैः । निर्गुणं तत्तदेव स्यात् सगुणं कुलपूजनम् ॥ कुलावलोकनं चेत् स्यात् कुतः प्रोक्षणमार्जनम् । क्व च स्थानं क्व वा शुद्धिः क्व च न्यासविशोधनम् ॥ दीक्षाप्रभुः कुलीनः स्यात् कुलात्मा वटुकेश्वरः । स्वगेहे गुरुमानीय कुलरूपं गुरुं स्मरेत् ॥ गुरुक्रमञ्च कथितं गोपनीयं प्रय नतः ॥ न देयं यत्र कुत्रापि योगभ्रष्टे च शिष्यके । वैष्णवे शाक्तितन्त्रे वा गाणपत्येऽथवा पुनः ।

गुरु के अन्तिक में अपने गुरु की पूजा करे । अथवा प्रातकृत्य में जिन सामान्य कुल-गुरु का उल्लेख है, तिनको अर्चना करनी चाहिये । भाव चूडामणि में कहा है । यथा—अथवा सम्पूर्ण शास्त्र में ही गुरुगण पूर्व सूचित हुए ह । कुलचूडामणि में कहा है, हे वत्स ! एक चित्त, एक मन और सावधान होकर श्रवण करो । जिस जिस मन्त्र के जो जो ऋषि हैं, पूजा के प्रथम ही उनकी पूजा करनी चाहिये । कुलगुरु के न जानने से गुरु त्रितिय वा चतुष्टय की पूजा करे । इसमें किसी प्रकार का सकोच न करे । गुरु, परमगुरु, और परापर गुरु इन सबका वृत्तान्त तुम्हारे निकट वर्णन किया । हे वत्स ! गुरु की पूजा न करके जो पूजा करी जाती है उस दोष की शान्ति के लिये कुलपूजा करे । जिस स्थान में जो निगुण है, इस प्रकार पूजा करने स वह सगुण होती है । यदि कुल की दृष्टिपात हो, तो प्रोक्षण और मार्जन का फिर क्या प्रयोजन है ? इसके अतिरिक्त स्थानशुद्धि और न्यास शोधन की भी क्या आवश्यकता है ? कुलीन ही दीक्षा का प्रभु और कुलात्मा ही साक्षात् बटुकेश्वर है । इसकारण गृह में गुरु को लाकर कुलगुरु रूप से भावना करै । तुम्हारे निकट गुरुक्रम का वर्णन किया । अत्यन्त यत्न सहित इसको गुप्त रक्खै । जिस किसी को प्रदान न करै । वैष्णव

निजं गुरुं परं ध्यात्वा ततो गुरुचतुष्टयम् ॥ पूजयित्वा यजेद्देवं न च संकोचमाचरेत् ॥

श्रीमहादेव्यम्बायाः श्री पादुकां पूजयामि नम इति संपूज्य गुरुपात्रामृतेन त्रिः सकृद्वा तर्पयेत् । एवं महादेवानन्दनाथ गुरुपादुकां पूजयामि नम इति संपूज्य पूर्ववत् पूजयेत् । एवं क्रमेण गुरुपंक्तित्रयं संपूज्य मानवौघान्त स्वगुरुं गुरोर्गुरुं तद्गुरुं च पूजयेत् तर्पयेच्च । ततो रश्मिवृन्ददेवताः पूजयेत् यथा बाह्ये त्रिकोणस्य सम्मुखे ओं कालिकायाः श्रीपादुकां पूजयामि नमः । इति पाद्यादिभिः संपूज्य योगिनीपात्रामृतेन तत्त्वमुद्रया तर्पयेत् । एवं देव्या वामे ओं कपालिनीं दक्षे कुल्लां तदन्तास्त्रिकोणे ॐ कुरुकुल्लां ॐ विरोधिनीं ॐ विप्रचित्ताम् । तस्यान्तस्त्रिकोणे ॐ उग्रां ॐ उग्रप्रभां ओं दीप्तां तदन्तस्त्रिकोणे ओं मात्रां ओं मुद्रां ओं मितां पाद्यादिना त्रिः संपूज्य पूर्ववत्तर्पयेत् । ततोऽष्टदलपद्मे पूर्वादिक्रमेणाष्टशक्तिः पूजयेत् । यथा ओं आं ब्रह्माण्याः श्रीपादुकां पूजयामि नम इति पाद्यादिभिः संपूज्य तर्पयेत् । अग्नौ ओं ईं नारायणीं दक्षिणे ओं ऊं माहेश्वरीं नैऋत्यां ओं ॠं चामुण्डां वारुणे ओं लृं कौमारीं वायौ ओं ऐं अपराजिताम् उत्तरे ओं औं वाराहीम् ईशे अं अः नारसिंहीम् पूर्ववत् संपूज्य तर्पयेच्च

शक्तितन्त्र अथवा गाणपत्य में अपने गुरुका ध्यान करके फिर गुरु चतुष्टय की पूजा करके देवयजन में प्रवृत्त होना चाहिये । किसी प्रकार भी संकोच न करै नमस्कार करनेके पीछे श्रीमहादेवी अम्बाकी श्रीपादुका पूजकर गुरुपात्रस्थित अमृत से तीनवार वा एकवार तर्पण करै इसप्रकार महादेवानन्द नाथ गुरुकी पादुकामें नमस्कारपूर्वक पूजा करके पूर्ववत् देवपूजा और तर्पण करना चाहिये । इस प्रकार क्रमानुसार विधिसे गुरु पंक्तित्रयकी पूजा करके, मान वौघान्त स्वगुरु, गुरुके गुरु और तिसकेगुरु पूजा करनी चाहिए । पूर्ववत् तर्पण भी करै । फिर रश्मिवृन्द देवताओं की पूजा में प्रवृत्त होना चाहिये । यथा-बाह्य में त्रिकोण के सम्मुख ओंकार उच्चारण करके काली की श्रीपादुको पूजता हूं नमस्कार' कह इसप्रकार पाद्यादि द्वारा पूजाकर तत्वमुद्रा की सहायतासे योगनी पात्रस्थ अमृत द्वारा तर्पण करै इस प्रकार देवी के वाम में कपालिनी, दक्षिण में कुल्ला, तदन्तर्वर्त्ती त्रिकोण में कुरुकुल्ला, विरोधिनी और विप्रचित्ता, तिसके अन्तस्थ त्रिकोण में उग्रा उग्रप्रभा और दीप्ता तिस के अन्तस्थ त्रिकोण में मात्रा मुद्रा और मिता, इन सब देवियों की पाद्यादि सहित ओंकार समुच्चारण करने के पीछे पूर्ववत् तर्पण में प्रवृत्त होना चाहिये । अनन्तर अष्टदल पद्म में पूर्वादि क्रम से अष्टशक्ति की पूजा करै । यथा—'ओं आं ब्रह्माणी इत्यादि' श्रुति में भी कहा है-दो तीन,

तदुक्तं अतो द्वितीयचतुःषट्‌काष्टादशद्वादशचतुर्दशषोड़शस्वरभेदेन प्रथममेव प्रणवेण आवाहनञ्च तेनैव पूजनं विदुः।

कुमारीकल्पेऽपि—

ब्रह्माद्याः पूजयेत् पत्रे पत्राग्रे भैरवान् यजेत्। लोकपालांस्तथा बाह्ये तदस्त्राणि च तद्बहिः॥

अथ भैरवाः। यथा ज्ञानार्णवे—

असिताङ्गो रुरुश्चण्डः क्रोधश्चोन्मत्तभैरवः। कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः॥

एषां मंत्रो यथा—

ह्रस्वार्णा विन्दुसंयुक्ता वाङ्मायापूर्वभूषिता। इति।

अत्र प्रयोगः। पूर्वादिवामावर्त्तेन ऐं ह्रीं अं असिताङ्गभैरवं श्री पादुकां पूजयामि नमः ऐं ह्रीं इं रुरुभैरवं ऐं ह्रीं उं चण्डभैरवं ऐं ह्रीं ऋं क्रोधभैरव ऐं ह्रीं लृं उन्मत्तभैरवं ऐं ह्रीं एं कपालिभैरव ऐं ह्रीं ओं भीषणभैरवं ऐं ह्रीं अं संहारभैरवं पूजयेत्तर्पयेच्च। ततो भूपुरे इन्द्रादि लोकपालान् यथा पूर्वादितः नां इन्द्र श्रीपादुकां एवं वां वन्हि यां यम क्षां निऋति वां वरुण यां वायु शां कुवेर हां ईशाननिऋति वरुणयोर्मध्ये ह्रीं अनन्त इन्द्रेशानयोर्मध्ये आं ब्रह्मणः श्रीपादुकामित्यादि। तद्बहिः तदस्त्राणि पूजयेत्तर्पयेच्च। तथा वं वज्र श्रीपादुकाम् एवं शं शक्ति। दं दण्ड। खं खड्ग। पां पाश। अं अंकुश। गं गदा।

चार, छै, आठ, दश बारह, चौदह वा सालह स्वर—भेद से प्रथम ही प्रणव द्वारा आवाहन और पूजा करनी चाहिये। कुमारीकल्प में भी कहा है, पत्र में ब्रह्मादि की-पत्र के अग्र में भैरवादि की. बाहर समस्त लोकपालों की और उसके बाहर उन के सब अस्त्रा की पूजा करनी चाहिये॥

अब भैरव गणों का वृत्तान्त लिखा जाता है। ज्ञानार्णव में कहा है, असिताङ्ग, रुरु, चण्ड, क्रोध उत्तम, कपाली, भीषण, और संहार, यह आठ भैरव हैं, इनका मंत्र यथा प्रथम वाग् वीज अर्थात् 'ऐं' और माया वीज अर्थात् "ह्रीं" प्रयोग करके फिर विन्दु अर्थात् अनुस्वार युक्त ह्रस्व वर्ण अर्थात् अ ई, इत्यादि संयुक्त करै, प्रयोग यथा-पूर्वादि वामावर्त्त में "ऐं ह्रीं अं" इत्यादि विधान से समस्त भैरव की पूजा और तर्पण करके भूपुर में इन्द्रादि समस्त लोकपालों की पूजा करै। यथा-'नां इन्द्र श्रीपादुका इत्यादि"। अनन्तर उनके सब अस्त्रों की पूजा करै। यथा— 'वं वज्र श्री पादुकां

शूं शूल । पं पद्म । चं चक्र श्रीपादुकामित्यादि अथैवं क्रमेण सर्वावृति देवतानुलेपनगन्धपुष्पधूपदीपद्रव्यादिभिः संपूज्य त्रिः सकृद्वा पूजयेत् तर्पयेच्च ।

तदुक्तं कुलार्णवे—

त्रिवारं तर्पयेद्वापि सकृद्वापि यथेच्छया ।

कालीतन्त्रे—

सर्वासामपि दातव्या बलिपूजा तथैव च ।

अनुलेपनकं गन्धं धूपदीपौ च पालकम् । त्रिस्त्रिः पूजा प्रकर्त्तव्या सर्वासामपि साधकैः ॥

अतएव सर्वासां बलीनां शक्तीनां पूजने त्रिवारमवश्यमेव दर्शयेत् । ततो देव्या अस्त्रं पूजयेत् यथा । देवीवामोद्र्ध्वे हस्ते खं खड्गम् अधो मुं मुंडं दक्षोद्र्ध्वे अं अभयम् अधोवं वरं पूजयेत्तर्पयेच । ततः षडङ्गं विन्यस्य पूर्ववद्देवीं ध्यात्वा गन्धपुष्पाक्षतकुसुमधूपदीपं दत्त्वा पूर्ववद्घण्टां वादयन् धूपं दीपं दर्शयेत् । ततः पानीयादिद्रव्यं दत्त्वा पूर्वन्नैवेद्या-दिकं निवेद्य त्रिस्तर्पयेत् । योन्यादिमुद्रां दर्शयेत् ततः पुष्पाञ्जलि-त्रयेण पञ्चभिर्वा देवीं सायुधसपरिवारमहाकालसहितश्रीपादुकां पूजयामि नम इति संपूज्य त्रिस्तर्पयेदिति ।

इत्यादि" । अनन्तर इस प्रकार क्रमानुसार अनुलेपन, गन्ध, पुष्प, धूप दीप और द्रव्यादि द्वारा सब आवृति देवताओं की पूजा करके तीन वार वा एक वार पूजा और तर्पण करै । कुलार्णव में इसी प्रकार कहा है । यथा—तीन वार वा एक वार जैसी इच्छा हो तर्पण करे । कालीतंत्र में कहा है सब को बलि, पूजा, अनुलेपन, गन्ध, धूप और दीप प्रदान एवं तीन तीन बार पूजा करे । अनन्तर देवी अस्त्र की पूजा करनी चाहिये । यथा—देवी के वाम और ऊर्ध्व हस्त में 'खं' होने से खड्ग की, अधोभाग 'मुं' होनेसे मुण्डकी, दक्षिणहस्त के ऊर्ध्व में 'अं' होने से अभय की और अधोभागमें में 'वं होने से वरकी पूजा और तर्पण करै । फिर षडङ्गविन्यास करके पूर्वकी समान देवी का ध्यान, गन्ध, पुष्प, अक्षत, कुसुम, धूप और दीपदान एवं पूर्ववत् घण्टा वजाकर धूप, दीप दिखानी चाहिये । अनंतर पानी आदि द्रव्यदान करके पूर्ववत् नैवेद्य इत्यादि निवेदन और तीनवार तर्पण करे तिस काल में योन्यादि मुद्रा दिखानी चाहिये । अनन्तर तीन वा पांचवार पुष्पाञ्जलि दे देवीकी यथोक्त विधान से पूजाकर तीनवार तर्पण करै कालीतंत्र में भी कहा है, इस प्रकार पूजा करके मूलमंत्र से यथा विधि देवीके उद्देश से यथा शक्ति नैवेद्यादि वारम्वार निवेदन करे । अनन्तर दशवार

कालीतन्त्रेऽपि—

एवं पूजां पुरा कृत्वा मूलेनैव यथाविधि । नैवेद्यादीन् यथाशक्त्या दद्याद्देव्यै पुनः पुनः ॥ ततो वै दशवारन्तु दीपं दत्वा च साधकः । पुष्पादिकं पुनर्दद्यान्मूलेनैव यथाविधि ॥

कुमारीकल्पेऽपि—

ततो नीराजनं कुर्यात् दशवारं प्रदीपकैः ।

अस्यार्थः आरात्रिकविधिना दीपान् प्रज्वाल्य देवतामस्तकान्तं नीत्वा परिभ्राम्य नीराजनं कुर्यादित्थं दशधा । आरात्रिकविधानन्तु श्रीतत्त्व चिन्तामणावनुसन्धेयम् । अथ पञ्चमाद्यैर्देवीं परितोषयेत् । तदुक्तम् ।

पूजयेच्च महादेवीं सुरामांसझषादिभिः । अन्नैर्नानाविधैश्चापि तोषयेत् साधकोत्तमः ॥

अथ मुण्डमालातन्त्रे-सुरादानप्रशंसा ।

सुरादानेन देवेशि ! महायोगीश्वरो भवेत् । सुरा तु त्रिविधा देवि ! स्फाटिकी डाकिनी तथा ॥ काञ्जिकी स्फाटिकीदाने धनवृद्धि-रनुत्तमा । डाकिनीदानमात्रेण वैश्यः सर्वो भवेत् ध्रुवम् ॥ काञ्जिकी-सुरया देवि ! योऽर्चयेत् परमेश्वरीम् । गुटिकाञ्जनसम्भारि मारणो-च्चाटनादिभिः ॥ महासिद्धीश्वरो भूत्वा वसेत् कल्पायुतं दिवि । अर्घ्ये दत्ते महेशानि ! महासिद्धिरनुत्तमा ॥

अथोत्तरे त्रिकोणमालिख्य मांसतिलरक्तपुष्पभक्तानि एकीकृत्य तत्र संस्थाप्य ओं ह्रीं श्रीं दक्षिणायै कालिकायै स्वाहा एष बलिर्नम

दीपदान करके मूलमन्त्रानुसार ही यथाविधि पुष्पादि प्रदान करे । कुमारीकल्प में भी कहा है, अनन्तर प्रदीप द्वारा नीराजन करना चाहिये । तदनन्तर पञ्च मकारादि द्वारा देवी का परितोष करे । जैसा कहा है । यथा—हे देवि ! महादेवि पार्वती की मद्यमांस औरमत्स्यादि अनेक प्रकार अन्न द्वारा पूजा और उनको संतुष्ट करके इत्यादि । मुण्डमाला तन्त्र में सुरा दान की प्रशंसा करी है । यथा—हे देवेशि ! सुरा-दान करने से महायोगीश्वर होताहै । हे देवि ! सुरा तीन प्रकारकी है यथा स्फाटिकी, डाकिनी और काञ्जिकी स्फाटिकी सुरा दान करने से अनुत्तम धन वृद्धि और डाकिनी सुरा दान करने से समस्त वशीभूत होते हैं जो व्यक्ति काञ्जिकी सुरा द्वारा परमेश्वरी की पूजा करता है, वह महासिद्धीश्वर होकर अयुतकल्प तक स्वर्ग में वास करता है हे महेशानि ! अर्घ्यदान करने से अनुत्तम महासिद्धि लाभ होती है । अनन्तर उत्तर में त्रिकोण लिखकर मांस, तिल, रक्तपुष्प, भक्त यह सब एकत्र करके उस में स्थापन और यथोक्त मन्त्र से उत्सर्जन पूर्वक नैर्ऋत कोण में धारण करे।

इति उत्सृज्य नैर्ऋत्यां धारयेत् ॥

तदुक्तम् । पूजान्ते भोजनादौ वा बलिंदद्याच्च साधकः । इति । बलिमुत्थाप्य नैवेद्यं नैर्ऋत्यां दिशि धारयेत् ॥

ततः प्राणायामादिकं कृत्वा काम कलां विभाव्य शिरसि गुरुं ध्यात्वा हृदि देवीं भावयन् मनसा अष्टोत्तरसहस्रं रहस्यमालया वर्णमालया करमालया वा प्रजप्य पुनः प्राणायामं विधाय अर्घ्यजलं पुष्पादिकं गृहीत्वा ।

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देवी ! त्वत्प्रसादात् सुरेश्वरी ॥

इत्यनेन तेजोमयं जपफलं देव्या दक्षहस्ते समर्पयेत् ।

तदुक्तं कालीतन्त्रे-

ततः सावहितो मन्त्री गुरुं नत्वा शिरःस्थितम् । देवीं ध्यात्वा चाष्टोत्तरसहस्रं प्रजपेन्मनुम् ॥ तेजोमयं जपफलं देव्या हस्ते समर्पयेत् । गुह्यातिगुह्यगोप्त्रि त्वमिति मन्त्रेण मन्त्रवित् ॥

अथ रहस्यमाला। यथा तदुक्तं कालीतंत्रे-

दन्ताक्षमालया देवि ! राजदन्तेन मेरुणा । प्रजपेदित्यर्थः ।

जैसा कहा है पूजा के शेष में वा भोजन के आदि में महेश्वरी को बलि प्रदान करनी चाहिये । अनन्तर उत्कृष्ट बलि उत्थापित करके नैर्ऋत दिशा में नैवेद्य धारण करै । तदनन्तर प्राणायामादि करके कामकला विभावन शिर में गुरु का ध्यान, हृदय में देवी की चिन्ता रहस्यमाल वा करमाला, अथवा वर्णमाला द्वारा मन मन में अष्टोत्तर सहस्र जप और पुनर्वार प्राणायाम सहित अर्घ्य जल और पुष्पादि ग्रहण पूर्वक तेजोमय जप फल, देवी के दक्षिण हाथ में समर्पण करे । समर्पण करने के समय इस प्रकार कहना चाहिये । हे देवि ! तुम गुह्यातिगुह्य गोप्ता हो । मेरा किया हुआ यह जप ग्रहण करो । इसके प्रभाव से मुझको सिद्धि प्राप्त हो कालीतन्त्र में भी कहा है अनन्तर साधक सावधान होकर मस्तक में गुरु को नमस्कार और देवी का ध्यान करके अष्टोत्तर सहस्रवार मन्त्र जप और तेजोमय जप फल देवी के दक्षिण हाथ में समर्पण करै । तिसकाल गुह्याति गुह्य गोप्ता इत्यादि मंत्र कहना चाहिये ।

अब रहस्यमाला का वृत्तान्त लिखते हैं । कालीतंत्र में कहा है, दन्त और अक्षमाला राजदन्त और मेरु द्वारा उपकरै दंतमाला अत्यंत दुर्लभ है । इसके द्वारा कालिका का

तस्य द्वादशपटलेऽपि—

दंतेन कालिकायास्तु पूर्वोक्ता भुवि दुर्लभा ।

इति मुण्डमालायांच—

नाडीभिर्ग्रथिता माला महासिद्धिप्रदा भवेत् ।

तत्रैव सर्वशक्तैः ।

नवांगुल्यास्थिमाला च ग्रथिता पर्वभेदतः । सर्वसिद्धिप्रदा मोक्षदायिनी वरवर्णिनी ! ॥ नाडीसंग्रथनं कार्य्यं रक्तेन वाससा तथा । सदा गोप्या प्रयत्नेन मातुश्च जारवत् प्रिये ! ॥

अथ वर्णमाला यथा—विशुद्धेश्वर महातन्त्रे ।

मालाविधानं परमं शृणु पार्वति ! तत्त्वतः । येनानुष्ठित मात्रेण मन्त्रः सिध्यन्ति तत्क्षणात् ॥ अनुलोमविलोमेन मन्त्रं जप्त्वा विधानतः । मन्त्रेणान्तरितं वर्णं वर्णेनान्तरितं मनुम् ॥ कुर्य्याद्वर्णमयीं मालां सर्वमन्त्रप्रदीपनीम् । चरम र्णं मेरुरूपं लङ्घयेन्न कदाचन ॥ रहस्यमेतत् परमं मयोक्तं ते यशस्विनी ! । त्वया गुप्ततरं कार्य्यं नाख्येयं यस्य कस्य चित् ॥

मतान्तरमुक्तं यामले यथा—

सविन्दुवर्णं मुच्चार्य्य पश्चात् मन्त्रजपेत् सुधीः । क्षमेरुकं जल्पयित्वा जपेत्तन्नातिलङ्घयेत् ॥ अनुलोमविलोमस्थक्लृप्तया वर्णमालया

जप करै । मुण्डमाला में कहा है, नाड़ी द्वारा ग्रथित माला महासिद्धि विधान करती है । उसमें ही लिखा है हे वरवर्णिनि ! नवांगुलि परमित अस्थिमाला सर्व्वसिद्धि प्रदान और मोक्ष विधान करती है रक्तवस्त्र द्वारा नाड़ी संग्रथन करना चाहिये । जननी के उपपतिके समान सर्व्वदा यत्नपूर्वक इसको गुप्त रक्खे ।

वर्णमाला यथा—विशुद्धेश्वर महातंत्र में कहाहै, हे पार्व्वती ! यथायथ विधान से मालाविधान श्रवण करो । यह अतीव श्रेष्ठ विषय है । इसके अनुष्ठान मात्र से ही तत्काल सब मंत्र सिद्ध होते हैं । मंत्रदाता के विभेद अनुसार अनुलोम विलोम क्रमसे मंत्रद्वारा वर्णको और वर्ण द्वारा मंत्रको अंतरित करके 'वर्णमयीमाला बनावे । इसके द्वारा सम्पूर्ण मंत्र अनुप्राणित होते हैं । मेरुरूप चरम वर्णका कभी उल्लंघन न करै । हे यशस्विनि ! मैंने तुम्हारे निकट यह परम रहस्य कीर्त्तन किया । तुम इसको अत्यन्त गुप्त रक्खो । जिस किसीको प्रदान न करना यामल में अन्य प्रकार कहा है यथा-सिंदूर सहित वर्णोच्चारण पूर्व्वक फिर मंत्रका जप करे क्षरूपमेरुजल्पन पूर्व्वक जप कर-

जपेन्मेरुं समाश्रित्य लङ्घनं तस्य नाचरेत् ॥ अष्टोत्तरजपादादौ वर्गाष्टकं प्रयोजयेत् ।

अकचटतपयश इत्ययं चाष्टवर्गः ।

मुण्डमालायाञ्च–

मेरुहीना या माला मेरुलङ्घा च या भवेत् । अशुद्धातिप्रकाशाच्च सा माला निष्फला भवेत् ॥

अथ करमाला यथा ।

तदुक्तम्—बृहत्श्रीक्रमे—

तर्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत् । अनायामास्त्रयं पर्व तर्जनीमूलपर्वणि ॥ जपेदित्यर्थः ।

मुण्डमालायाञ्च–

अत्रांगुलिजपं कुर्य्यात् सांगुष्ठांगुलिभिर्जपेत् । अंगुष्ठेन विना कर्म कृतं तदफलं भवेत् ॥ आरभ्यानामिकामध्यात् प्रादक्षिण्यक्रमेण तु । तर्जनीमूलपर्य्यन्तं करमाला विधीयते मेरुं प्रदक्षिणीकुर्वन् अनामामूल पर्वतः । मेरुलङ्घनदोषात्तु अन्यथा जायतेफलम् ॥ मध्यमा त्रितयाग्राह्या अनामामूल मेव च । अनामामध्यपर्वात्र मेरुं कृत्वा न लङ्घयेत् ॥ तर्जन्यग्रे तथा मध्ये यो जपेत्तु भ्रमान्नरः । चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो बलम् ॥

ना चाहिये । उसको उल्लंघन न करै । मेरु अर्थात् सकार आश्रय करके अनुलोम विलोम का क्रमानुसार जप करै उनको उल्लंघन न करै । आदि में अष्टवर्ग अर्थात् अ, क, च, ट, त, प, य, श, प्रयोग करके अष्टोत्तर जप करै । मुण्डमाला में कहा है– मेरुहीनमाला जिस प्रकार अशुद्ध होने से निष्फल होती है, मेरुलंघा माला से भी इसी प्रकार कोई फल लाभ नहीं होता ।

करमाला यथा–बृहत् श्रीक्रम में कहा है, जो व्यक्ति तर्जनी के अग्र में वा मध्य में जप करता है वह पाप करता है । अपने तीन पर्व कनिष्ठा के तीन पर्व मध्यमा के तीन पर्व और तर्जनी का मूल पर्व, यह सब ही जप में प्रसिद्ध हैं । मुण्डमाला में कहा है– अगुली द्वारा जपकरै । अंगुष्ठ द्वारा जप करना चाहिये । अंगुष्ठ के बिना अनुष्ठित कर्म मात्रही निष्फल होता है । अनामिका के मध्यसे आरम्भ करके प्रादक्षिण्य क्रमसे तर्जनी के मूल पर्यन्त करमाला विहित होती है । अनामा के मूलपर्वमें मेरुकी प्रदक्षिणा करना चाहिये । मेरु के उलंघन करने से उस दोषसे विपरीत फल संघटित होताहै । मध्यमा त्रितय और अनामा का मूलपूर्व ग्रहण करै । अनामा के मध्य पर्व को मेरु करके उलंघन न करै । जो व्यक्ति भ्रम के वश होकर तर्जनी के अग्र और मध्य में जप

हंसपारमेश्वरेऽपि–

पर्वद्वयमनामायाः परिवर्त्तन वै क्रमात् । पर्वत्रयं मध्यमाया स्तर्जन्येकं समाहरेत् शक्तिमाला समाख्याता सर्वतन्त्र प्रदीपिका । नित्यं जपं करे कुर्य्यात् नतु काम्यं कदाचन ॥

मुण्डमालातन्त्रे च–

जपं नित्यं करे कुर्य्यात् न तु काम्यप्रबोधनात् । अयं क्रमो निशायां करणीयः ।

बलिपूजादिकं सर्वं निशायां क्रियते यदि । तत्तदक्षयतां याति कालीविद्याप्रसादतः ॥

कुलचूडामणौ च—

रात्रौ पर्य्यटनं कुर्य्याद् रात्रौ शक्तिप्रपूजनम् । न करोति कथं देवी साधकः कौलिको भवेत् ॥

तदुक्तं कालिकापुराणे—

छागन्तु वामतो दद्यान्महिषं वितरेत् पुः । दक्षिणे वामतो दद्याद् अग्रतो देहशोणितम् ॥ नाभेरधस्ताद्रुधिरं पृष्ठभागस्य वा प्रिये ! । स्वगात्ररुधिरं दद्यान्न कदाचित्तु साधकः ॥ नोष्ठस्य चिबुकस्यापि नेन्द्रियाणां तथैव च । कण्ठाधो नाभितश्चोर्द्ध्वं हृद्भागस्य प्रयत्नतः ॥ पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत् । न च रोगादिकादङ्गान्ना-

---

करता है उसकी आयु, विद्या, यश और बल यह चार नष्ट होते हैं । हंसपरमेश्वर में भी कहा है । परिवर्त्तन द्वारा क्रमानुसार पर्वद्वय, मध्यमा के तीन पर्व और तर्जनी का एक पर्व समाहृत करै । इसका नाम सर्वतंत्र प्रदीपिका शक्तिमाला है । करमाला से नित्य जप करै काम्यजप न करै । रात्र में इस प्रकार अनुष्ठान करै । बलि पूजादि संपूर्ण कर्म सर्वदा रात्रि में किये जाते हैं । कालीविद्या के प्रसाद से वह अक्षय होते हैं । कुलचूड़ामणि में कहा हैं, रात्रि में पर्यटन और रात्रि में ही शक्ती की पूजा करै । कालीपुराण में कहा है. बामदिशा में बकरी और भैंसा प्रदान करै. दक्षिण बाम और अग्र में देह का रुधिर प्रदान न करै । हे प्रिय ! नाभि के अधोभाग का और पृष्ठ देश का रुधिर प्रदान करै । अपने गात्र का रुधिर कभी प्रदान न करै; होठ, कमर और इन्द्रियगणों का भी रुधिर प्रदान नहीं करना चाहिये । कण्ठ का अधः और नाभि का ऊर्द्ध हृद्भाग का रुधिर और दोनों पार्श्व का रुधिर यत्न सहित देवी दुर्गा को निवे-

न्यथाताच्च भैरव ! ॥ सौवर्णे राजते पात्रे कांस्याधारे च मानवः । निधाय देव्यै दद्यात्तु तदुक्तं मन्त्रपूर्वकम् ॥ यदूयदू हृदयसं जातं मांसं रक्तविधानतः । तिलमुद्गप्रमाणं वा देव्यै दद्यात्तु भक्तितः ॥ षण्मासाभ्यन्तरे भक्तः काममिष्टमवाप्नुयात् ॥

कुमारीकल्पेऽपि—

नराश्छागास्तथा मेषा महिषाः शशकास्तथा । एतेषाञ्चैव रक्तानि देयानि परमेश्वरि ! ॥

मुण्डमालायाञ्च—

ईषद्रक्तं घृतेनाक्तं निशायां दिवसेऽपि वा बलिं दद्याद्विशेषेण कृष्णपक्षे शुभे दिने ॥ छागे दत्ते भवेद्वाग्मी मत्स्ये दत्ते कविर्ध्रुवम् । महिषे धनवृद्धिः स्यान्मृगे भोगफलं लभेत् ॥ खगे दत्ते समृद्धिः स्याद् गोधिकायां महाफलम् ॥ नरे दत्ते समृद्धिः स्या दिष्ट सिद्धिरनुत्तमा । ललाटहस्तहृदयशिरोभ्रूमध्यदेशतः ॥ स्वदेहरुधिरे दत्ते रुद्रदेह इवापरः । चाण्डालबलिदानेन महासिद्धिः प्रजायते ॥

ईषद्रक्तमिति मत्स्यमांसविशेषणं तत्प्रकरणस्थ लिखित वचनात् । नरबलिस्तु न विप्रेण विधेयः ।

दन करै । रोगादि युक्त अङ्ग का रुधिर कभी प्रदान न करै । स्वर्ण चांदी अथवा कांसी के पात्र में रुधिर स्थापन पूर्वक अभिमन्त्रित करके देवी को दान करै । इस प्रकार रक्तदान करने से भक्त दो महीने में इष्ट कामना लाभ करता है । कुमारीकल्प में भी कहा है । नर, बकरी, भेड़, भैंसा और ख़रगोश इन सबका रक्त प्रदान करै । मुण्डमाला में भी कहा है, दिन में वा रात्रि में विशेष करके कृष्णपक्ष और शुभ दिन में कुछ एक रक्तवर्ण घृताक्त बलिप्रदान करै । बकरी का दान करने से वाग्मी होता है, मत्स्य का दान करने से निश्चय कवि होता है भैंस का दान करने से धनवृद्धि होती है, मृग का दान करने से भोगफल लाभ होता है पक्षी का दान करने से समृद्धि संग्रह होती है । गोधिका दान करने के महाफल लाभ होता है. नरबली का दान करने से समृद्धि और अनुत्तम इष्टसिद्धि प्राप्त होजाती है ॥ ललाट, हस्त, हृदय, मस्तक, भ्रूमध्य इन सब स्थानों से अपने देह का रुधिर प्रदान करने पर द्वितीय रुद्र होता है । चांडाल के बलिप्रदान करने से महासिद्धि संगठित होती है । ऊपर जो कुछ एक रक्तवर्ण कहा गया वह मत्स्यमांस का विशेषण है तत् प्रकरण लिखित वचनानुसार ही वह प्रमाणित होता है । ब्राह्मण को नर बलिदेना निषिद्ध है । यह यामल में कहा है । यथा

तदुक्तं यामले—

राजा नरवलिं दद्यान्न्यान्योऽपि परमेश्वरि ! ।

तत्रापि न तु विप्रेण । ततो वक्ष्यमाणमन्त्रेण देवीं स्तुत्वा प्रदक्षि-प्रदक्षिणत्रयं विधायाष्टप्रणामं कुर्य्यात् ।

तदुक्तं कालीतन्त्रे—

ततो वै शिरासि पुष्पं दत्वाष्टाङ्गं प्रणम्य च ।

अथ प्रदक्षिणं यथा—

प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः । दक्षिणं दर्शयन् पार्श्वं मनसापि च दक्षिणः ॥ त्रिधा च वेष्टयेत् सम्यक् कालिकायाः प्रदक्षि-णम् । सर्वान् कामानवाप्नोति पश्चान्मोक्षमवाप्नुयात् ॥

अष्टाङ्गप्रणामो यथा—

दोर्भ्यां पद्भ्याञ्च पाणिभ्या मुरसा शिरसा दृशा । मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥

अशक्तौ प्रणामः यथा—

बाहुभ्याञ्च सजानुभ्यां शिरसा वचसा धिया । पञ्चाङ्गकः प्रणामः स्यादुदितः परिकीर्त्तितः ॥

ततः सामयिकैः सह पानादिकं कुर्य्यात् । यथा चक्राकारेण पंक्त्या-कारेण वा भिन्नासने साधकैः सह शक्तिभिश्च युग्मायुग्मक्रमेण पश्चा-

---

हे परमेश्वरि राजागण नरवलि प्रदान करैं । और कोई नहीं । इसी से लिखाजाता है, ब्राह्मण के पक्षमें नरवलिदान की विधि सिद्ध नहीं है ॥

अनन्तर वक्ष्यमाण मंत्र से देवी का स्तव और तीन प्रदक्षिणा करके अष्ट प्रणाम करै । जैसा कालीतंत्र में कहा है. अनन्तर मस्तक में पुष्प दान और अष्टाङ्ग, प्रणाम करके इत्यादि । तदनन्तर प्रदक्षिणा करे । यथा-दक्षिण हाथ पसार नम्र शिरा होकर दक्षिण पार्श्व प्रदर्शन पूर्व्वक मन मनमें कालिका देवी को प्रदक्षिणा के क्रम से तीन बार वेष्टन करे । तो सम्पूर्ण कामना की सिद्धि और पीछे मोक्षलाभ होती है । अष्टाङ्ग प्रणाम यथा-दो हाथ दो पैर दो पाणि मस्तक वक्ष,चक्षु,मन और वाक्य इन आठ अङ्गों सेप्रणाम करने को अष्टाङ्ग प्रणाम कहते हैं असमर्थ होने से प्रणाम यथा –दो बाहु और दो जानु, मस्तक वाक्य और बुद्धि इन पांच अङ्गों के द्वारा प्रणाम करने को पञ्चांग प्रणाम कहते हैं ।

अनन्तर सामयिक गणों के सहित पानादि करै । यथा-चक्राकार वा पंक्तिके आकार में भिन्नासन में साधकगणों के सङ्ग युग्म २ शक्ति सहित क्रमानुसार पश्चा-

सनेनोपविश्य सामयिक ललाटे चन्दनाक्षतं दत्त्वा शिवशक्तिबुद्धया पुष्पं दद्यात्। ततो यदि गुरुस्तिष्ठति तत्रादौ गन्धचन्दनपुष्पादिना तं प्रपूज्य तत् पात्रं तस्मै दत्त्वा प्रणमेत्। गुरोरभावे तत् पात्रं जले क्षिपेत्। ततः पात्रं शुद्धि सहितं शक्त्यै दत्त्वा सामयिकेभ्योऽपि ज्येष्ठानुक्रमेण वीरपात्रात् परामृतं शुद्धिसहितं दद्यात्। ततः सामयिकोऽपि भक्त्या हस्ताभ्यां गृहीत्वा मूलमन्त्रं तदुपरि अष्टधा जप्त्वा पूर्ववत् आनन्दभैरवानन्दभैरव्यौ सन्तर्प्य गुरुं देवताश्च तर्पयेत्। ततस्तु शुद्धिं कुर्य्यात्। ततश्चक्रनायकस्तैः सह पात्र वन्दनञ्चरेत्, श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृतप्लावितं क्षेत्राधीश्वरयोगिनीजनगणैः सिद्धैः समाराधितम्। आनन्दार्णवकं महात्मकमिदं यज्ञत्रिखण्डामृतं वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम्॥

इति अभिवन्द्य वामहस्तेन पात्रमुत्तोल्य वन्दनं कृत्वा गृह्णामीति गुरुशक्तिसाधकाज्ञां गृह्णीयात्। ते च जुषस्व इति ब्रूयुःततो मूलाधारात् कुण्डलिनीमिष्टदेवतास्वरूपां विभाव्य गुरुपादुकां स्मृत्वा शिवोऽहमिति विचिन्त्य हस्याभ्यां पात्रं गृहीत्वा मूलमन्त्रमुच्चरन् कुण्डलिनीमुखे देवतां तर्पयेत्।

सन पर विराजमान होकर ललाट में चन्दन और अक्षत प्रदान पूर्वक शिवशक्ति बुद्धि से पुष्प प्रदान करै। अनन्तर यदि गुरु हों, तो आदि में गन्ध, चन्दन और पुष्पादि द्वारा उनकी पूजा और वह पात्र उन को प्रदान करके प्रणाम करना चाहिये। गुरु का अभाव होने से वह पात्र जल में फेंकदे, फिर शुद्ध सहित पात्र शक्ति को दान करके सामयिकगणों को भी ज्येष्ठानुक्रम द्वारा वीरपात्र से परामृत शुद्धि सहित प्रदान करै। अनन्तर सामयिक भी भक्ति सहित दो हस्तद्वारा ग्रहण और उस के ऊपर अष्टवार मूलमंत्र जपकर पूर्व्व की समान आनन्द भैरव और आनन्द भैरवी दोनों का तर्पण करके गुरु और देवता का तर्पण करै। फिर शुद्धि विधान में प्रवृत्त होना चाहिये। तदनन्तर चक्रनायक उनके सहित पात्रकी वंदना करै। तिसकाल इस प्रकार कहना चाहिये, मैं यह कराम्बुजात विशुद्धिप्रद श्री प्रथम पात्र की वंदना करता हूं। श्रीमद्भैरव के शेखर में भलीभांति से शोभायमान चन्द्र के अमृत में यह पात्र आप्लावित है। क्षेत्र के अधीश्वर योगिनी जनगण और सिद्धगण इसकी आराधना करते हैं यह आनन्द का सागर है। इस प्रकार अभिवंदना करके बामहाथ में पात्र उठाय और वंदना करके "ग्रहण करता हूं" इस प्रकार कह गुरु शक्ति और साधक की आज्ञा ग्रहण करनी चाहिये। वह भी उपयोग करहैं इस प्रकार कहे। अनन्तर मूलाधार से इष्टदेवता स्वरूप कुण्डलिनी की भावना करके गुरु पादुका का

तदुक्तम् उदयाकरपद्धत्याम्–

कृत्वा मन्त्र तनुं स्मरेद् देवीकलां चिन्मयीं पश्चात् पात्रवरं परामृतयुतं दीपैर्युतं प्रोज्जलैः। पुष्पादिष्वभिमन्त्रितं च नियतं सन्मोहकन्चासवं ये संचिन्त्य पिबन्ति यान्ति खलु ते भुक्तिञ्च मुक्तिं पराम्।

तन्त्रान्तरे च–

सिन्दूरतिलकं भाले पाणौ च मदिरारसम् कृत्वा परगुरं ध्यायेत् तथा देवीञ्च चिन्मयीम्॥ इति॥

ततः पात्रमाधारोपरि संस्थाप्य पूर्ववत् पात्रं गृहीत्वा पात्रवन्दनं कुर्य्यात्।

हैमं मीनरसावहं दयितया दत्तञ्च पेयादिभिः किञ्चिच्चञ्चल रक्तपङ्कजदृशा तस्यै समावेदितम्। वामे स्वादुविशुद्धिशुद्धिकरणं पाणा विधायात्मके वन्दे पात्रमहं द्वितीयमधुना नन्दैकसंवर्द्धनम्॥

इत्यादिना पुनस्तेन च क्रमेण परामृतं गृहीत्वा पात्रवन्दनं यथा।

सर्वाम्नायकलाकलाप्रकलितं कौतूहलद्योतनं चन्द्रोपेन्द्रमहेन्द्रशम्भु वरुणब्रह्मादिभिः सेवितम्। ध्यातं देवगणैः परं मुनिगणैर्मोक्षार्थिभिः सर्वदा वन्दे पात्रमहं तृतीय मधुना स्वात्मावबोधक्षमम्॥

स्मरण अपनी शिवरूप में भावना, दोनों हाथों में पात्र ग्रहण और मूलमन्त्र उच्चारण पूर्व्वक कुण्डलिनी के मुख में अर्पण करै। उदयाकर पद्धति में जैसा कहा है, यथा– मन्त्रतनु विधानपूर्वक गुरुपद और चिन्मयी देव कलाका स्मरण करके फिर दीप और कज्जल युक्त परामृत समन्वित पात्रवर और पुष्पादि में अभिमन्त्रित सम्मोहक आसनकी चिन्ता करताहुआ उसका पान करने से निःसन्देह भुक्ति और मुक्ति लाभ होती है। तन्त्रांतर में भी कहा है। भाल में सिन्दूरका तिलक और पाणि में मदिरा रस कर के, परम गुरु और देवी चिन्मयी का ध्यान करै। अनन्तर आधार के ऊपर पात्र स्थापन और पूर्व की समान पात्र ग्रहण करके, पात्र की वंदना करनी चाहिये। तिस काल इस प्रकार करै, मैं अपने वाम पाणि में यह हेममय द्वितीय पात्र विधान पूर्वक वंदना करता हूं। यह मीन रसावह और दयिता कर्त्तृक प्रदत्त है। पेयादि द्वारा उस दयिता के कमल की समान नेत्र कुछ एक चंचल और रक्तवर्ण हुए हैं। मैंने उस को ही यह प्रदान किया। यह जिस प्रकार विशुद्धि और शुद्धि विधान करता है, इसी प्रकार एकमात्र आनन्द भी बढ़ाता है। यह कह इसके द्वारा क्रम से परामृत ग्रहण कर वक्ष्यमान विधान से तीसरे पात्र की वंदना करै। यथा- मैं इस तीसरे पात्र की

इति तृतीयपात्रम् ।

मद्यं मीनरसावहं हरिहरब्रह्मादिभिः पूजितं मुद्रामैथुनधर्मकर्मनिरतं क्षाराम्लतिक्ताश्रयम् । आचार्य्याष्टकसिन्धुभैरवकला मांसेन संशोधितं पायात् पञ्चमकारतत्त्वसहितं पात्रं चतुर्थं नमः ।

इति चतुर्थपात्रम् ।

आधारे भुजगाधिराजवलये पात्रं महीमण्डलं मद्यं सप्तसमुद्रवारिपिषितं चाष्टौ च दिग्दन्तिनः। सोऽहं भैरवमर्चयन् प्रतिदिनं तारागणैरन्वितैः आदित्यःप्रमुखैः सुरासुरगणै राज्ञाकरैः किन्नरैः ॥

इति पञ्चमपात्रम् ।

ततो यावन्न चलते दृष्टि र्यावन्न चलते मनः। तावत् पानं प्रकुर्वीत पशुपानमतः परम् ॥

अथ अस्य प्रमाणं यथा । तदुक्तं रुद्रयामले—

साधकेभ्यश्च शाक्तेभ्यो दद्यान्निर्माल्यचन्दनम् । सामयिकः समं कुर्य्यात् देवि ! पानादि भक्षणम् ॥

अन्यत्रापि—

निवसेच्चक्ररूपेण पंक्त्याकारेण वा यथा । शक्तियुक्तो वसेद्वापि-युग्मायुग्मविधानतः ॥ शिवशक्तिधियासर्वं चक्रमध्ये समर्चयेत् ॥

वन्दना करता हूं । यह सम्पूर्ण वेद और चौसठ कला में परिपुष्ट एवं कौतूहल उद्दीपित करता है । इन्द्र, उपेन्द्र, चन्द्र, शम्भु, वरुण और ब्रह्मादि इसके सेवक हैं देवगण और मोक्षार्थी मुनिगण सदा इसका ध्यान करते हैं । और इस के द्वारा स्वात्म बोध लाभ होता है । अनन्तर चौथेपात्र की वंदना करै यथा-इस पंच मकार में तत्त्व सहित चतुर्थ पात्र और मद्य को नमस्कार है यह सब को पालन करे । हरिहर ब्रह्मादि इस मीनरसावह पात्र और मद्य की पूजा करते हैं । इसमें क्षार, अम्ल और तिक्त तीनही हैं ! फिर पाँचवें पात्र की वंदना करै । यथा—यह आधार अनन्त का कुण्डलन स्वरूप है । यह पात्र उसमें मही मण्डल स्वरूपहै । यह मद्य उसमें सप्त सागर का जल स्वरूप है मैं प्रतिदिन आज्ञाकर और किङ्कर की समान आदित्यप्रमुख सुरासुरगण और तारागणों में स्थित होकर भैरव की पूजा करता हूं । यह कहकर पंचम पात्र पात्र की वंदना करै । अनन्तर जबतक दृष्टि चंचल मन चलायमान न हो तब तक पान करना चाहिये । इसके पीछे पशुपान होता है ।

इसका प्रमाण यथा—रुद्रयामल में कहा है, शाक्त साधकगणों को निर्मल चन्दन दान और सम्भाव में पानादि भक्षण कार्य करै । अन्यत्र भी कहा है चक्राकार वा

तन्त्रान्तरे च—

ततः पुष्पं समादाय गुरोः पात्रे निवेदयेत् । गुरवे च निवेद्याथ भूत्यै दत्त्वा स्वयं हरेत् ॥

भावचूड़ामणौ च—

साक्षाद्यदि गुरुर्नस्या त्तदा तोये विसर्जयेत् ॥

अत्र पात्रपरिमाणं यथा—तदुक्तम् कुलसारे—

नयनाग्निवाणसंख्य कर्षैस्तु परमेश्वरि । हेतुपात्रं प्रकर्त्तव्य मित्युक्तंकुलशासने ॥ इतोऽप्यधिकपात्रन्तु न कर्त्तव्यं हि साधकैः ॥

कर्ष लौकिकमित्यर्थः तदुक्तम् कुलोड्डीसे—

गुञ्जा द्वादशमासः स्या त्तदष्टौ कर्षमुच्यते ॥

अथ उत्तरतन्त्रे—

अनुज्ञां पुरतो लब्ध्वा गृह्णामीति स्वयं वदेत् । जुषस्वेत्यभ्यनुज्ञातो गुरुणा वा कुलीनकैः ॥ गृह्णीयाच्चस्वयं सिद्धो बद्धपद्मासनः सुधीः ॥

कुलार्णवे च—

एकासननिविष्टा ये भुञ्जीरन्नैकभाजने । नैकपात्रे पिबेयुश्च ते यान्ति नरकाधमे ॥

पंक्ति के आकार में शक्तियुक्त होकर, युग्म २ विधानसे उपवेशन और शिवशक्ति बुद्धि से चक्र में सब की भलीभाँति पूजा करै तंत्रान्तर में भी कहा है । अनन्तर पुष्प ग्रहण करके गुरु के पात्र में गुरुको निवेदन करके भूत के उद्देश से दान पूर्वक स्वयं संग्रह करै । भावचूड़ामणि में कहा है, साक्षात् यदि गुरु न हों तो जल में विसर्जन करै । पात्रको परिमाण यथा-कुलसार में कहा है, हे परमेश्वरि ! एकादश कर्ष परिमाण में हेतु पात्र प्रस्तुत करै कुलशासन में भी इसीप्रकार कहा है. साधक कभी इस की अपेक्षा अधिक पात्र प्रस्तुत न करै कुलोड्डीस में कहा है; बारगुञ्जा में एक मास, आठ मास में एक कर्ष ॥

उत्तरतन्त्र में कहा है, प्रथम अनुज्ञा लाभ करके 'स्वयं ग्रहण करता हूं' यह कहना चाहिये । फिर गुरु वा कुलीन गण कर्तृक अनुज्ञात हो पद्मासन बन्धन पूर्वक स्वयं ग्रहण करै, कुलार्णव में कहा है, जो एक आसनपर विराजमान है, वह एक पात्र में भी भोजन और एक पात्र में द्रव्यपान न करने से नरकधाम में गमन करते हैं । यहां- पर एकपात्र शब्द से यही समझना चाहिये कि सब मिलकर एकपात्र में पान करैं,

एकपात्र इति सर्वैर्मिलित्वा एकपात्रेण पिबेत् न तु वारं वारं द्रव्यपाने भिन्नं भिन्नं पात्रं कुर्य्यात् । अनुष्ठानापत्तेः । न कुर्य्यात् पात्रशङ्करमिति वचनविरोधात् । सम्प्रदायविरोधाच्च ।

विना मद्ये न या पूजा विना मांसेन तर्पणम् । विना शक्त्या च यत् पानं तत् सर्वं निष्फलं भवेत् ॥ स्वशक्तिं वीरशक्तिं वा दीक्षितां गुरुपूजनीम् । पाययित्वा पिबेद्द्रव्य मिति शाक्तस्य निर्णयः ॥ न पद्भ्यां च स्पृशेत् पात्रं न विन्दुं पातयेदधः । नैकहस्तेन दातव्यं न मुद्रावर्जितं पुनः ॥ नार्चयेदेकहस्तेन न पिबदेकपाणिना । अन्योन्य वन्दनं कृत्वा पिबेत्तदमृतं पुनः ॥ सव्येनोद्धृत्य पात्रन्तु मुद्रां कृत्वापसव्यतः । विना सङ्गेन योगेन न कुर्य्याद्द्रव्यसङ्गतिम् ॥ साधारं नोद्धरेत् पात्र माधारे च विनिक्षिपेत् । पात्रं न चालयेत् स्थानात् न कुर्य्यात् पात्रशङ्करम् सशब्दं न पिबेद्द्रव्यं तथैवं तं न पूरयेत् । न स्थूलं नैव सूक्ष्मञ्च पात्रं कुर्य्यात् मनोरमम् ॥ उच्छिष्टं न स्पृशेच्चक्रे-कुलद्रव्याणि सुन्दरि ! । वहिः प्रक्षाल्य च करौ कुलद्रव्याणि दापयेत् निष्ठीवनमधोवायुं चक्रमध्ये विवर्जयेत् । चक्रमध्ये घटे भग्ने पात्रे च पतिते भुवि ॥ दीपनाशे च शान्त्यर्थं श्रीचक्रं कारयेत् सुधीः । स्वपात्र-

---

बारम्बार द्रव्य पान के लिये पृथक् पृथक् पात्र प्रस्तुत न करैं । क्योंकि पात्र सङ्कर करना ठीक नहीं है, इस वचन के संग विरोध और सम्प्रदाय विरोध भी संघटित होता है । मद्य बिना पूजा मांस बिना तर्पण और शक्ति बिना पान सर्वथा निष्फल होता है अपनी शक्ति वा वीर शक्ति अथवा गुरुको पान कराकर स्वयं द्रव्यपान करै । यही शक्ति का निर्णय है । पद द्वारा पात्रस्पर्श वा बूँदें नीचे न गिरावे । एक हाथ से कभी न दे, और मुद्रा के बिना भी प्रदान न करे । एक हाथ से पूजा वा एक हाथ से पान भी नहीं करना चाहिये । परमेश्वर की वन्दना करके पुनर्वार वह अमृत पान करै । सव्य हाथ में पात्र लेकर और अपसव्य हाथ से मुद्रा विधान करके द्रव्यपान करना चाहिये । संग बिना और योग बिना कदापि पान न करै आधार के सहित पात्र न उठावे आधार में ही पात्र निक्षेप करै । स्वस्थानसे पात्रकी चालना और पात्र सङ्कर न करै । शब्दसहित द्रव्यपान वा शब्दसहित उसका पूर्ण न करै । जो बड़ा भी नहो और छोटा भी न हो इस प्रकार मनोहर पात्र निर्माण करै । हे सुंदरि ! उच्छिष्ट हाथ से चक्र मध्यस्थ कुल द्रव्य स्पर्श न करै । बाहिरे हाथ धोकर कुल द्रव्य दान करै । निष्ठीवन और अधोवायु चक्र में इनका व्यवहार न करै । चक्र में घट टूट जाने पर, पात्र

स्थितहेतुंच न दद्याद् भैरवाय च ॥ दत्ते च सिद्धिहानिः स्यात् क्रुद्धा भवति योगिनी । परिहासं प्रलापं च वितण्डां बहुभाषणम् ॥ औदासीन्यं भयं क्रोधं चक्रमध्ये विवर्जयेत् । नान्योन्यं ताड़येत् पात्रं न पात्रमानयेदधः ॥ गुरुशक्तिसुतानांच गुरुज्येष्ठ कनिष्ठयोः । उच्छिष्ट भक्षयेत् स्त्रीणां नान्योन्योच्छिष्टमर्पयेत् ॥ चक्रमध्ये च नियमं नान्यथा पतनं भवेत् । कनिष्ठानां स्वशिष्याणां दद्याच्चोच्छिष्टमेव हि ॥ दद्यात् स्नेहेन योऽन्येभ्योः स भवेदापदां पदम् ।

अन्यत्रापि—

शक्त्युच्छिष्टं पिवेद्द्रव्यं वीरोच्छिष्टञ्च चर्वणम् पीत्वा पीत्वा पुनः पीत्वा पुनः पतति भूतले ॥ उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ।

ततः शान्तिस्त्रोत्रं पठेत्। तदुक्तं डामरे—

पीत्वा पेयं जनैः सार्द्धं शान्तिस्त्रोत्रं ततः पठेत् । नश्यन्तु प्रेतकुष्माण्डाः नश्यन्तु दूषका नराः ॥ साधकानां शिवाः सन्तु आम्नायपरिपालनाम् । जयन्ति मातरः सर्वाः जयन्ति योगिनीगणाः ॥

गिरजाने पर और दीपक के बुझ जाने पर शान्ति के लिये श्रीचक्र बनाना चाहिये। अपने पात्रस्थ हेतु भैरव को प्रदान न करै। क्योंकि भैरव को प्रदान करनेसे सिद्धि की हानि और योगिनी क्रोधित होती हैं चक्र में यह सब बातें न करै यथा-हास्य, प्रलाप, वितण्डिता बहुत बोलना उदासीनता, भय और क्रोध परस्पर पात्र की ताड़ना और पात्र को अधस्थ न करै। गुरू उनकी शक्ति और कन्या गुरुका ज्येष्ठ और कनिष्ठ भ्राता और स्त्रीगणों की उच्छिष्ट भोजन करै। उनको कभी उच्छिष्ट प्रदान न करै। चक्र में इन सब नियमों का पालन करना चाहिये। पालन न करने से पतन होता है। अपने शिष्य के कनिष्ट होने से उस को उच्छिष्ट प्रदान करै। जो व्यक्ति स्नेह के वश होकर अन्य को प्रदान करता है, वह सम्पूर्ण आपदाओं का आस्पद होता है अन्यत्र भी कहा है शक्ति, और वीर का उच्छिष्ट द्रव्य पान चर्वण और भक्षण करै। वारम्बार पान करके पुनर्वार पान करै और पृथिवी में गिरैं फिर उठें और फिर पान करैं इस प्रकार पान करने से फिर जन्म ग्रहण करना नहीं पड़ता।

अनन्तर शान्तिस्तोत्र पाठ करना चाहिये। डामर में कहा है। यथा लोकोंके सहित पेय पानपूर्वक यह कह शान्ति स्तोत्र पाठ करै कि प्रेत और सम्पूर्ण कुष्मांड नष्ट हो दूषक लोक भी विनाश को प्राप्त हों, आम्नाय-पथवर्त्ती साधकगणों की जयहो, योगि-

गोपनीयं गोपनीयं न संशयः। गणरात्रे मुक्तकेशो नग्नः शक्तिसुसङ्गनः। रक्तचन्दनसिंदूरैस्तथा पंचोपकारकैः॥ मत्स्यमांससुराद्यैश्च ताम्बूलैश्च विशेषतः। पूजयित्वा महाकालीं महाकालरतातुराम्॥ तीर्थपानं विधायादौ ताम्बूलं भक्षयेत्ततः। भगलिंगामृतं मध्ये निवेदयेत् सुसाधकः। जपित्वा च महामंत्रं कालीरूपं मनोहरम्। मनसा चिंतयेत्कालीं पठन् स्तोत्रंतु साधकः। रक्षोयक्षपिशाचेभ्यो नित्यं रक्षाकरं परम्। प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते॥ दक्षिणे कालिके। मातुर्मुण्डमालाविभूषिते!। भक्तत्राणव्यग्रचित्ते! यमजाड्यं विनाशय। ज्वलच्चिताग्निमध्यस्थे! परिवारसमन्विते। त्वत्पदाम्भोजमापन्नं रक्ष मां पुत्रवत् सदा॥ महामेघच्छविन्यासे! मुक्तकेशि! चतुर्भुजे!। पाण्डित्यं कविताञ्चैव मह्यं देहि महेश्वरि!॥ वामोर्द्ध्वे च महाखड्गं विधारयसि शङ्करि! अधोलसच्छिन्नमुण्डे! मम विघ्नं विनाशय॥ अभयं दक्षिणे चोद्र्ध्वे तथाधःपाणिना वरम्। कण्ठसंसक्त मुण्डालि!

राज अति यत्नपूर्वक गुप्त रक्खै और पाठ करै। यह काली स्तोत्र मेरा परम प्रियतर है। इस कारण किसी के निकट इसका प्रकाश नहीं किया है। केवल तुम्हारे अनुरोध से ही इसको कहता हूं। इस का पाठ करने से समस्त पाप दूर होते हैं। हे राम! श्रवण करो, श्रवण करो, श्रवण करो। सदा गुप्त रक्खै, गुप्त रक्खै, गुप्त रक्खै। गणरात्रि में शक्ति के सहित नग्नवेश और मुक्तकेश होकर लाल चंदन, सिन्दूर, पंचविध उपचार विशेषतः मत्स्य, मांस और सुरादि व ताम्बूल प्रदान करने के पीछे महाकाल रतात्तुरा महाकाली की पूजा करके प्रथम तीर्थपान विधान, फिर ताम्बूल भक्षण और मध्य में लिङ्गामृत निदवेन करै। फिर कालीरूप मनोहर महामंत्र जपकर स्तोत्रपाठ सहित मन मन में देवी कालिका की चिंता करै। उस की यक्ष, राक्षस और पिशाच से यह स्तव नित्य रक्षा करता है। इस का पाठ करके ध्यान करने से देवी कालिका साधक को पुत्र भाव से अनुकम्पित करती हैं और उस के प्रति प्रसन्न होती हैं। इस प्रकार उन का स्तव करना चाहिये। हे दक्षिण कालिके! हे मातः! हे मुण्डमाला विभूषिते! हे भक्तत्राणव्यग्रचित्ते! मेरी यम यंत्रणा विनाश करो। हे प्रज्वलितचिताग्निमध्यस्थे! हे परिवारसमन्विते! मैं तुम्हारे चरणारविन्द की शरण हुआ हूं, मेरी सर्वदा पुत्र की समान रक्षा करो। हे महामेघस्वरूपिणि! हे मुक्तकेशि! हे चतुर्भुजे! हे महेश्वरी! मुझ को पाण्डित्य और कवित्व प्रदान करो। हे शंकरि! तुम बामोर्द्ध में महाखड्ग धारण करती हो। उस के अधोभाग में छिन्नमुण्ड

महाकालि! नमोऽस्तुते ॥ सततं त्वत्स्वरूपं ये स्मरन्ति साधकोत्तमाः। तेषां समस्तशास्त्रेषु गतिरव्याहता सदा ॥ चिन्तयामि च त्वन्नाम रक्ष मां सर्वतः सदा। दिगम्बरीं करालास्यां घोरदंष्ट्रां भयानकाम् ॥ कर्णमूले शवयुग्मां स्थूलतुङ्गपयोधराम्। महारौद्रीं महाघोरां श्मशानालयवासिनीम्। शवपाणिसमूहैश्च कृतकाञ्चीं हसन्मुखीम्। ओष्ठप्रान्तगलद्रक्तधाराविस्फुरिताननाम् ॥ मुण्डालीसंस्रवद्रक्तैः सर्वाङ्गचारुचर्चिताम्। शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् ॥ पूजाकाले पठेद् यस्तु सद्भावपुलको बुधः। स भवेत् कालिकापुत्र इति ख्यातिमुपागतः ॥ रजस्वलाभगं पश्यन् जप्त्वा काली महामनुम्। स्तवेनानेन संस्तुत्य साधकः किं न साधयेत् ॥ अष्टोत्तरशतं जप्त्वा योनिमामन्त्र्य मंत्रवित्। संगम्य पठनादस्य सर्वविद्येश्वरो भवेत्। मातेव दक्षिणा तस्य सर्वत्र हितकारिणी। तस्य देहे सदा काली वसेद्राम! न संशयः ॥ पूजाजपविहीनाय श्रीसुरानिंदकाय च। षण्मार्गस्य रोधकाय गुर्वभक्ताय सर्वदा। शृणु वत्स! प्रयत्नेन स्तवमेनं न दर्शयेत्। प्रमादाद्दर्शनाच्चापि तस्य सिद्धिर्भवेन्न हि ॥

इति कालिकापमरहस्ये कालीहृदये महाकालभैरवपरशुरामसंवादे श्रीदक्षिणकालिकास्तवः समाप्तः।

विलसित होता है। मेरे विघ्न विनाश करो। तुम्हारे दक्षिण हस्त के उर्ध्व में अभय और उस के अधोभाग में वर विराजमान है। तुम्हारे कंठदेश में मुण्डमाला लम्बायमान है। तुम्हीं महाकाली हो। तुम को नमस्कार है। जो साधकोत्तम सदा तुम्हारे स्वरूप की चिन्ता करते हैं, उन की समस्त शास्त्र में ही सर्वदा अव्याहतगति सञ्चारित होती है। इसीलिये। मैं तुम्हारे नाम की चिन्ता करता हूं मरी सम्यक प्रकार स सदा रक्षा करो। तुम्हीं दिगम्बरी तुम्हीं करालवदना और घोरदशना हो। तुम्हीं अत्यन्त भीषण स्वरूपा हो। तुम्हारे कर्ण में शव युग्म विराजमान हैं। तुम्हीं पीनोन्नतपयोधरा हो तुम्हीं महारौद्री और महाघोरा हो। तुम्हीं श्मशानालयनिवासिनी हो। तुम्हारे कटिदेश में शवपाणिसमूहनिर्मित काञ्चीदाम शोभापाता है। तुम्हारा बदनमण्डल सर्वदा हास्य विकसित है। तुम्हारे होंठ प्रान्त से रुधिर धारा निकलती है, तिस से तुम्हारा बदनमण्डल विकसित हो उठा है। तुम्हारा सर्वाङ्ग शव मुण्ड से बिगलित रुधिर धारा में चारु चर्च्चित है। शिवागण तुम को चारों ओर से घेरकर घोर रवसे शब्द करती हैं। जो व्यक्ति पूजा के समय सद्भाव के आवेश से पुलकित होकर इस स्तव का पाठ करता है, वह कालिका के पुत्र नाम से विख्यात होता है रजस्वलाका वराङ्ग देख, कालीका महामंत्र जप करता हुआ इस स्तव द्वारा स्तव करने से साधक का क्यासाधितनहीं होता? मंत्रवित् साधक अष्टोत्तर शत जप और योनि आमंत्रण करके,

तन्त्रान्तरोक्तकवचम् यथा—भैरव उवाच ।

कालिका या महाविद्या कथिता भुवि दुर्लभा । तथापि हृदये शल्यमस्ति देवि ! कृपां कुरु ॥ कवचन्तु महादेवि ! कथयस्वानुकम्पया । यदि नो कथ्यते मातर्विमुच्चामि तदा तनुम् ॥

देव्युवाच ।

शङ्कापि जायते वत्स ! तव स्नेहात् प्रकाश्यते । न वक्तव्यं न दातव्यमतिगुह्यतरं महत् ॥ कालिका जगतां माता शोकदुःखविनाशिनी । विशेषतः कलियुगे महापातकहारिणी ॥ काली मे पुरतः पातु पृष्ठतश्च कपालिनी । कुल्ला मे दक्षिणे पातु कुरुकुल्ला तथोत्तरे ॥ विरोधिनी शिरः पातु विप्रचित्ता च चक्षुषी । उग्रा मे नासिकां पातु कर्णौ चोग्रप्रभा तथा ॥ वदनं पातु मे दीप्ता नीला च चिबुकं तथा घना ग्रीवां सदा पातु बलाका बाहुयुग्मकम् ॥ मात्रा पातु करद्वन्द्वं वक्षो मुद्रा सदावतु मिता पातु स्तनद्वन्द्वं योनिमण्डलदेवताः ॥ ब्राह्मी मे जठरं पातु नाभिं नारायणी तथा ऊरू माहेश्वरी पातु चामुण्डा पातु लिङ्गकम् कौमारी च कटिं पातु जङ्घायुग्मं तथैव च । अपराजिता च पादौ मे वाराही पातु चांगुलीः ॥ सन्धिस्थानं नारसिंही पत्रस्था देवताऽवतु । रक्षाहीनञ्च यत् स्थानं वर्जितं कवचेन तु ॥ तत् सर्वं रक्ष मे देवि ! कालिके घोर दक्षिणे ! । ऊर्द्ध्वमधस्तथा दिक्षु पातु देवी स्वयं वपुः ॥ हिंस्रे-

---

इस स्तव का पाठ करने से समस्त विद्या का ईश्वर होता है । दक्षिण कालिका जननी की समान सर्वदा ही उस के हित का अनुष्ठान करती हैं । हे राम ! उस के देह में वह सदा वास करती हैं इस विषय में संदेह नहीं है । जो व्यक्ति पूजा नहीं करता जप नहीं करता वरन स्त्री और सुराकी निन्दा करता है एवं गुरु के प्रति भक्ति रहित और सन्मार्ग के बहिर्भूत है । हे वत्स ! सुनो, उस को कभी इस मंत्र का उपदेश न करै प्रमाद के वश उपदेश करने से कभी सिद्धि लाभ नहीं होती ।

तन्त्रान्तरोक्त कवच यथा-भैरव ने कहा, हे देवि ! यद्यपि तुम ने कालिका का पृथ्वीदुर्लभ महामंत्र कीर्त्तन किया, परन्तु तो भी मेरे हृदय में कांटा गड़ा हुवा है अतएव कृपा करनी चाहिये । हे महादेवि ! अनुग्रहपूर्वक कवचकीर्त्तन करो । हे मातः यदि आप कीर्त्तन न करैंगी, तो कलेवर परित्याग करूंगी ।

देवी ने कहा, हे वत्स ! यद्यपि मुझ को शंका उत्पन्न होती है, किन्तु तो भी तुम्हारे प्रति स्नेह प्रयुक्त होने से प्रकाश करती हूं । यह अति गुह्यतर महाकवच किसी के निकट नहीं कहना चाहिये और किसी को इस का प्रदान भी न करै ।

भ्यः सर्वदा पातु साधकञ्च जलाधिकात् । दक्षिणा कालिका देवी व्यापकं मे सदावतु ॥ इदं कवचमज्ञात्वा यो भजेद्घोरदक्षिणाम् । न पूजाफलमाप्नोति विघ्नस्तस्य पदे पदे ॥ कवचेनावृतो नित्यं यत्र तत्रैव गच्छति । तत्र तत्राभयं तस्य न क्षोभं विद्यते क्वचित् ॥

इति दक्षिणकालिकाकवचं समाप्तम् ।

अथ सहस्रनामस्तोत्रम् यथा—श्रीशिव उवाच ।

कथितोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः । यमासाद्य मया प्राप्तमैश्वर्यपदमुत्तमम् ॥ संयुक्तः परया भक्त्या यथोक्तविधिना भवान् । कुरुतामर्चनं देव्यास्त्रैलोक्यविजिगीषया ॥

श्रीराम उवाच ।

प्रसन्नो यदि मे देव ! परमेश ! पुरातन ! रहस्यं परमं देव्याः

कालिका जगत् की जननी और शोकदुःखविनाशिनी हैं। विशेष करके कलियुग में महापातक हारिणी हैं । काली मेरी सन्मुख रक्षा करें, कपालिनी मेरे पृष्ठ, कुल्ला, मेरे दक्षिणकुरुकुल्ला मेरे उत्तर, विरोधिनी मेरे मस्तक, विप्रचित्ता मेरे नेत्रयुगल, उग्रा मेरी नासिका, उग्रप्रभा मेरे कर्णयुगल, दीप्ता मेरे वदनमण्डल, नीला मेरी चिबुक, घना मेरी ग्रीवा, बलाका मेरी बाहुयुग्म, मात्रा करयुगल, मुद्रा वक्षस्थल और मितास्तनयुगल की सर्वदा रक्षा करें । ब्राह्मी मेरे जठर, नारायणी नाभि, माहेश्वरी दोनों ऊरू चामुण्डा लिंग, कौमारी कटि, और दोनों जघा, अपराजिता दोनों पैर, बाराही समस्त अँगुली और नारसिंही संधि स्थूल की रक्षा करें। मेरा जो स्थान रक्षाहीन और कवच वर्जित है, घोर दक्षिणा देवी कालिका उन समस्त स्थान की रक्षा करें । देवी स्वय ऊपर नीचे समस्त दिशाओं में हिंस्रगण और जल से मेरे कलेवर की रक्षा करें । देवी दक्षिण कालिका सर्वदा व्यापक भाव से मेरी रक्षा करें। जो व्यक्ति इस कवच को न जानकर, घोर दक्षिणा की भंजना करता है, उस को पूजा के फल की प्राप्ति नहीं होती और पद २ में विघ्न उपस्थित होता है । नित्य इस कवच में आवृत होकर जिस किसी स्थान में गमन क्यों न किया जाय, सर्वत्र ही अभय लाभ होता है, कहीं भी क्षोभ उपस्थित नहीं होता ।

॥ इति दक्षिणकालिका का कवच समाप्त ॥

अब देवी कालिका का सहस्रनाम स्तोत्र लिखा जाता है । श्री शिव ने कहा कालिका का यह सर्वमन्त्रोत्तम महामंत्र कथित हुआ है । मैंने इसी मंत्र को पाकर इसप्रकार सर्वोत्कृष्ट ऐश्वर्य पद लाभ किया है । तुम परम भक्तिसहित यथोक्त विधान अनुसार त्रैलोक्यजय की कामना से देवी की अराधना करो ॥

श्री राम ने कहा, हे परमेश ! हे पुरातन ! हे देव !! यदि आप मेरे प्रति प्रसन्न हैं ।

कृपया कथय प्रभो ! ॥ विर्नाचनं विना होमं विना न्यासं बिना वलिम् विना गन्धं विना पुष्पं विना नित्योदितां क्रियाम् ॥ प्राणायामं विना ध्यानं विना भूतविशोधनम्। विना दानं विना जापं येन काली प्रसीदति ॥

शिव उवाच।

पृष्टं त्वयोत्तमं प्राज्ञ ! भृगुवंशसमुद्भव !। भक्तानामपि भक्तोऽसि त्वमेव साधयिष्यसि ॥ देवीं दानवकोटिघ्नीं लीलया रुधिरप्रियाम्। सदा स्तोत्रप्रियामुग्रां कामकौतुकलालसाम् ॥ सर्वदानन्दहृदयामासवोत्सवमानसाम्। माध्वीकमत्स्यमांसानुरागिणीं वैष्णवीं पराम्॥ दयस्थिताम् ॥ तामुग्रकालिकां राम ! प्रसादयितुमर्हसि। तस्याः स्तोत्रं परं पुण्यं स्वयं काल्या प्रकाशितम् ॥ तव तत् कथयिष्यामि श्रुत्वा वत्सावधारय। गोपनीयं प्रयत्नेन पठनीयं परात्परम् ॥ यस्यैककालपठनात् सर्वे विघ्नाः समाकुलाः। नश्यन्ति दहने दीप्ते पतङ्गा इव सर्वतः ॥ गद्यपद्यमयीवाणी तस्य गङ्गाप्रवाहवत्। तस्य दर्शन मात्रेण

तो भली भांति अनुग्रह प्रदर्शन पूर्वक देवी कालिका का रहस्य कोर्त्तन कीजिये। बिना पूजा,, बिना होम, बिना न्यास, बिना वलि, बिना, गंध. बिना पुष्प, बिना नित्योदित क्रिया, बिना प्राणायाम, बिना ध्यान, बिना भूतशुद्धि, बिना दान, और बिना जप के जिस से काली प्रसन्न होती हैं, सो कहो ॥

शिव ने कहा भृगुवंश समुद्भव ! तुम भली भांति ज्ञान सम्पन्न हो। इसी लिये अति श्रेष्ठ प्रश्न किया है॥ तुम्हीं भक्तगणों में उत्तम हो। इस कारण तुम्हीं सिद्धि लाभ करागे। वह देवी कालिका लीला पूर्वक करोड़ २ दानवों का विनाश करती हैं। वह जिस प्रकार रुधिरप्रिय हैं; इसी प्रकार स्तव करने से अत्यन्त उललसित और परितुष्ट होती हैं। वह प्रचंड प्रकृति और काम कौतुक लालसा के वश वर्त्तिनी हैं। वह सदा सानंद हृदया और आसवोत्सव मानसा हैं, मधु, मांस और मत्स्यप्रिय, परमवैष्णवी श्मशानवासिनी प्रेतगणों के नृत्यमहोत्सवा, योगप्रभावा, योगेशी और योगीन्द्रगणों के हृदयका आश्रय करती हैं। हे राम ! तुम उन्हीं उग्र कालिकाका प्रसाद संग्रह करो उनका स्तोत्र परम पवित्र है। उन्होंने स्वयं उसका प्रकाश किया है। हे वत्स ! वह स्तोत्र मैं तुम से कहता हूं। तुम इस को अवधारण करो। तुम इस परात्पर स्तोत्र का अत्यन्त यत्न सहित पाठ और गुप्त रखकर इसकी रक्षा करो। इस स्तोत्र के एक कालीन पठनमात्रसेही सम्पूर्ण विघ्न समाकुल होते हैं। और प्रज्वलित अग्निमें पतित पतंगकी समान तत्काल नष्ट होतेहैं। पाठकके मुखसे गंगाप्रवाहकी समान गद्यपद्य मयी वाणी अनर्गल निकलती है, उसके दर्शन मात्र से ही समस्त वादी निष्प्रभ (प्रभाहीन)

वादिनो निष्प्रभां गता ॥ तस्यहस्ते सदैवास्ति सर्वसिद्धिर्न संशयः । राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ? ॥ निशीथे मुक्तकेशस्तु नग्नः शक्तिसमाहितः । मनसा चिंतयेत् कालीं महाकालेन लालिताम् ॥ पठेत् सहस्रनामाख्यं स्तोत्रं मोक्षस्य साधनम् । प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते ॥ यथा ब्रह्मामृतैर्ब्रह्मकुसुमैः पूजिता परा ॥ प्रसीदति तथानेन स्तुता काली प्रसीदति ॥

अस्य श्रीदक्षिणकालिकासहस्रनामस्तोत्रस्य महाकालभैरव ऋषिस्त्रिष्टुप्छन्दः श्मशानकाली देवता धर्मार्थकाममोक्षार्थे विनियोगः

ओं श्मशानकालिका काली भद्रकाली कपालिनी । गुह्यकाली महाकाली कुरुकुल्ला विरोधिनी ॥ कालिका कालरात्रिश्च महाकाल नितम्बनी । कालभैरवभार्या च कुलवर्त्मप्रकाशिनी ॥ कामदा कामिनी कन्या कमनीयस्वरूपिणी । कस्तूरीरसलिप्ताङ्गी कुञ्जरेश्वरगामिनी ॥ ककारवर्णसर्वाङ्गी कामिनी कामसुन्दरी । कामार्त्ता कामरूपा च कामधेनुः कलावती ॥ कान्ता कामस्वरूपा च कामाख्या कुलकामिनी । कुलीना कुलवत्यम्बा दुर्गा दुर्गतिनाशिनी ॥ कौमारी कुलजा कृष्णा कृष्णदेहा कृशोदरी । कृशाङ्गी कुलिशाङ्गी च क्रीङ्कारी कमला कला ॥

होते हैं और निसंदेह समस्त सिद्धि उसके करगत होती हैं। अपर मनुष्य की बात क्या कहूं, राजागण भी उसके दास होते हैं। निशीथ (आधी रात) समय शक्ति के सहित मिलित होकर मुक्तकेश और नग्न वेश से मन मन में महाकाल ललिता देवी कालिका की चिन्ता करे। अनन्तर जो मोक्ष प्राप्तिका अद्वितीय उपाय है, उसी सहस्र नामाख्यस्तोत्र के पाठ में प्रवृत्त होना चाहिये। तो देवी कालिका प्रसन्न होकर उसपर पुत्रभाव से कृपा करती हैं। ब्रह्मामृत और कुसुम द्वारा पूजा करने से वह परादेवी जिस प्रकार प्रसन्न होती हैं। इस स्तोत्र के द्वारा स्तव करने से भी उसी प्रकार संतुष्ट होती हैं। श्री दक्षिण कालिकाके इस सहस्रनामस्तोत्र का ऋषि महाकाल भैरव, छन्दः तृष्टुप, देवता श्री श्मशान कालिका और धर्मार्थ कामार्थ में विनियोग जानना चाहिये प्रथम ओं उच्चारण करके, फिर सहस्र नाम कीर्त्तन करे । सहस्रनाम यथा—श्मशान कालिका, काली भद्रकाली, कपालिनी, गुह्यकाली महाकाली, कुरुकुल्ला, विरोधिनी कालिका, कालरात्रि, महाकाल, नितम्बिनी, काल भैरव भार्य्या, कुलवर्त्म प्रकाशिनी कामदा, कामिनी, कन्या, कमनीय, स्वरूपिणी, कस्तूरी रसलिप्ताङ्गी, कुञ्जरेश्वर गामिनी ककार वर्ण, सर्वाङ्गी, कामिनी, कामसुन्दरी कामार्त्ता, कामरूपा, कामधेनु, कलावती कान्ता, कामस्वरूपा, कामाख्या, कुलकामिनी, कुलीना कुलवती, अम्बा, दुर्गा, दुर्गतिनाशिनी, कौमारी, कुलजा कृष्णा कृष्णदेहा कृशोदरी, कृशाङ्गी, कुलिशाङ्गी, क्रीङ्कारी

करालास्या कराली च कुलकान्ता पराजिता । उग्रा उग्रप्रभा दीप्ता विप्रचित्ता महावला ॥ नीला घना मेघनादा मात्रा मुद्रा सितामिता। ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सला ॥ माहेश्वरी च चामुण्डा वाराही नारसिंहिका वज्राङ्गी वज्रकङ्काला नृमुण्डस्रग्विणी शिवा ॥ मालिनी नरमुण्डाली गलद्रक्तविभूषणा । रक्तचन्दनसिक्ताङ्गी सिंदूरारुणमस्तका ॥ घोररूपा घोरदंष्ट्रा घोरा घोरतरा शुभा । महादंष्ट्रा महामाया सुदती युगदन्तुरा ॥ सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना । शारदेन्दुप्रसन्नास्या स्फुरत्स्मेराम्बुजेक्षणा ॥ अट्टहासा प्रफुल्लास्यास्मेरवक्त्रा सुभाषिणी । प्रफुल्लपद्मवदना स्मितास्या प्रियभाषिणी ॥ कोटराक्षी कुलश्रेष्ठा महती बहुभाषिणी । सुमतिः कुमतिश्चण्डा चण्मुण्डातिवेगिनी ॥ प्रचण्डा चण्डिका चण्डी चर्चिता चण्डवेगिनी । सुकेशी मुक्तकेशी च दीर्घकेशी महाकचा प्रेतदेहःकर्णपूरा प्रेतपाणिसुमेखला । प्रेतासना प्रियप्रेता प्रेतभूमिकृतालया ॥ श्मशानवासिनी पुण्या पुण्यदा कुलपण्डिता । पुण्यालया पुण्यदेहा पुण्यश्लोका च पावनी । पूता पवित्रा परमा परा पुण्यविभूषणा । पुण्यनाम्नी भीति हरा वरदा खड्गपाशिनी ॥ नृमुण्डहस्ता शान्ता च

कमला, कला, करालास्या कराली, कुलकान्ता अपराजिता उग्रा उग्रप्रभा दीप्ता विप्रचित्ता, महावला, नीला घना, मेघनादा, मात्रा, मुद्रा, मिता, असिता, ब्राह्मी, नारायणी, भद्रा, सुभद्रा, भक्तवत्सला, माहेश्वरी, चामुण्डा, वाराही, नारसिंही, वलाङ्गी, वज्रकङ्काला, नृमुण्डमालिनी, शिवा, मालिनी, नरमुण्डाली, गलद्रक्तविभूषणा रक्तचंदन दिग्धांगी, सिन्दूरारुणमस्तका, घोररूपा, घोरदंष्ट्रा, घोरा, घोरतरा, शुभा, महादंष्ट्रा, महामाया, सुदती, युगदन्तरा, सुलोचना, विरूपाक्षी, विशालाक्षी, त्रिलोचना, शरदेन्दु, प्रसन्नास्या स्फुरत् स्मेराम्बुजेक्षणा, अट्टहास्या, प्रफुल्लास्या, स्मेरवक्त्रा, सुभाषिणी, प्रफुल्लपद्मवदना, स्मितास्या, प्रियभाषिणी, कोटराक्षी, कुलश्रेष्ठा, महती, बहुभाषिणी, सुमति, कुमति, चण्डा, चण्ड मुण्डा, अतिवेगिनी, प्रचण्डा, चण्डिका, चण्डी, चर्चिता चण्डवेगिनी, सुकेशी, मुक्तकेशी, दीर्घकेशी, महाकचा, प्रेतदेह, कर्णपूरा प्रेतपाणि, सुमेखला, प्रेतासना प्रियप्रेता, प्रेतभूमि कृतालया, श्मशान वासिनी, पुण्या पुण्यदा, कुल पण्डिता, पुण्यालया, पुण्यदेहा, पुण्यश्लोका, पावनी, पूता, पवित्रा, परमा, परा, पुण्यविभूषणा, पुण्यनाम्नी, भीतिहरा, वरदा, खड्गपाशिनी, नृमुण्डहस्ता

छिन्नमस्ता सुनासिका । दक्षिणा श्यामला श्यामा शान्ता पीनोन्नतस्तनी ॥ दिगम्बरी घोररावा सृक्कान्तरक्तवाहिनी । घोररावा शिवासङ्गा निःसङ्गामदनातुरा ॥ मत्ताप्रमत्तामदनासुधासिंधु निवासिनी । अतिमत्ता महामत्ता सर्वाकर्षणकारिणी ॥ गीत प्रिया वाद्यरता प्रेतनृत्यपरायणा । चतुर्भुजा दशभुजा अष्टादशभुजा तथा । कात्यायनी जगन्माता जगतीपरमेश्वरी । जगद्बन्धुर्जगद्धात्री जगदानन्दकारिणी ॥ जगज्जीववती हैमवती माया महालया । नागयज्ञोपवीताङ्गी नागिनी नागशायिनी ॥ नागकन्या देवकन्या गान्धारी किन्नरी सुरी । मोहरात्री महारात्री दारुणा भा सुरासुरी ॥ विद्याधरी वसुमती यक्षिणी योगिनी जरा राक्षसी डाकिनी वेदमयी वेदविभूषणा॥ श्रुतिस्मृतिमहाविद्या गुह्यविद्यापुरातनी चिंताचिंता स्वधा स्वाहा निद्रातंद्राच पार्वती ॥अपर्णा निश्चलालोला सर्वविद्यातपस्विनी । गङ्गा काशी शची सीता सती सत्यपरायणा। नीतिः सुनीतिः सुरुचिस्तुष्टिः पुष्टिर्धृतिः क्षमा । वाणी बुद्धिर्महालक्ष्मीर्लक्ष्मीर्नीलसरस्वती॥ स्रोतस्वती स्रोतवती मातङ्गी विजया जया । नंदी सिंधुः सर्वमयी तारा शून्यनिवासिनी ॥ शुद्धा तरङ्गिणी मेधा लाकिनी बहुरूपिणी । सदानन्दमयी सत्या

शान्ता छिन्नमस्ता, सुनासिका, दक्षिणा, श्यामला, श्यामा, शांता पीनोन्नतस्तनी, दिगम्बरी, घोररावा, सृक्कांतरक्तवाहिनी, घोररावा, शिवासंगा, निसंगा, मदनातुरा, मत्ता प्रमत्ता, मदना, सुधासिन्धु निवासिनी अतिमत्ता, महामत्ता, सर्वाकर्षण, कारिणी गीतप्रिया, वाद्यरता, प्रेतनृत्यपरायणा, चतुर्भुजा, दशभुजा अष्टादश भुजा, कात्यायनि जगन्माता, जगती, परमेश्वरी, जगद्बन्धु, जगद्धात्री जगदानन्द, कारिणी, जगज्जीववती हेमवती, माया, महालया, नागयज्ञो,पवीताङ्गी, नागिनी, नागशायिनी, नागकन्या, देवकन्या, गान्धारी, किन्नरी, सुरी, मोहरात्रि, महारात्रि, दारुणाभा, सुरासुरी, विद्याधरी, बसुमती, यक्षिणी, योगिनी, जरा राक्षसी, डाकिनी वेदमयि वेदभूषणा, श्रुति, स्मृति, महाविद्या, गुह्यविद्या, पुरातनी, चिन्ता, अचिन्ता; स्वधा, स्वाहा निद्रा, पार्वती, अपर्णावानिश्चला, लोला, सर्वविद्या, तपस्विनी, गङ्गाकाशी, शची, सीता, सती, सत्यपरायणा नीति, सुनीति, सुरुचि, तुष्टि, पुष्टि, धृति, क्षमा, वाणी, बुद्धि, महालक्ष्मी, लक्ष्मी नील-सरस्वती, स्रोतस्वती, स्रोतवती, मातङ्गी, विजया, जया, नदी, सिन्धु, सर्बमयी, तारा, शून्य निवासिनी, शुद्धा, तरंगिणी, मेधा, लाकिनी, बहुरूपिणी, सदानन्दमयी, सत्या, सर्वानन्द, स्वरूपिणी. सुनंदा. नन्दिनी स्तुत्या, स्तवनीया. स्वभाविनी. रङ्किणी. टंकिणी

सर्वानन्द स्वरूपिणी ॥ सुनन्दा नन्दिनी स्तुत्या स्तवनीया स्वभाविनी रङ्किणी टङ्किनी चित्रा विचित्रा चित्ररूपिणी । पद्मा पद्मालया पद्ममुखी पद्मविभूषणा ॥ शाकिनी हाकिनी क्षान्ता राकिणी रुधिरप्रिया भ्रान्तिर्भवानी रुद्राणी मृडानी शत्रुमर्दिनी ॥ उपेन्द्राणी महेशानी ज्योत्स्ना चेन्द्रस्वरूपिणी । सूर्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान् ॥ शक्तिः सूक्तिर्मतिर्मती भुक्तिर्मुक्तिः पतिव्रता । सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा ॥ सर्वज्ञा सिद्धिदा सिद्धा भाव्या भव्या भयापहा । कर्त्री हर्त्री पालयत्री शर्वरी तामसी दया ॥ तमिस्रा यामिनीस्था च स्थिरा धीरा तपस्विनी । चार्वङ्गी चञ्चलालोल जिह्वा चारुचारिणी ॥ त्रपा त्रपावती लज्जा निर्लज्जा ह्रीं रजोवती । सत्त्ववती धर्मनिष्ठा श्रेष्ठा निष्ठुरवादिनी ॥ गरिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसीघृणा । भीमा भयानका भीमा नादिनी भीः प्रभावती । वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुःप्रिया । ऋक्सामाथर्वनिलया रागिणी शोभनस्वरा ॥ कलकण्ठी कम्बुकण्ठी वेणुवीणापरायणा । वंशिनी वैष्णवी स्वच्छा धात्री त्रिजगदीश्वरी ॥ ॥ मधुमती कुण्डलनी ऋद्धिः सिद्धिः शुचिस्मिता । रम्भोर्वशी रतीरामा रोहिणी रेवती रमा ॥ शङ्खिनी

चित्रा. विचित्रा. चित्ररूपिणी. पद्मा. पद्मालया. पद्ममुखी. पद्मविभूषणा हाकिनी. शान्ता राकिनी. रुधिर प्रिया. भ्रान्ति. भवानी. रुद्राणी. मृडानी. शत्रुमर्दिनी. उपेंद्राणी. महेशानी ज्योत्स्ना. इन्द्रस्वरूपिणी, सूर्यात्मिका. रुद्रपत्नी. रौद्री. स्त्री प्रकृति. पुमान. शक्ति. सूक्ति मतिमती. भुक्ति. मुक्ति. पतिव्रता. सर्वेश्वरी. सर्व माता. शर्वाणी. हरवल्लभा. सर्वज्ञा. सिद्धिदा. सिद्धा. भाव्या. भव्या. भयापहा. कर्त्री. हर्त्री. पालयित्री. शर्वरी. तामसी. दया. तमिस्रा. यामिनीस्था स्थिरा. धीरा. तपस्विनी. चर्वंगी. चंचला. लोलजिहवा. चारुचरित्रिणी. त्रपा. त्रपावती. लज्जा. निर्लज्जा. ह्रीं. रजोवती. सत्ववती. धर्मनिष्ठा. श्रेष्ठा. निष्ठुरवादिनी. गरिष्ठा. दुष्टसंहित्री. विशिष्टा. श्रेयसी घृणा. भीमा. भयानका. भीमनादिनी, भी. प्रभावती. वागीश्वरी. श्री. यमुना. यज्ञकर्त्री. यजुःप्रिया. ऋक्सामाथर्वनिलया. रागिणी, शोभनस्वरा. कलकण्ठी. कम्बुकण्ठी. वेणुवीणापरायणा वंशिनी. वैष्णवी. स्वच्छा. धात्री. त्रिजगदीश्वरी. मधुमति. कुण्डलिनी. ऋद्धि. सिद्धि. शुचिस्मिता. रम्भा. उर्वशी. रति. रामा. रोहिणी. रेवती. रमा. शंखिनी. चक्रिणी. कृष्णा. नन्दिनी. पद्मिनी. शूलिनी. परिघास्त्रा. पाशिनी. शार्ङ्गपाणिनी. पिनाकधारिणी. धूम्रा. शरभोत्तनमालिनी. वज्रिणी. समरप्रीता.

चक्रिणी कृष्णा गादिनी पद्मिनी तथा । शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी ॥ पिनाकधारिणी धूम्रा शरभी वनमालिनी । वज्रिणी समरप्रीता वेगिनी रणपण्डिता ॥ जटिनी विम्बनी नीला लावण्याम्बुधिचन्द्रिका । बलिप्रिया सदापूज्या पूर्णा दैत्येन्द्रमाथिनी ॥ महिषासुरसंहन्त्री वासिनी रक्तदन्तिका । रक्तपा रुधिराक्ताङ्गी रक्तखर्परहस्तिनी ॥ रक्तप्रिया मांसरुचिरा सवासक्तमानसा । गलच्छोणितमुण्डालिकण्ठमालाविभूषणा ॥ शवासना चितान्तस्था माहेशी वृषवाहिनी व्याघ्रत्वगम्बरा चीनचेलिनी सिंहवाहिनी ॥ वामदेवी महादेवी गौरी सर्वज्ञभाविनी बालिका तरुणी वृद्धा वृद्धमाता जरातुरा शुभ्र बिलासिनी ब्रह्मवादिनी ब्राह्मणी मही । स्वप्नावती चित्रलेखा लोपामुद्रा सुरेश्वरी ॥ अमोघाऽरुन्धती तीक्ष्णा भोगवत्यनुवादिनी । मन्दाकिनी मन्दहासा ज्वालमुख्यसुरान्तका ॥ मानदा मानिनी मान्य माननीया मदोद्धता । मदिरा मदिरोन्मादा मेध्या नव्या प्रसादिनी ॥ सुमध्यानन्तगुणिनी सर्वलोकोत्तमोत्तमा । जयदा जित्वरा जेत्री जयश्रीर्जयशालिनी ॥ सुखदा शुभदा सत्या सभासंक्षोभकारिणी शिवदूती भूति मती विभूतिर्भीषणानना ॥ कौमारी कुलजा कुन्ती कुलस्त्री कुलपालिका कीर्त्तिर्यशस्विनी भूपा भूष्या

वेगिनी. रणपण्डिता. जटिनी. विम्बनी, नीला. लावण्याम्बुधि. चन्द्रिका, बलिप्रिया, सदापूज्या, पूर्णा, दैत्येंद्रमन्थिनी, महिषासुर संहन्त्री, वासिनी, रक्तदंतिका, रक्तहा रुधिरांगी, रक्तखर्परहस्तिनी, रक्तप्रिया, मांसरुचि,आसवासक्तमानसा, गलच्छोणितमुण्डालो कंठमालाविभूषणा, शवासना, चितान्तस्था माहेशी वृषवाहिनी,व्याघ्रत्वगम्बरा, चीन चेलिनी, सिंहबाहिनी, वामदेवी, महादेवी गौरी, सर्वज्ञभाविनी, बालिका, तरुणी, वृद्धा, वृद्धमाता, जरातुरा, सुभ्रू. विलासिनी, ब्रह्मवादिनी, ब्रह्माणी, मही, स्वप्नावती, चित्रलेखा लोपामुद्रा, सुरेश्वरी, अमोघा अरुन्धती, तीक्ष्णा, भोगवती, अनुवादिनी, मन्दाकिनी, मन्दहास्या, ज्वालामुखी, असुरान्तका, मानदा, मानिनी, मान्या, माननीया, मदोद्धता, मदिरोन्मादा, मेध्या, नव्या, प्रसादिनी, सुमध्या, अनन्तगुणिनी, सर्वलोकोत्तमा, जयदा. जित्वरा, जेत्री, जयश्री, जयशालिनी, सुखदा, शुभदा, सत्या, सभासंक्षोभकारिणी, शिवदूती, भूतिमती, विभूति, भीषणानना, कौमारी, कुलजा, कुन्ती, कुलस्त्री, कुलपालिका, कीर्ति यशस्विनी, भूपा, भूष्या, भूतपातप्रिया, सगुणा, निर्गुणा, धृष्टा, निष्ठा, प्रतिष्ठिता, धनिष्ठा, धनदा, धन्या, वसुधा, स्वप्रकाशिनी, ऊर्व्वी गुर्व्वी, गुरुश्रेष्ठा, सगुणा त्रिगुणात्मिका,महाकुलीना, निष्कामा, सकामा, कामा, कामो-

भूतपतिप्रिया ॥ सगुणा निर्गुणा धृष्टा निष्ठा काष्टा प्रतिष्ठिता । धनिष्टा धनदा धन्या वसुधा स्वप्रकाशिनी ॥ उर्वीगुर्वी गुरुश्रेष्ठा सगुणा त्रिगुणात्मिका महाकुलीना निष्कामा सकामाकामजीवना ॥ कामदेवकला रामाभिरामा शिवनर्त्तकी । चिन्तामणिकल्पलता जाग्रती दीनवत्सला ॥ कार्त्तिकी कीर्त्तिका कृत्या अयोध्या विषमा समा । सुमत्रा मंत्रिणी घूर्णा ल्हादिनी क्लेशनाशनी ॥ त्रैलोक्यजननी हृष्टा निर्मांसा मनोरूपिणी । तड़ागनिम्नजठरा शुष्कमांसास्थिमालिनी ॥ अवन्ती मथुरा माया त्रैलोक्यपावनीश्वरी । व्यक्ताव्यक्ता नेकमूर्त्तिः शर्वरी भीमनादिनी ॥ क्षेमङ्करी शङ्करी च सर्व सन्मोह कारिणी । ऊर्द्धतेजस्विनी क्लिन्ना महातेजस्विनीतथा ॥ अद्वैता भोगिनी पूज्या युवती सर्वमङ्गला । सर्वप्रियङ्करी भोग्या धरणी पिशिताशना । भयङ्करी पापहरा निष्कलङ्का वशङ्करी आशा तृष्णा चन्द्रकला निद्रान्या वायुवेगिनी ॥ सहस्रसूर्य्यसङ्काशा चन्द्रकोटिसमप्रभा । वह्निमण्डलसंस्था च सर्वतत्वप्रतिष्ठिता । सर्वाचारवती सर्व देवकन्याधिदेवता ।

जीविनी, कामकला, रामा, अभिरामा, शिवनर्त्तकी, चिंतामणिकल्पकला, जाग्रती, दीनवत्सला, कार्त्तिकी, कीर्त्तिका, कृत्या, अयोध्या, विषमा, समा, सुमन्त्रा मंत्रिणी, घूर्णा, ल्हादिनी, क्लेशनाशिनी, त्रैलोक्य जननी हृष्टा, निर्मांसा, मनोरूपिणीं. तडाग निम्नजठरा. शुष्कमांसास्थिमालिनी. अवन्ती. मथुरा. माया. त्रैलोक्यपावनी. ईश्वरी. व्यक्ताव्यक्ता. अनेकमूर्त्ति शार्वरी. भीमनादिनी. क्षेमङ्करी. सर्वसम्मोहकारिणी. ऊर्ध्वतेजस्विनी क्लिन्नामहातेजस्विनी. अद्वैता. भोगिनी, पूज्या. युवती, सर्वमंगला. सर्वप्रियङ्करी भोग्या. धरणी, पिशितासना. भयङ्करी. पापहरा. निष्कलंका. वशंकरी. आशा. तृष्णा. चंद्रकला. निद्रा. वायुवेगिनी. सहस्र सूर्य. संकाशा. चंद्रकोटिसमप्रभा. वन्हिमंडलसंस्था. सर्वतत्वप्रतिष्ठिता. सर्वाचारवती. सर्वदेवकन्या. अधिदेवता. दक्षकन्या. दक्षयज्ञनाशिनी. दुर्गतारका. इज्या. पूज्या. विभीभूति. सत्कीर्त्ति. ब्रह्मरूपिणी. रंभोरु, चतुरा. राका जयंती करुणा. कुहु. मनस्विनी. देवमाता. यशस्या. ब्रह्मचारिणी. ऋद्धिदा. वृद्धिदा वृद्धि. सर्वदा. सर्वदायिनी. आधाररूपिणी ध्येया. मूलाधारनिवासिनी. आज्ञा. प्रज्ञा. पूर्णमना. चंद्रमुखी. अनुकूलिनी. वावदूका. निम्ननाभि सत्या. संध्या. दृढ़व्रता. आन्वीक्षिकी दण्डनीति. त्रयी. त्रिदशसुंदरी. ज्वलिनी. शैलतनया. विंध्यवासिनी. अमेया. खेचरी,

दक्षकन्या दक्षयज्ञ नाशिनी दुर्गतारिका ॥ इज्या पूज्या विभीर्भूतिः सत्कीर्त्तिर्ब्रह्मरूपिणी । रम्भोरुश्चतुरा राका जयन्ती करुणा कुहुः ॥ मनस्विनी देवमाता यशस्या ब्रह्मचारिणी ऋद्धिदा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी ॥ आधाररूपिणी ध्येया मूलाधारनिवासिनी । आज्ञा प्रज्ञापूर्ण मना श्चन्द्रमुख्यनुकूलिनी ॥ वावदूका निम्ननाभिः सत्या सन्ध्या दृढ़व्रता । आन्वीक्षिकी दण्डनीतिस्त्रयी त्रिदिवसुन्दरी ॥ ज्वलिनी ज्वालिनी शैल तनया विन्ध्यवासिनी अमेया खेचरी धैर्य्या तुरीया विमलातुरा ॥ प्रगल्भा वारुणीच्छाया शशिनी विस्फुलिङ्गिनी भुक्तिः सिद्धिः सदाप्राप्तिः प्राकाम्या महिमाणिमा ॥ इच्छासिद्धिर्विसिद्धा च वशित्वोर्ध्वनिवासिनी । लघिमा चैव गायत्री सावित्री भुवनेश्वरी मनोहरा चिता दिव्या देव्युदारा मनोरमा । पिङ्गला कपिला जिह्वारसज्ञा रसिका रसा ॥ सुषुम्नेड़ा भोगवती गान्धारी नरकान्तका । पाञ्चाली रुक्मिणी राधा राध्या भीमाधिराधिका ॥ अमृता तुलसी

धैर्या. तुरीया. विस्फुलिंगिनी. भुक्ति. सिद्धि. सदाप्राप्ति. प्राकाम्या. महिमा. अणिमा इच्छा. सिद्धि. विसिद्धा. वशित्वोर्द्धनिवासिनी. लघिमा. गायत्री. सावित्री. भुवनेश्वरी. मनोहरा. चिता. दिव्या. देवी. उदारा. मनोरमा. पिंगला. कपिला. जिह्वा. रसज्ञा. रसिका. रसा. सुषुम्ना. ईड़ा. भोगवती. गांधारी. नरकांतका. पाञ्चाली रुक्मणी. राधा. आराध्या. भीमा. अधिराधिका. अमृता. तुलसी. वृन्दा. कैटभी. कपटेश्वरी. उग्रचण्डेश्वरी. वीरा. जननी वीरसुंदरी, उग्रतारा. यशोदा. आख्या, दैवकी देवपालिता. निरञ्जना. चित्रदेवी. क्रोधिनी. कुलदीपिका. कुलवागीश्वरी. वाणी. मातृका. द्राविणी. द्रवा योगेश्वरी. महामारी. भ्रामरी विंदुरूपिणी. दूती. प्राणेश्वरी गुप्ता. बहुला. चामरी. प्रभा. कुब्जिका. ज्ञानिनी. ज्येष्ठा. भुशुण्डी. प्रकटा. अतिथि. द्रविणी. गोपनी. माया. कामबीजेश्वरी. क्रिया, शाम्भवी. केकरा; मेना. मुषलास्त्रा. तिलोत्तमा. अमेयविक्रमा. क्रूरा. सम्पत्शाला. त्रिलोचना. सुस्थी. हव्यवहा नीति. उष्मा. धूम्रार्चि. अङ्गदा तपिनी तापिनी. विश्वा भोगदा. धारिणी. धरा; त्रिखंडा बोधिनी. बश्या. सकला. शब्दरूपिणी. वीजरूपा. महामुद्रा. योगिनी. योनिरूपिणी. अनङ्गकुसुमा. अनंगमेखला. वज्रेश्वरी जयिनी. सर्वद्वन्द्वक्षयंकरी, षडङ्गयुवती. योगयुक्ता. ज्वालांशुमालिनी. दुराशया. दुराधारा. दुर्जया. दुर्गरूपिणी. दुरन्ता. दुष्कृतिहरा. दुर्ध्येया. दुरतिक्रमा. हंसेश्वरी.

वृन्दा कैटभी कपटेश्वरी । उग्रचण्डेश्वरी धीरा जननी वीरसुन्दरी ॥ उग्रतारा यशोदाख्या दैवकी देवमानिता निरञ्जना चित्रदेवी क्रोधिनी कुलदीपिका॥कुलवागीश्वरी वाणी मातृका द्राविणी द्रवा । योगेश्वरी महामारी भ्रामरी बिन्दुरूपिणी॥दूती प्राणेश्वरी गुप्ता बहुला चामरी-प्रभा । कुब्जिका ज्ञानिनीज्येष्ठा भूशुण्डी प्रकटा तिथिः द्रविणी गोपनी माया कामबीजेश्वरी क्रिया।साम्भवी केकरा मेना मूसलास्त्रा-तिलोत्तमा॥अमेयविक्रमा क्रूरा सम्पत्शाला त्रिलोचना सुस्थी हव्य-वहा प्रीतिरुष्मा धूम्रार्चिरङ्गदा तपिनी तापिनी विश्वा भोगदा धारिणी धरा । त्रिखंडा बोधिनी वश्या सकला शब्दरूपिणी ॥ बीजरूपा महा मुद्रा योगिनी योनिरूपिणी । अनङ्गकुसुमानङ्गमेखलानंगरूपिणी ॥ वज्रेश्वरी च जयिनी सर्वद्वन्द्वक्षयङ्करी षडङ्गयुवती योग युक्ता ज्वालां-शुमालिनी ॥ दुराशया दुराधारा दुर्जया दुर्गरूपिणी दुरन्ता दुष्कृति-हरा दुर्ध्येया दुरतिक्रमा हंसेश्वरी त्रिकोणस्था शाकम्भर्यनुकम्पिनी ।

त्रिकोणस्था. शाकम्भरी. अनुकम्पिनी. त्रिकोणनिलया. नित्या, परमामृतरञ्जिता. महाविद्येश्वरी. श्वेता. भेरुण्डा कुलसुंदरी. त्वरिता. भक्तसंसक्त. भक्तवश्या. सनातनी भक्तानंदमयी. भक्तभाविका. भक्तशङ्करी. सर्व्वसौंदर्यनिलया. सर्वसौभाग्यशालिनी. सर्व संभोगभवना. सर्व्वसौख्यनिरूपिणी. कुमारीपूजनरता. कुमारीव्रतचारिणी. कुमारीभक्ति सुखिनी. कुमारीरूपधारिणी. कुमारीपूजकप्रीता. कुमारीप्रीतिदा. प्रिया. कुमारीसेवका सङ्गा. कुमारीसेवकालया आनन्दभैरवी बालाभैरवी, बटुकभैरवी. कालभैरवी पुरभैरवी महाभैरवपत्नी. परमानंदभैरवी. सुधानंदभैरवी. उन्मादानंदभैरवी. मुक्तानंदभैरवी. तरुणभैरवी. ज्ञानानंदभैरवी. अमृतानंदभैरवी. महाभयङ्करी. तीव्रा. तीव्रवेगा. तपस्विनी. त्रिपुरा. परमेशानि. सुन्दरी; पुरंदरी. त्रिपुरेशी; पञ्चदशी. पञ्चमी पुरवासिनी. महासप्त-दशी.षोड़शी. त्रिपुरेश्वरी, महांकुशस्वरूपा. महाचक्रेश्वरी. नवचक्रेश्वरी. चक्रेश्वरी. त्रिपुरमालिनी. राजराजेश्वरी. धीरा. महात्रिपुरसुंदरी. सिंदूरपूरचिरा. श्रीमत्त्रिपुरसुं-दरी. सर्वाङ्गसुंदरी. रक्ता. रक्तवस्त्रोत्तरियिणी. जवायाकसिंदूररक्तचंदनधारिणी. जवा-यावक;सिंदूररक्तचंदनरूपधृक्. चामरो बालकुटिलनिर्मलाव्योमकेशिनी वज्रमौक्तिकरत्ना ढ्यकिरीटमुकुटोज्वला. रक्तकुण्डलसंसक्तस्फुरद्गण्डमनोहरा. कुञ्जरेश्वर कुम्भो त्थमुक्तारंजितनासिका. मुक्ताविद्रुममाणिक्यहाराढ्यस्तनमण्डला. सूर्य कांते-दुकांताढ्यस्पर्शश्मकंठभूषणा. बीजपरस्फुरद्बीजदंतपंक्ति. अनुत्तमा . का-

त्रिकोणनिलया नित्या परमामृतरञ्जिता ॥ महाविश्वेश्वरी श्वेता भेरुण्डा कुलसुन्दरी । त्वरिता भक्तिसंसक्ता भक्तवश्या सनातनी ॥ भक्तानन्दमयी भक्तभाविका भक्तशङ्करी । सर्वसौन्दर्य-निलया सर्वसौभाग्यशालिनी ॥ सर्वसंभोगभवना सर्वसौख्य-निरूपिणी । कुमारीपूजनरता कुमारीव्रतचारिणी ॥ कुमारीभक्ति-सुखिनी कुमारीरूपधारिणी । कुमारीपूजकप्रीता कुमारीप्रीतिदा प्रिया ॥ कुमारीसेवकासङ्गा कुमारी सेवकालया । आनन्दभैरवी बाला भैरवी वटुभैरवी । श्मशानभैरवी कालभैरवी पुरभैरवी । महाभैरव-पत्नी च परमानन्दभैरवी ॥ सुधानन्दभैरवी च उन्मादानन्दभैरवी । मुक्तानन्दभैरवी च तथा तरुणभैरवी ॥ ज्ञानानन्दभैरवी च अमृता-नन्दभैरवी । महाभयङ्करी तीव्रा तीव्रवेगा तपस्विनी ॥ त्रिपुरा परमे-शानी सुन्दरी पुरसुन्दरी । त्रिपुरेशी पञ्चदशी पञ्चमी पुरवासिनी ॥ महासप्तदशी चैव षोडशी त्रिपुरेश्वरी । महांकुशस्वरूपा च महाचक्रे-श्वरी तथा ॥ नवचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी । राजराजेश्वरी धीरा महात्रिपुरसुन्दरी ॥ सिन्दूरपूररुचिरा श्रीमत्त्रिपुरसुन्दरी । सर्वाङ्गसुन्दरी रक्ता रक्तवस्त्रोत्तरीयिणी ॥ जवा यावकसिंदूररक्तच-न्दन धारिणी । जवा यावक सिंदूररक्तचन्दन रूपधृ ॥ चामरी बाल-कुटिल निर्मलश्यामकेशिनी । वज्रमौक्तिकरत्नाढ्य किरीटमुकुटोज्वला ॥ रत्नकुण्डल संसक्तस्फुरद्गण्ड मनोरमा । कुञ्जरेश्वरकुम्भोत्थमुक्ता-रञ्जित नासिका ॥ मुक्ताविद्रुम माणिक्यहाराढ्यस्तन मण्डला । सूर्यकान्तेन्दुकान्ताढ्यस्पर्शाश्म कण्ठभूषणा ॥ बीजपूरस्फुरद्बीज दन्त-पंक्तिरनुत्तमा । कामकोदण्डकाभुग्नभ्रूकटाक्ष प्रवर्षिणी ॥ मातङ्ग कुम्भवक्षोजा लसत्कोकनदेक्षणा । मनोज्ञशष्कुलीकर्णा हंसीगति

मकोदण्डकाभुग्नभ्रूकटाक्षप्रवर्षिणी. मातङ्गकुंभवक्षोजा. लसत्कोकनदेक्षणा मनोज्ञश-ष्कुलीकर्णा. हंसीगतिविडम्बिनी. पद्मरागाङ्गदज्योतिर्दोश्चतुष्कप्रकाशिनी. नानामणिपरि-स्फूर्जत्शुद्धकाञ्चनकङ्कणा. नागेंद्रदंतनिर्माणवलयांकितिपाणिनी. अंगुरीयकचित्रांगी. विचित्रक्षुद्रघण्टिका. पट्टाम्बरपरीधाना. कलमञ्जीरशिञ्जनी. कर्पूरागरुकस्तूरीकुंकुमद्र-वलेपिता. विचित्ररत्नपृथ्वीकल्पशाखितलस्थिता. रत्नद्वीपस्फुरद्रक्तसिंहासनविलासिनी.

विडम्बिनी ॥ पद्मरागाङ्गद ज्योतिर्दोश्चतुष्क प्रकाशिनी । नानामणि परिस्फूर्जच्छुद्धकाञ्चन कङ्कना ॥ नागेन्द्रदन्तिनिर्माणवलयाङ्कितपाणिनी । अंगुरीयकचित्राङ्गी विचित्रक्षुद्रघण्टिका ॥ पट्टाम्बरपरीधाना कलमञ्जीरशिञ्जिनी । कर्पूरागुरुकस्तूरीकुङ्कमद्रवलेपिता ॥ विचित्ररत्नपृथिवीकल्पशाखितलस्थिता । रत्नद्वीपस्फुरद्रक्तसिंहासनविलासिनी ॥ षट्चक्रभेदनकरी परमानन्दरूपिणी । सहस्रदलपद्मान्तश्चन्द्रमण्डलवर्त्तिनी ॥ ब्रह्मरूपशिवक्रोड़नानासुखविलासिनी । हरविष्णुविरिञ्चीन्द्रग्रहनायकसेविता ॥ शिवा शैवा च रुद्राणी तथैव शिवावादिनी । मातङ्गिनी श्रीमती च तथैवानन्दमेखला ॥ डाकिनी योगिनी चैव तथोपयोगिनी मता । माहेश्वरी वैष्णवी च भ्रामरी शिवरूपिणी ॥ अलम्बुषा वेगवती क्रोधरूपा सुमेखला । गान्धारी हस्तिजिह्वा च ईडा चैव शुभङ्करी ॥ पिङ्गला ब्रह्मदूती च सुषुम्ना चैव गन्धिनी । आत्मयोनिर्ब्रह्मयोनिर्जगद्योनिरयोनिजा ॥ भगरूपा भगस्थात्री भगिनी भगरूपिणी । भगात्मिका भगाधाररूपिणी भगमालिनी ॥ लिङ्गाख्या चैव लिङ्गेशी त्रिपुराभैरवी तथा । लिङ्गगीतिः सुगीतिश्च लिङ्गस्था लिङ्गरूपधृक् ॥ लिङ्गमाना लिङ्गभवा लिङ्गलिङ्गा च पार्वती । भगवती कौशिकी च प्रेमा चैव प्रियंवदा । गृध्ररूपा शिवारूपा चक्रिणी चक्ररूपधृक् । लिङ्गाभिधायिनी लिङ्गप्रिया लिङ्गनिवासिनी ॥

षट्चक्रभेदनकरी. परमानन्दरूपिणी. सहस्रदलपद्मांतश्चंद्रमंडलवर्त्तिन. ब्रह्मरूपशिवक्रोड़ नानासुखविलासिनी. हरविष्णु. विरञ्चीन्द्रग्रहनायकसेविता. शिवा. शैवा. रुद्राणी. शिववादिनी. मातङ्गिनी. श्रीमती. आनन्दमेखला. डाकिनी. योगिनी. उपयोगिनी. माहेश्वरी. वैष्णवी. भ्रामरी. शिवरूपिणी. अलंबुषां. वेगवती. क्रोधरूपा. सुमेखला. गांधारी; हस्तिजिह्वा. ईड़ा. शुभङ्करी. पिंगला. ब्रह्मदूती सुषुम्ना, गन्धिनी. आत्मयोनि. ब्रह्मयोनि· जगद्योनि. अयोनिजा. भगरूपा. भगस्थात्री. भगिनी. भगरूपिणी. भगात्मिका, भगाधाररूपिणी. भगमालिनी. लिंगाख्या, लिंगेशी. त्रिपुरभैरवी. लिंगगीति. सुगीति. लिंगस्था. लिंगरूपधृक्. लिंगमाला. लिंगभवा. लिंगलिंगा. पार्वती. भगवती. कौशिकीप्रेमा. प्रियम्व·

लिङ्गस्था लिङ्गनी लिङ्गरूपिणी लिङ्गसुन्दरी । लिङ्गगीतिर्महा प्रीता भगगीतिर्महासुखा ॥ लिङ्गनामसदानन्दा भगनामसदागतिः । लिङ्गमालाकण्ठभूषा भगमालाविभूषणा ॥ भगलिङ्गामृतप्रीता भगलिङ्गामृतात्मिका । भगलिङ्गार्चनप्रीता भगलिङ्गस्वरूपिणी ॥ भगलिङ्गस्वरूपा च भगलिङ्गसुखावहा ॥ स्वयंभू कुसुमप्रीता स्वयंभू कुसुमार्चिता । स्वयंभू कुसुमप्राणा स्वयंभूकुसुमोत्थिता । स्वयम्भू कुसुमस्नाता स्वयम्भू पुष्पतर्पिता ॥ स्वयम्भूपुष्पघटिता स्वयम्भूपुष्पधारिणी । स्वयम्भूपुष्पतिलका स्वयम्भूपुष्पचर्चिता ॥ स्वयम्भूपुष्पनिरता स्वयम्भूकुसुमग्रहा । स्वयम्भूपुष्पयज्ञांशा स्वयम्भूकुसुमात्मिका । स्वयम्भूपुष्पनिचिता स्वयम्भूकुसुमप्रिया । स्वयम्भूकुमादानलालसोन्मत्तमानसा स्वयंभूकुसुमानन्दलहरी स्निग्धदेहिनी । स्वयम्भूकुसुमाधारा स्वयम्भूकुसुमाकुला ॥ स्वयम्भूपुष्पनिलया स्वयम्भूपुष्पवासिनी ।

हा. गृध्ररूपा. शिवरूपा. चक्रिणी. चक्ररूपधृक्. लिंगाभिदायिनी. लिंगप्रियालिंगनिवासिनी. लिंगस्था. लिगिनी. लिंगरूपिणी. लिंगसुन्दरी. लिंगगीति. महाप्रीता. भगगीति. महासुखा. लिंगनामसदानन्दा. भगनामसदागति. भगनामसदानन्दा. लिंगनामसदागति लिंगमालाकंठभूषा, भगमालाविभूषणा. भगलिंगा. मृतप्रीता. भगलिंगमृतात्मिका. भगलिंगार्चनप्रीता. भगलिंगस्वरूपिणी. भगलिंगस्वरूपा. भगलिंगसुखावहा. स्वयंभूकुसुमाप्रीता, स्वयंभूकुसुमार्चिता, स्वयम्भू कुसुमप्राणा, स्वयम्भू कुसुमोत्थिता, स्वयम्भूकुसुमस्नाता, स्वयम्भू पुष्पतर्पिता स्वयम्भू पुष्पघटिता, स्वयम्भू पुष्पधारिणी, स्वयम्भू पुष्पतिलिका, स्वयम्भूपुष्प चर्चिता, स्वयम्भू पुष्प नरता, स्वयम्भू कुसुमग्रहा, स्वयम्भूपुष्पयज्ञांशा, स्वयम्भू कुसुमात्मिका, स्वयम्भू पुष्पनिचिता, स्वयम्भू कुसुमादान लालसोन्मक्त मानसा, स्वयम्भू कुसुमानन्द लहरी, स्निग्धदेहिनी स्वयम्भू कुसुमाधारा स्वयम्भू कुसुमाकुला, स्वयम्भू पुष्प निलया, स्वयम्भू पुष्पवासिनी, स्वयम्भू , कुसुमस्निग्धा, स्वयम्भू कुसुमात्मिका स्वम्भू पुष्प कारिणी, स्वयम्भू , पुष्प पाणिका, स्वयम्भू कुसुमध्याना, स्वयम्भू कुसुमप्रभा, स्वयम्भू कुसुमज्ञान, स्वयम्भू पुष्प भोगिना, स्वयम्भू कुसुमोल्लासा, स्वयम्भू पुष्प वर्षिणी, स्वयम्भू कुसुमोत्साहा, स्वयम्भू पुष्प रूपिणी, स्वयम्भू

स्वयम्भूकुसुमास्निग्धा स्वयम्भूकुसुमात्मिका ॥ स्वयम्भूपुष्प करिणी स्वयम्भूपुष्पपाणिका । स्वयम्भूकुसुमध्याना स्वयम्भूकुसुमप्रभा ॥ स्वयम्भूकुसुमज्ञानां स्वयम्भूपुष्पभोगिनी । स्वयम्भूकुसुमोल्लासा स्वयम्भूपुष्पवर्षिणी ॥ स्वयम्भूकुसुमोत्साहा स्वयम्भूपुष्परूपिणी । स्वयम्भूकुसुमोन्मादा स्वयम्भूपुष्पसुन्दरी ॥ स्वयम्भू कुसुमाराध्या स्वयम्भू कुसुमोद्भवा । स्वयम्भू कुसुमव्यग्रा स्वयम्भू पुष्पपूर्णिता ॥ स्वयम्भू पूजक प्रज्ञा स्वयम्भू होतृमातृका । स्वयम्भू दातृरक्षित्री स्वयम्भू रक्त तारिका ॥ स्यवम्भू पूजकग्रस्ता स्वयम्भू पूजकप्रिया । स्वयम्भू वन्दकाधारा स्वयम्भू निन्दकान्तका ॥ स्वयंभू प्रदसर्वस्वा स्वयंभू प्रदपुत्रिणी । स्वयंभू प्रदसस्मेरा स्वयंभू प्रदशरीरिणी सर्वकालोद्भवप्रीता सर्वकालोद्भवात्मिका ॥ सर्वकालोद्भवोद्भावा सर्वकालोद्भवोद्भवा । कुंडपुष्पसदाप्रीतिर्गोलपुष्पसदारतिः। कुंडगोलोद्भवप्राणा कुंडगोलोद्भवात्मिका । स्वयंभुवा शिवा धात्री पावनी लोकपावनी । कीर्त्तिर्यशस्विनी मेधा विमेधा शुक्रसुन्दरी अश्विनी कृत्तिका पुष्य तेजस्का चन्द्र-

---

कुसुमोन्मादा, स्वयम्भू पुष्पसुन्दरी, स्वयम्भू कुसुमोद्भवा स्वयम्भू कुसुम व्यग्रा, स्वयम्भू पुष्प पूर्णिता, स्वयम्भू पूजक प्रज्ञा, स्वयम्भू होतृमातृका, स्वयम्भू दातृरक्षित्री, स्वयम्भू रक्ततारिका, स्वयम्भू पूजकग्रस्ता, स्वयम्भू पूजक प्रिया, स्वयम्भू वन्दकाधारा, स्वयम्भू निन्दकान्तका, स्वयम्भू प्रदसर्वस्वा, स्वयम्भू प्रदपुत्रिणी, स्वयम्भू प्रदसस्मेरा, स्वयम्भूप्रद शरीरिणा, सर्वकालोद्भवप्रीता, सर्वकालोद्भवात्मिक सर्वकालोद्भवोद्भावा, सर्वकालोद्भवोद्भवा, कुण्डपुष्प सदाप्रीति, गोलपुष्परूदारति कुण्डगोलोद्भव प्राणा, कुण्डगोलोद्भवात्मिका स्वयम्भुवा शिवा, धात्री, पावनी; लोकपावनी कीर्त्ति; यशस्विनी; मेधा; विमेधा; शुक्रसुंदरी; अश्विनी; कृत्तिका, पुष्य, तेजस्का, चंद्रमंडला, सूक्ष्मासूक्ष्म, बलाका, वरदा, भयनाशिनी, वरदा, अभयदा, मुक्तिबंध विनाशिनी, कामुका, कामदा, कान्ता कामाख्या कुलसुन्दरी, दुःखदा, सुखदा मोक्षा, मोक्षदार्थ' प्रकाशिनी, दुष्टा, दुष्टमति, सर्वकार्यविनाशिनी, शुक्रधारा, शुक्ररूपा, शुक्रसिन्धु, निवासिनी, शुक्रालया, शुक्रभोगा; शुक्रपूजा, सदारति, शुक्र पूज्या, शुक्रहोम, सन्तुष्टा, शुक्रवत्सला शुक्रमूर्त्ति, शुक्र, देहा, शुक्रपूजक, पुत्रिणी, शुक्रस्था, शुक्रिणी, शुक्रसंस्पृहा, शुक्रसुन्दरी, शुक्रस्नाता, शुक्रकरी, शुक्र, सेव्या

मंडला। सूक्ष्मा सूक्ष्मा बलाका च वरदा भयनाशिनी॥वरदाभयदा चैव मुक्तिबन्धविनाशिनी कामुका कामदा कान्ता कामाख्या कुलसुन्दरी ॥ दुःखदा सुखदा मोक्षा मोक्षदार्थ प्रकाशिनी। दुष्टादुष्टमतिश्चैव सर्वकार्य विनाशिनी॥ शुक्रधाराशुक्ररूपा शुक्रसिन्धु निवासिनी। शुक्रालया शुक्र भोगा शुक्रपूजासदारतिः ॥ शुक्रपूज्या शुक्रहोमसन्तुष्टा शुक्रवत्सला। शुक्रमूर्त्तिः शुक्रदेहा शुक्रपूजकपुत्रिणी ॥ शुक्रस्था शुक्रिणी शुक्रसंस्पृहा शुक्रसुन्दरी शुक्रस्नाता शुक्रकरी शुक्रसेव्याति शुक्रिणी॥ महाशुक्रा शुक्र-भवा शुक्रवृष्टिविधायिनी। शुक्राभिधेया शुक्रार्हा शुक्रवन्दकवन्दिता॥ शुक्रानन्दकरी शुक्र सदानन्दाभिधायिका। शुक्रोत्सवा सदाशुक्रपूर्णा शुक्रमनोरमा॥ शुक्रपूजकसर्वस्वा शुक्रनिन्दकनाशिनी। शुक्रात्मिका शुक्रसंपत् शुक्राकर्षणकारिणी ॥ शारदा साधकप्राणा साधकासक्त मानसा। साधकोत्तमसर्वस्वा साधकाभक्तरक्तपा ॥ साधकानन्दस-न्तोषा साधाकानन्दकारिणी । आत्मविद्या ब्रह्म विद्या, परब्रह्म-स्वरूपिणी॥ त्रिकूटस्था पञ्चकूटा सर्वकूटशरीरिणी सर्ववर्णमयी वर्णजयमालाविधायिनी॥

श्रीशिव उवाच—

इति श्रीकालिकानामसहस्रं शिवभाषितम्। गुह्याद्गुह्यतरं

अतिशुक्रिणी, महाशुक्रा, शुक्रभवा, शुक्रवृष्टि, विधायिनी, शुक्रभिधेया, शुक्रार्हा शुक्रवंदन, वंदिता, शुक्रानन्दकरी, शुक्रसदानंदाभिधायिका, शुक्रोत्सवा, सदाशुक्र, पूर्णा शुक्रमनो-रमा, शुक्रपूजकसर्वस्वा, शुक्रनिंदक, नाशिनी, शुक्रात्मिका शुक्रसम्पत्, शुक्राकर्षण, कारिणी, सारदा, साधकप्राणा, साधकासक्तमानसा साधकोत्तम, सर्वस्वा साधका, भक्त, रक्तपा, साधकानंद सन्तोषा, साधकानंद कारिणी, आत्मविद्या, ब्रह्मविद्या पर-ब्रह्म, स्वरूपिणी, त्रिकूटस्था, पंचकूटा, सर्वकूट, शरीरिणी, सर्ववर्ण मयी और वर्ण जयमाला विधायनी॥

महादेव कथित श्री कालिका के यह सहस्रनाम गुह्य से गुह्यतर और साक्षात् महापातक विनाश करते हैं रात्रि अथवा दोनों संध्याओं में पूजा के समय इसका पाठ करने से साधकोत्तम और गाणपत्य प्राप्त होजाता है। जो व्यक्ति इसका पाठ करता

साक्षात् महापातकनाशनम् ॥ पूजाकाले निशीथे च सन्ध्ययोरुभयोरपि लभते गाणपत्यं स यः पठेत् साधकोत्तमः ॥ यः पठेत् पाठयेद्वापि शृणोति श्रावयेदथ । सर्वपापविमुक्तः स याति कालिकापुरम् श्रद्धयाऽश्रद्धया वापि य कश्चिन्मानवः स्मरेत् । दुर्गं दुर्गशतं तीर्त्वा स याति परमां गतिम् ॥ बन्ध्या वा काकबन्ध्या वा मृतवत्सा च याङ्गना । श्रुत्वा स्तोत्रमिदं पुत्रान् लभेत चिरजीविनः ॥ यं यं कामयते कामं पठन् स्तोत्रमनुत्तमम् । देवीपादप्रसादेन तत्तदाप्नोति निश्चितम् ॥ स्वयंभूकुसुमैः शुक्रैः सुगन्धिकुसुमान्वितैः । जवायावकसिंदूररक्तचंदनसंयुतैः ॥ मत्स्यमांसादिभिर्धीरो मधुभिः साज्य पायसैः भक्त्योपनीतैर्मन्त्रेण शोधितैः सह पञ्चमैः ॥ पञ्चोप चारनैवेद्यैर्वलिभिर्बहुशोणितैः धूपदीपैर्महादेवीं पूजयित्वा मनोहरैः । जप्त्वा महामनुस्तोत्रं पठेद् भक्तिसमन्वितः । अनन्यचेताः स्थिरधीर्मुक्तकेशो दिगंबरः शवारूढश्चितास्थो वा श्मशानालयमागतः शून्यालयगतो वापि

है और कराता है अथवा जो व्यक्ति इस सहस्र नामको सुनता और सुनाता है वह सर्वदा पाप से छूटकर कालिका पुर में गमन करता है । श्रद्धा से अथवा अश्रद्धा से जो कोई इसको श्रवण करता है वह दुर्ग और शतदुर्ग उत्तरणकर परम गतिको प्राप्त होता है । जो स्त्री वंध्या, वा काकवंध्या, या मृतवत्सा है, वह इस स्तोत्र के सुनने से चिरजीवी पुत्रलाभ करती है । जो जो कामना करीजाय, इस स्तोत्रके पाठ करने और देवी के प्रसाद से निःसंदेह वह सब पूर्ण होती हैं । भक्ति सहित स्वयम्भू कुसुम, शुक्र, सुगंधित पुष्पयुत जवा [गुडहल] यावक [लाखकारंग] सिंदूर, लाल चंदन, मत्स्यमांसादि, मधु, घृत सहित खीर, शोधित पञ्चमकार सहित और पंचोपसार सहकृत नैवेद्य, बहुत रुधिर युक्त अनेक बलि, एवं मनोहर धूप और दीप निवेदन पूर्वक भक्तियुक्त हो महामनु जपकर इस स्तोत्रको पढ़े । जो व्यक्ति मुक्तकेश, नग्नवेश, स्थिर मन और अनन्य चित्तसे शव में आरोहण, वा चिता भूमि में अवस्थान, वा श्मशानालय में गमन अथवा शून्यालय [सूना मकान] में विराजमान, किम्वा शय्या पर शयन करके इस प्रकार से पाठ करै, तो वह व्यक्ति शिवमय और कालिका के पुत्र

शय्यास्थो ना शिवात्मकः ॥ स भवेत् कालिकापुत्र इतिख्याति मुपागतः सर्वविद्यावतां श्रेष्ठो धनेन च धनाधिपः ॥ वायुतुल्यबलो लोके दुर्जयः शत्रुमर्दनः सर्वसङ्कटमुत्तीर्णः सर्वसिद्धिसमन्वितः ॥ मधुमत्या स्वयं देव्या सेव्यमानःस्मरोपमः । महेश इव योगीन्द्रःसर्वसत्वपुरस्कृतः । कामिनीकामरूपोऽसौ सर्वाकर्षणकारकः । जलसूर्य्येन्दुवायनां स्तम्भकोराजवल्लभः ॥ यशस्वी सत्कविर्धीमान् सन्मंत्री कोकिलस्वरः । बहुपुत्री गजाश्वानामीश्वरो धार्मिकःकृती ॥ मार्कण्डेय इवायुष्मान् जरापलितवर्जितः नवयौवनयुक्तः स्यादपि वर्षसहस्रभाक् बहु किं कथ्यते तस्य पठतःस्तोत्रमुत्तमम् । न किंचिद्दुर्लभं लोके यद्यत् मनसि वर्त्तते॥ब्रह्महत्या सुरापान स्तेयं गुर्वङ्गनागमः सर्वमाशु भवत्येव स्तवस्यास्य प्रसादतः ॥ रजस्वलाभगं पश्यन् जप्त्वा कालीं महामनुम् । स्तवेनानेन संस्तुत्य साधकः किन्न साधयेत्॥परदार परो वापिजप्त्वा मंत्रं पठन् स्तवम् । कुबेर इव वित्ताढ्यो जायते साधकोत्तमः॥ अष्टोत्तरशतंजप्त्वा योनिमामंत्र्य तत्त्ववित्। संगम्य पठनादस्य

नाम से सर्वत्र विख्यात होता है । और समस्त विद्वानों में अग्रगण्य होता है । धन में कुबेर की समान और वायु की समान बलयुक्त होकर सब लोकों से दुर्ज्जय होता है और शत्रुगणों का मर्दन सब प्रकार के संकट से पार उतरना सर्व प्रकार की सिद्धि संकलन और कामदेव की समान अधिगमन करता है । स्वयं देवी मधुमती उस की सेवा में प्रवृत्त होती है । वह महादेव जी की समान योगीन्द्र और समस्त सत्व का अग्रणी कामिनीगणों को कामरूप, सब का आकर्षण करनेवाला, जल सूर्य और वायु का स्तम्भिक राजवल्लभ, यशस्वी, सत्कवि, परमबुद्धिमान्. सब विषयों में अच्छी परामर्श देनें को समर्थ, कोकिल की समानकलकण्ठ, अनेक पुत्रों का पिता, गज और अश्वादि सब का ईश्वर धार्मिक. कृतीमार्कण्डेय की समान दीर्घायु जराहीन, पलित विहीन नवयौवन युक्त और सहस्र वर्ष जीवी होता है । अधिक कहने से और क्या है? इस उत्तम स्तोत्र के पाठ करने से जो कुछ मन में इच्छा होती है वह कुछ दुर्लभ नहीं होती । ब्रह्महत्या, सुरापान, चौर्य, गुरुपत्नी गमन, इत्यादि समस्त पातक इस स्तव के प्रसाद से शीघ्र नष्ट होते हैं । उदकीका कुल मंदिर देखकर काली और तदीय महामन्त्र के जप सहित इस स्तोत्र का पाठ करने से साधक किस वस्तु का साधन नहीं कर सक्ता ? जो व्यक्ति परदार परायण अर्थात् पराई स्त्री में रत है, वह भी मंत्र जपने के पीछे इस स्तव का पाठ करने से कुबेर की समान वित्ताढ्य [धनवान]

सर्वविद्येश्वरो भवेत् ॥ दिगम्बरो मुक्तकेशः शय्यास्थो मैथुनी नरः जप्त्वा स्तुत्वा महाकालीं खेचरो जायतेऽचिरात् ॥ शुक्रोत्सारणकाले च जपपूजापरायणः । श्मशानकालिकां स्तुत्वा वाणीवसत्कविर्भवेत् ॥ आलोकयन् चिंतयन् वा विवस्त्रां परयोषिताम् । जप्त्वा स्तुत्वा महाकालीं सर्वपापैः प्रमुच्यते ॥ सुरतेषु मनुं जप्त्वा स्तुत्वा भगवतीं शिवाम् । सर्वपापैः परित्यक्तो मानवः स्यात् शुक्रोपमः ॥ कुहूपूर्णेन्दु-संक्रांतिचतुर्दश्यष्टमीषु च ; नवम्यां मङ्गलदिने पठेत् स्तोत्रं सुसाधकः भौमावास्यां निशिथे च चतुष्पथगतो नरः । मांसरक्तबलिं दत्त्वा सदुग्धमनिशोणितम् ॥ अष्टोत्तरशतं जप्त्वा पठेन्नामसहस्रकम् । सोऽदर्शनो भवेदाशु देवगंधर्वसेवितः ॥ येन तेन प्रकारेण कालीस्तुति परायणः । स्तम्भयेदखिलान् लोकान् लोकान् राजानमपि मोहयेत् ॥ आकर्षयेद्देवकन्यां वशयेदपि केशवम् । मारयेदखिलान् दुष्टानुच्चाट-यति शात्रवान् नरमार्जारमहिषच्छागमूषिकशोणितैः । सास्थिमांसैः समधुभिः सौवीरैः दुग्धपायसैःयोनिलक्षणतोयेन भगलिंगामृतेन चाशुक्रैः पूजाजपान्ते तु कालीं सन्तर्प्य साधकः ॥ सहस्रनामभिर्दिव्यैः स्तौति

और साधकोत्तम होते हैं । तत्ववित् साधकयोनि आमन्त्रण करके संगम के पीछे इस स्तव का पाठ करने से सम्पूर्ण विद्या का ईश्वर होता है । जो व्यक्ति दिगम्बर [नग्न] मुक्तकेश [खुलेबाल] शय्यास्त्र [शय्यापर स्थित] और मैथुनी होकर महाकाली का जप और स्तव करता है, वह शीघ्र खेचर होता है शुक्रोत्सारण समय जप पूजा परायण होकर श्मशान कालिका का स्तव करने से साक्षात् वाणी की समान सत्कवि हो जाता है । बसनहीन पराई स्त्री का दर्शन वा चिन्तन करके महाकाली का जप और स्तव करने से सब प्रकार के पाप दूर होते हैं। सुरत समय मंत्र जप और भगवती शिवा का स्तव करने से मनुष्य शुक के सदृश और सर्व पाप से रहित होता है । श्रेष्ठ साधक अमावस्या, पौर्णमासी, संक्रान्ति, चतुर्दशी [चौदश] अष्टमी और नवमी इन सब तिथि और मंगलवार में उल्लिखित स्तव पाठ करै । अमावस्या के निशीथ [रात्रि] समय चौराहे में गमन करके दग्ध मीन और शोणित सहित बलिप्रदान पूर्वक अष्टोत्तर शतनाम सहस्र जप करने से साधक अदर्शन हो जाता है । एवं देव और गंधर्वगण सेवा करते हैं । जिस किसी प्रकार से काली स्तुति परायण होकर इस स्तव का पाठ करने से समस्त लोक को स्तम्भित राजा को भी मोहित, देवकन्या को भी आकर्षित, केशव को भी वशीकृत, समस्त दुष्टगणों को विनाशित और समस्त शत्रुगणों को उच्चाटित

भक्तिपरायणः । मातेव दक्षिणा तस्य सर्वत्र हितकारिणी ॥ परनिन्दापरद्रोहपरदारपराय च । खलाय परतन्त्राय भ्रष्टायासाधकाय च ॥ शिवाभक्ताय दुष्टाय दूषकाय दुरात्मने । हरिभक्तिविहीनाय परदारपराय च ॥ पूजाजपविहीनाय स्त्रीसुरानिन्दकाय च । न स्तवं दर्शयेद्देवि ! सन्दर्श्य शिवहा भवेत् ॥ कुलीनाय महोत्साय दुर्गाभक्तिपराय च । वैष्णवाय विशुद्धाय भक्तियुक्ताय मन्त्रिणे ॥ अद्वैतानन्दरूपाय निवेदितरताय च । दद्यात् स्तोत्रं महाकाल्याः साधकाय शिवाज्ञया ॥ गुरुविष्णुमहेशानामभेदेन महेश्वरीम् । स्वमन्त्रां भावयेत् मन्त्री महेशः स्यान्न संशयः ॥ स शाक्तः शिवभक्तश्च स एव वैष्णवोत्तमः । संपूज्य स्तौति यः कालिमद्वैतभावमावहन् ॥ देव्यानन्देन सानन्दो देवीभक्तेन भक्तिमान् । स एव धन्यो यस्यार्थे महेशो व्यग्रमानसम् ॥ कामयित्वा यथाकामं स्तवमेन मुदीरयेत् । सर्वरोगविनिर्मुक्तो जायते मदनोपमः ॥ चक्रं वा स्तव मेनं वा धारयेदङ्गसङ्गतम् । विलिख्य विधि-

किया जाता है । जो व्यक्ति अस्थि, मांस, मधु, दुग्ध, पायस और योनिलक्षणा नुसार भग लिङ्गामृत और शुक्र प्रदान सहित जप और पूजा करके काली का सन्तर्पण पूर्वक भक्ति परायण होकर दिव्य सहस्र नाम द्वारा स्तव करता है दक्षिण कालिका जननी की समान सर्वत्र उस का हित करती हैं। जो व्यक्ति परनिन्दक, परद्रोही, परदार परायण, खल, परतन्त्र भ्रष्ट असाधक, शिव के प्रति भक्ति रहित, दुष्ट, स्वभाव, दूषक, दुरात्मा, हरिभक्तिविहीन, परदार पर पूजा जप रहित, स्त्री निन्दक, और सुरा निंदक है, उस को इस स्तव का दर्शन भी न करावे। दिखाने से शिव घातक होता है। जो कुलीन, महोत्साहयुक्त, दुर्गा के प्रति भक्ति युक्त, वैष्णव, विशुद्ध स्वभाव, भक्ति संयुक्त, मंत्र साधन तत्पर, और अद्वैतानन्द स्वरूप, एवं महाकाली का साधक हैं, उस को ही शंकर की आज्ञा से यह स्तोत्र प्रदान करै। गुरु विष्णु और महेश्वर के अभेद में महेश्वरी की भावना करने से साधक साक्षात् महेश्वर हो जाता है । इस में सन्देह नहीं है। जो व्यक्ति अद्वैत भाव अवलम्बन पूर्वक काली को भली भांति पूजा करके स्तव करता है वही शाक्त, वही शिव भक्त और वही वैष्णवोत्तम है । जो व्यक्ति देवी के आनन्द में ही आनन्द मान और देवी की भक्ति में ही भक्तिमान है, वही धन्य है। श्री महादेव जी सदा उसके ही लिये व्यग्र चित्त रहते हैं। यथा—काम कामना करके इस स्तव का पाठ करने से सर्वरोग विनिर्मुक्त, और मदनोपम [कामदेव की समान उपमा योग्य] होता है । जो व्यक्ति चक्र वा इस स्तव को यथा विधि लिखकर अंगसंगत [अंग के संग] धारण करता है, वही साधु और वही काली देह होता है । देवीको जो २ वस्तु निवेदन करी जाती है, उसका केवल अंशमात्र

वत् साधुः स एव कालिका तनुः ॥ देव्यै निवेदितं यद्यत् तस्यांशं भक्षयेन्नरः। दिव्यदेहधरो भूत्वा देव्याः पार्श्वचरो भवेत् ॥ नैवेद्यनिन्दकं दृष्ट्वा नृत्यन्ति योगिनीगणाः। रक्तपानोद्यताः सर्वे मांसास्थिचर्वणोद्यताः ॥ तस्मान्निवेदितं देव्यै दृष्ट्वा श्रुत्वा च मानवः । न निन्देत् मनसा वाचा सर्वव्याधिपराङ्मुखः ॥ आत्मानं कालिकात्मानं भावयन् स्तौति यः शिवाम् । शिवोपमं गुरुं ध्यात्वा स एव श्रीसदाशिवः ॥

यस्यालये तिष्ठति नूनमेतत् स्तोत्रं भवान्या लिखितं विधिज्ञैः। गोरोचनालक्तककुंकुमाक्तसिन्दूरकर्पूरपमधुद्रवेण ॥ न तस्य चौरस्य भयं न दस्योर्मनोरथो नाशनिवह्निभीतिः। उत्पातवायो रपि नात्र शङ्का लक्ष्मीः स्वयं तत्र वसेदलोला। स्तोत्रं पठन्नेतदनन्तपुण्यं कालीपदाम्भोजपरो मनुष्यः। विधानपूजाफलमेव सम्यक् प्राप्नोति संपूर्णमनोरथोऽसौ ॥

मुक्ताः श्रीचरणारविन्दविमुखाः स्वर्गामिनो भोगिनो ब्रह्मोपेन्द्रशिवात्मिकार्चनसुखं लोकेऽखिलं लेभिरे । श्रीमत्सद्गुरुभक्तिपूर्वकम-

---

भक्षणकरने से दिव्यदेह और देवीका पार्श्वचर [निकटवर्ती होजाता है । जो व्यक्ति नैवेद्य की निंदा करता है, योगिनीगण उसको देखकर नाचती हैं, एवं उसका रक्त पीने में उद्यत और मांस व अस्थि चाबनेको उद्यत होती हैं। इसलिये देवी के उद्देश से निवेदित द्रव्य देखकर व सुनकर, वाक्य वा मन द्वारा निन्दा न करने से समस्त व्याधि दूर होती है। जो व्यक्ति आत्माको कालिकात्मा ज्ञानकर उसका ध्यान धारण सहित स्तव करता है, और गुरुको भी उसी की समान विचारता है, वही व्यक्ति साक्षात् श्री सदा शिव है। जो व्यक्ति विधि जाननेवाले व्यक्तिकी सहायता से गोरोचना, महावर, कुंकुमाक्तसिंदूर, कपूर, और मधु मुद्रा द्वारा भवानी का यह स्तव लिखकर गृह में प्रतिष्ठापित करता है, उसको चौर भय नहीं रहता, उसका दस्यु [तस्कर) भय दूर होता है, इसके अतिरिक्त वज्र और अग्नि भय भी दूर होता हैं। उसके उस गृह में स्वयं लक्ष्मी अचल होकर वास करती है, और उत्पात वायुकी आशंका भी पद प्रक्षेप नहीं करसक्ती। जो व्यक्ति देवी कालिका के पादारविन्द में एकाग्र चित्त

हाकालीपदध्यायिनो भुक्तिर्मुक्तिस्स्वयं स्तुतिपरा मुक्तिः करस्थायिनी ॥

इति कालिकाकुलसर्वस्वे हररामसंवादे कालिका सहस्रनामस्तोत्रं समाप्तम् ।

इति महामहोपाध्याय श्रीपरमहंसपरिव्राजक श्रीपूर्णानन्दगिरिविरचित श्यामारहस्ये चतुर्थः परिच्छेदः ।

अथ पञ्चमः परिच्छेदः ।

अथ मन्त्रसिद्ध्यर्थमादौ पुरश्चरणविधिर्लिख्यते ।

तदुक्तं कालीतन्त्रे—

ग्रंथ गौरव के भय से महाभयादि पीठक्रम नहीं लिखा जाता। किन्तु सम्पूर्ण पीठ में महिषमर्दिनी की पूजा प्राप्त होजाती है। इसलिये उसका ही क्रम लिखते हैं कुलचूडामणि में कहा है, यथा—भैरव ने कहा हे मातः ! कुलाचारसंसिद्धि और भुक्ति मुक्ति प्रसिद्धि के लिये महिषमर्दिनीका संकेत निर्देश कीजिये ॥

श्री देवीने कहा, सृष्टि स्थिति विनाश की आदिभूत महेश्वरी को सर्व्व प्रयत्न से गुप्त रक्खे, मैं तुम्हारे निकट उसका विषय वर्णन करती हूं, श्रवण करो । "ह्रीं महिषमर्दिनी स्वाहा" यह अति गुह्यतर विद्या सृष्टि स्थिति विधान करती है, एवं

अतिगुह्यतराविद्या सृष्टिस्थितिविधायिनी । सर्वदेवसर्वसिद्धि-बीजभूता सनातनी ॥ न कस्मैचित् प्रदातव्या कथिता सिद्धिदा-यिनी । अत्यन्तगुरुभक्ताय शिष्याय यदि कथ्यते । तदाष्टवर्णं वक्तव्यं न बीजं नापि साधनम् ॥ साधारणी प्राणविद्या हृल्लेखा सिद्धिगो-चरा । एतत्पूर्वस्थिता देवी गुरुसिद्धिप्रणाशिनी ॥ विशेषतः कलियुगे महासिद्ध्यौघदायिनी । गुरूणां कुलनाथानां महाशापप्रदायिनी ॥ जय दुर्गा त्वया प्रोक्ता परमा सिंहवाहिनी । त्रैलोक्यबीजभूतान्ते सा परा मर्दिनी कुलम् ॥ वरं वह्निप्रियायुक्ता देवाननसमन्विता । दत्ता ते परमा विद्या केयुक्ता हृदयान्विता ॥ सर्वत्र कुलशास्त्रज्ञे ! महा-शापप्रदायिनी । तस्मात् सर्वप्रयत्नेन गोप्तव्येयं नवाक्षरी ॥ अष्टलक्षं जपेन्मन्त्रं दशांशं हुनेत्ततः । नारदोऽस्य ऋषिः प्रोक्तश्छन्दोगायत्र्य-मीरितम् ॥ देवता महिषघ्नीयं पूर्वं बीजं परापरा ॥

अथ अस्याः पूजाक्रमः । प्रातःकृत्यादि स्नानादिकं विधाय द्वार-देवताः पूजयेत् ॥

तदुक्तं तन्त्रान्तरे—

ऊर्ध्वोदुम्बरके विघ्नं महालक्ष्मीं सरस्वतीम् ॥ ततो दक्षिण-शाखायां विघ्नं क्षेत्रेशमध्यतः । तयोः पार्श्वगते गंगा यमुने पुष्प-वारिभिः ॥ देहल्यामर्चयेदस्त्रं प्रतिद्वारमिति क्रमात् । ततस्त्रिविध-

सम्पूर्ण देवता और सम्पूर्ण सिद्धि की बीज स्वरूप है. मैंने जो तुम्हारे निकट यह सिद्धि दायिनी सनातनी विद्या वर्णनकी, किसी को भी इसका प्रदान न करना। जो व्यक्ति अत्यन्त गुरुभक्त है उससे यदि कहना हो तो अष्टवर्ण मंत्र कहै. बीज वा सा-धन न कहै। यह विद्या कलियुग में महासिद्धि विधान करती है, और कुलनाथ गुरु-गण को महाशाप प्रदान करती है। यह मंत्र अष्टलक्ष जप करै। जपका दशांश होम करना चाहिये। नारद इसके ऋषि, गायत्री इसका छन्द, महिषमर्दिनी इसकी देवता, और परापरा इसका पूर्व्वबीज है। इसकी पूजाका क्रम यह है, यथा—प्रातःकृत्यादि और स्नानादि करके संपूर्ण द्वारदेवता की पूजा करै। तंत्रान्तर में कहा है, गूलर की ऊर्द्धशाखा में विघ्न, महालक्ष्मी और सरस्वती की, दक्षिणशाखामें क्षेत्रेश की, मध्य में विघ्नकी और उनके पार्श्वगत गङ्गा एवं यमुना की पुष्पवारि द्वारा पूजा करके, देहली में अस्त्रकी अर्च्चना करें। इस प्रकार क्रमानुसार प्रति द्वारमें पूजा करनी चाहिये। अनन्तर तीनों विघ्नका उत्सारण, स्थापन, भूतशुद्धि और पूर्व्ववत् प्राणायाम करके

विद्योत्सारणं स्थापनं भूतशुद्धिं प्राणायामंच पूर्ववत् कृत्वा ऋष्यादि-न्यासान् कुर्यात् । तदुक्तम्—नारदऋषिर्गायत्रीच्छन्दः श्रीमहिष-मर्दिनी देवता ह्रीं बीजं स्वाहा शक्तिर्महिषमर्दिनीकीलकं चतुर्वर्ग इत्यभिलप्य पूर्ववत् न्यसेत् । तदा करन्यासं कुर्य्याद् यथा—ओं महिषहिंसके ! हुं फट् । अंगुष्ठाभ्यां नमः । ओं महिषशत्रो ! सर्वे हुं फट् तर्जनीभ्यां स्वाहा ओं महिषं हिंसय हुं फट् मध्यमाभ्यां वषट् । महिषं हन हन देवि ! हुं फट् अनामिकाभ्यां हुं । ओं महिषमर्दिनि ! हुं फट् करतलपृष्ठाभ्यां अस्त्राय फट् । इति न्यस्य एवं पञ्चपञ्चाङ्गेषु अङ्गन्यासं कृत्वा ऊर्द्ध्वोर्द्ध्वतालत्रयं कृत्वा दशदिग्बन्धनं कुर्यात् ।

तदुक्तं तत्रैव—

ओं महिषहिंसके ! हुं फट् हृदयाय नमो हृदि । ओं महिषशत्रो ! सर्वे हुं फट् शिर उदीरितम् ॥ ओं महिषं हिंसय हुं फट् शिखामन्त्र उदीरितम् । ओं महिषं हन हन देवि ! हुं फट् कवंच इत्यपि ॥ ओं महिषमर्दिनि । हुं फट् अस्त्राणि शृणु भैरव ! ॥

ततः पूर्ववन्मातृकान्यासव्यापकन्यासौ कृत्वा कुलकुसुमादिना वृत्तषोडशदलकेशराष्टदलाष्टवर्णयुक्तं वृत्तचतुरस्रं चतुर्द्वारकर्णिकाढ्य-बीजात्मकं यन्त्रं निर्माय पुरतः सिंहासने संस्थाप्य तत्राधारशक्त्या-दिपीठदेवताः च संपूज्य पूर्ववदर्घ्यस्थापनादिकं कृत्वा देवीं ध्यात्वा पूजयेत् ।

तदुक्तं तत्रैव—

ध्यायेत् कालीं महादैत्य युद्धासरसोन्मुखीम् । दक्षिणे चक्र

ऋष्यादि न्यास में प्रवृत्त होवे वही कहा है। यथा—नारदऋषि, गायत्रीछन्द, श्रीमहि-षमर्दिनी कीलक, और चतुर्व्वर्ग विनियोग हैं, इस प्रकार करके, पूर्व्ववत् न्यास करै। तिस समय करन्यास करना चाहिये। यथा-ओं महिषहिंसके इत्यादि। तदनन्तर पूर्व्व-वत् मातृकान्यास और व्यापकन्यास करके कुलकुसुमादि द्वारा वृत्त षोड़शदल केशराष्ट दलाष्ट वर्णयुक्त वृत्त चारों ओर चतुर्द्वारकर्णिकाढय बीजात्मक यंत्रनिर्म्माण एवं सम्मुख सिंहासन में स्थापन पूर्व्वक उसमें आधारशक्त्यादि पीठदेवता की पूजा करै और पूर्व्ववत् अर्घ्यादि स्थापन सहित उसका ध्यान करै। उसी में कहा है, यथा—महादैत्य के सहित युद्धासवरसोन्मुखी देवी कालिका का ध्यान करै। उनके

खड्गौ च बाणशूलौ तथैव च ॥ वामे शंखं तथा चर्म धनुस्तर्जनमेव च। बिभ्रतीं कालतीव्रोरुमहिषाङ्गनिषेदुषीम् ॥ पीताम्बरधरां देवीं पीनोन्नतकुचद्वयाम्। जटामुकुटशोभाढ्यां पितृभूमिसुखावहाम् ॥

एवं ध्यात्वा मानसोपचारैः संपूज्य आवाहनादिकं कृत्वा षोडशोपचारैः देवीं पूजयेत्। अङ्गमन्त्रैरङ्गानि संपूज्य कामाख्यां दिशि पर्यंतं पूर्वोक्तप्रह्लादानन्दनाथादिगुरुपंक्तिं गुरुपरमगुरुपरमेष्ठिगुरूंश्च पूजयेत्। पूर्वाद्यष्टदले आं दुर्गायै ईं वरवर्णिन्यै ऊं आद्यायै एं कनकप्रभायै ऐं कृत्तिकायै ओं अभयप्रदायै औं कन्यकायै अः स्वरूपायै नम इति पूजयेत्।

तदुक्तं तन्त्रान्तरे—

आदौ दुर्गां ततो वर्णां ततोऽपि आद्यकाह्वयाम्। ततः कनकप्रभाञ्चैव कृत्तिकामभयप्रदाम् ॥ कन्यकांच स्वरूपाञ्च यजेत्पूर्वादितः सुधीः ॥

कुलचूडामणौ—

अष्टपत्रे यजेद्देवीं दुर्गाद्यां दीर्घपूर्विकाम्। दीर्घशब्देन अत्र पारिभाषिकग्रहणम्। तेन आ ई ऊ ए ऐ ओ औ अः इति शारदाटीकाकारेणोक्तम्। ततो देव्या दक्षोर्द्ध्वहस्ततः पत्राग्रे यं चक्राय नमः वं

दक्षिण हस्त में चक्र, खड्ग शूल, और शव है, वाम हस्त में शंख, चर्म्म, धनु और तर्ज्जन है। वह कालकी समान तीव्र प्रकृति और विपुल पराक्रम महिषके अंग में पदन्यस्त किये हुये हैं, उनके परिधेय पीतवर्ण हैं। उनके दोनों कुच पीनोन्नत हैं। जटा और मुकुट के संसर्ग से उनकी अतिशय शोभा प्रादुर्भूत हुई है। वह पितृ भूमिका सुख विधान करती हैं इसप्रकार ध्यान करके मानस उपचार से पूजा करता हुआ आवाहनादि विधान के सहित षोडश उपचार से अर्च्चना करै। अङ्ग मंत्र द्वारा सम्पूर्ण अंगकी आराधना करके पूर्वोक्त प्रह्लादानन्द नाथादि गुरु पंक्ति, गुरु परमगुरु और परमेष्ठी गुरुकी पूजा करै। पूर्वादि अष्टदलमें "आं दुर्गायै" इत्यादि विधानसे अर्च्चना करनी चाहिये। तंत्रान्तर में कहा है, आदिमें दुर्गाकी फिर वर्णा की आद्याकी फिर तदनंतर यथाक्रमसे कनकप्रभा, कृत्तिका, अभयप्रदा, कन्यका और स्वरूपाकी पूर्वादि क्रमसे पूजा करै। कुलचूडामणि में कहा है, अष्टपत्र में दीर्घस्वर के सहित दुर्गाकी अर्च्चना करनी चाहिये। अनन्तर देवी के दक्षिण हस्त के ऊर्द्ध में पत्राग्र में

खड्गाय नमः। लं बाणाय नमः। वं शूलाय नमः वामोर्ध्वतः शं शङ्खाय नमः चं चर्मणे नमः हं तर्जनाय नमः सं धनुषे नमः इति पूजयेत्।

तदुक्तं तत्रैव—

आयुधानि पत्राशाग्रे यादिभिः क्रमशो यजेत्। ततोऽष्टदलबाह्ये ब्रह्माण्याद्यष्टशक्तीः संपूज्या चतुरस्रे पूर्वादिक्रमेण लोकपालान् तद्बहिस्तदस्त्राणि पूजयेत्।

तदुक्तं तत्रैव—

ब्रह्माण्याद्यास्ततः पश्चात् लोकपालान् ततो बहिः। तदस्त्राणि सिद्धमन्त्री प्रयोगञ्च समाचरेत्॥ ततः पुनर्देवीं संपूज्य यथाशक्ति जपं कृत्वा अर्घ्यजलपुष्पाभ्यां गुह्यातिगुह्यमन्त्रेण देव्या वामकरे जपं समर्प्य स्तुतिं कृत्वा प्रदक्षिणांष्टाङ्गप्रणामं विधाय देवीं स्वहृदि विसर्जयेदिति।

अथ पुरश्चरणनियमो यथा—

अष्टलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्ततः। ततो होमदशांशतर्पणं तद्दशांशाभिषेकं तद्दशांशं ब्राह्मणभोजनमिति पुरश्चरणाङ्गत्वाद् दक्षिणा होमद्रव्यनियमो यथा—

"यं वक्राय" इत्यादि कहकर पूजा करै इसी से यह कहा है यथा—पत्राग्र में "य" इत्यादि कहकर सम्पूर्ण आयुध की क्रमानुसार पूजा करै। अनन्तर अष्टदल के बाहिर ब्राह्मणी इत्यादि अष्टशक्ति की पूजा करके चारों ओर पूर्वादि क्रमसे सम्पूर्ण लोकपालों की और उनके बाहिर अस्त्रसमूह की अर्चना करै। इसीसे यह कहा है। यथा—प्रथम ब्राह्मणी इत्यादिकी फिर बाहिर सम्पूर्ण लोकपालोंकी और उनके अस्त्र समूह का प्रयोग विधान करै। अनतन्र पुनर्वार देवीकी पूजा करके यथाशक्ति जप सहित अर्घ्यजल और पुष्प द्वारा गुह्यातिगुह्य मन्त्रसे देवीके वामहस्त में वह जप समर्पण और स्तव करके प्रदक्षिणा के सहित अष्टांग प्रणाम के पीछे देवीको अपने हृदय में विसर्ज्जन करै॥

पुरश्चरण का नियम यथा--अष्टलक्ष मंत्रसे जप और उसका दशांश होम करके होम का दशांश तर्पण तर्पण का दशांश अभिषेक, अभिषेक का का दशांश ब्राह्मणों को भोजन करावे यह पुरश्चरण की अंगवशतः दक्षिणा है, होम द्रव्य का नियम यथा—तिल द्वारा होम करने से राजागणों को वश में किया जाता है। सिद्धार्थद्वारा होम करै, तो तत्क्षणात् मुक्त होता है।

वशयेत्तिलहोमेन नरान्नरपतीनपि । सिद्धार्थैर्जुहुयान्मन्त्री रोगैर्मुच्येत तत्क्षणात् ॥ पद्मं हुत्वा यजेत् शत्रून् दूर्वाभिः शान्तिमेव च । पलाशकुसुमैः पुष्टिर्धान्यैः धान्यश्रियं लभेत् । काकपक्षैः कृतो होमो द्वेषं वितनुते नृणाम् । मरीचहोमैर्मरणं रिपुराप्नोति सर्वदा ॥ क्षुद्राभिचारभूतादीन् ध्यात्वा देवीं विनाशयेत् ।

कुलचूडामणौ–

प्रयोगहोमसंशये सहस्रवसुसंज्ञकम् ॥ एषा विद्या महाविद्या न देया यस्य कस्यचित् । यदि भाग्यवशाद्देवि ! कुलदेवी कुलोत्तमैः ॥ दीक्षिता कुलजाभिस्तु सिद्धिदा सैव नान्यथा ॥

गुप्तरहस्योक्तं महिषमर्दिन्याः कवचं लिख्यते ।

भैरव उवाच–

शृणु देवि ! प्रवक्ष्यामि मर्दिन्याः कवचं शुभम् । यस्याराधनमात्रेण महाभैरवतां व्रजेत् ॥ देवैर्देवत्वविषये सिद्धैः खेचरसिद्धये ! पन्नगैराक्षसैर्मर्त्यैर्मुनीभिः सेवितं सदा ॥ अस्याः कवचं महापुण्यं स्वयं वक्त्राद् विनिःसृतम् । भूप्रदेशे समे शुद्धे पुष्पप्रकरसंकुले ।

पद्म द्वारा होम करनेसे सम्पूर्ण शत्रुओंको जीता जाता है। दूर्वा द्वारा होम करनेसे शांति प्राप्त होती है। पलाश कुसुम से पुष्टि और धान्य से धान्यसमृद्धि लाभ होती है काकपक्ष द्वारा होम करने से, लाकों के प्रति विद्वेष विस्तृत किया जाता है। मरीच द्वारा होम करनेसे शत्रु की सर्वदा मृत्यु होतीहै और देवीका ध्यान करनेसे क्षुद्राभिचार भूतादि विनष्ट हो जाते हैं। कुलचूड़ामणि में कहाहै। प्रयोग और होम संशय में अष्टसहस्र जप करै। यही विद्या महाविद्या है जिस किसी को न देवे। हेदेवि! यदि भाग्यवश कुलोत्तम और कुलजागण कुल देवी को दीक्षिता करें। तो वही सिद्धि प्रदान करती है। इसके अन्यथा नहीं होता। अब गुप्तरहस्य कथित महिषमर्दिनी का कवच लिखते हैं।

भैरव ने कहा हे देवि? श्रवण करो महिषमर्दिनी का परम कवच वर्णन करता हूं, जिस की आराधना मात्र से ही महाभैरव हो जाता है। देवगण देवत्व सिद्धि के लिये, सिद्धगण खेचरत्व साधन के लिये और पन्नग राक्षस, मर्त्य और मुनिगण, स्वाभिलाष सम्पादनार्थ सर्वदा इस की सेवा करते हैं। यह महा पुण्य कवच स्वयं इनके मुख से निकला है। बुद्धिमान् साधक, सम, शुद्ध और पुष्प

कल्पयेदासनं धीमान् कोमलं कम्बलासनम् ॥ वामे गुरुं पुनर्नत्वा दक्षिणे च गणाधिपम् । मध्ये तु मर्दिनीं नत्वा सर्वं रक्षन्तु मां सदा ॥ आग्नेय्यां नैर्ऋते पातु ऐशान्यां वायवे तथा । उत्तरे पातु ललिता जिह्वाललनभीषणा ॥ कौमारी पश्चिमे पातु धनदा च दिशो दश: । शाकिनी डाकिनी पातु मर्दिनी पातु सर्वदा । कल्पवृक्ष: सदा पातु विघ्ने च रक्तदन्तिका । एतास्तु वरयोगिन्यो रक्षन्तु साधकाग्रत: ॥ पठित्वा पाठयित्वा च कवचं सिद्धिदायकम् । पठेन्मासत्रयं मन्त्री वारमेकं तथा निशि ॥ रात्रौ वारत्रयं जप्त्वा नाशयेद्विघ्नमेव च । जपन्मासत्रयं विद्यां राजानं वशमानयेत् ॥ भीतो भयात् प्रमुच्येत देवि ! सत्यं न संशय: । अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित् ॥ सत्कुलीनाय शान्ताय सुजने दम्भवर्जिते दद्यात् स्तोत्रमिदं पुण्यं सर्वकर्मफलप्रदम् ॥ कवचं यो न जानाति जपेन्महिषमार्दिनीम् । दारिद्र्यत्वं भवेत्तस्य सत्यं सत्यं वदाम्यहम् ॥ अनया सदृशी विद्या नास्ति तन्त्रेस्तु गोपिता ॥

इति कवचं समाप्तम् ।

समूह से समाकीर्ण भूमिप्रदेश में कोमल कम्बलासन कल्पना करके वाम में गुरु, दक्षिण में गणाधिप और मध्य में मर्दिनी को प्रणाम करके कहै, सम्पूर्ण मेरी सर्वदा रक्षा करो जिह्वा, ललना, भीषणा, ललिता मेरे आग्नेय, नैर्ऋत ऐशान, वायव्य, और उत्तर में रक्षा करैं। कौमारी पश्चिम में और धनदा दशोंदिशाओं में रक्षा करैं। शाकिनी डाकिनी और मर्दिनी मेरी सर्वदा रक्षा करैं। कल्पवृक्ष और रक्तदन्तिका विघ्न के समय मेरी रक्षा करैं। यह सब वरयोगिनी, साधक की अग्रत: रक्षा करैं। यह सिद्धिदायक कवच पाठ करके और पाठ कराके, तीन महीने तक रात्रि म एक बार पाठ करैं। रात्रिकाल के समय तीन वार जप करने से विघ्न नष्ट होते हैं। तीन महीने इस प्रकार जप करने से राजागणों को भी वश किया जाता है और भय से मुक्त होता है। यह सत्य कहता हूं। इस में संशय नहीं यह कवच गुप्त रक्खे प्रकाश न करै। जिस किसी को भी न देवे सत्कुलीन, शांत सुजन और दम्भरहित व्यक्ति को ही यह सर्वकर्मफलप्रद पवित्र स्तोत्र प्रदान करै। जो व्यक्ति कवच न जानकर, महिषमर्दिनी का जप करता है मैं सत्य सत्य कहता हूं उसको दारिद्र्य दु:ख उपस्थित होता है। इसकी समान सम्पूर्ण तंत्र में गुप्त विद्या दूसरी नहीं है। इति कवच समाप्त ॥

अथ स्तुतिः तदुक्तं कुलचूड़ामणौ।

भैरव उवाच।

मच्चित्ते चर चण्डि चूर्णितदुराचारप्रचण्डासवे स्वैरं दारय भूविदुर्धरदवद्रोहोर्मिमर्मास्पदः। तेनायं निरुपद्रतो निरुपमश्रीपादपद्माटवीप्रान्तानन्तवशान्तरे मम मनोहंसश्चिरं नन्दतु ॥ १ ॥ हित्वा चण्डि! हिरण्यदारणपटुप्रोद्दामन्दतांगुलिः स्फालत्कल्पसुमेरुसादरसटाटोपं नृसिंहं सुराः। मातस्तत् पशुपाशपेशलपटुश्रीपाद संसेविनं सेवन्ते करिवैरिणं किमरिभिर्भीतिर्भवेत् सेविनाम् ॥ २॥ चण्डि! त्वद्विषयान्तरक्षणपदं श्रोत्रान्तरं चोद्धतं तत्तत्त्वं पुरुष प्रकृत्यनुगतं ब्रह्मादिभिर्गीयते। तस्माद्देवि! समस्तदैवत सुधासारैकधामस्फुरत् श्रीमत्पादसरोजचुम्बनपरं मामद्य सम्भावय ॥ ३ ॥ मन्निद्रा यदि वास्तु तत्कुलपथाचाराद्वरं मास्तु वा कीर्त्तिः केशवकौशिकार्चनकरी नैवास्तु सत्सन्निधिः। मातर्ब्रह्महरिस्मरारिहुतभुग्दैत्यारिसेवापदश्रीमत्पादसरोजचिन्तनविधौ चित्तं सदैवास्तु नः ॥ ४ ॥ निर्दिष्टो-

---

अब कुल चूड़ामणि में कही स्तुति कथनकी जाती है। भैरव बोले– हे चण्डिके! आपने दुराचारी प्रचण्डासुर को चूर्णित किया है, आप मेरे मनरूपी मन्दिर में विचरण करके मेरी जिघांसा रूप मर्म स्थान की आपदाओं को दूर कीजिये। जिस से मेरा मानसहंस द्रोहियों को नष्ट करने के कारण शान्ति से आपके अनुपम (उपमा रहित) चरण कमल रूपी वन की प्राप्ति जनित आनन्द सागर में सदा आनन्दित होता रहे ॥ १ ॥ हे मैया चण्डिके! आपने हिरण्य कशिपु का उदर विदीर्ण करने में दक्ष हस्ताङ्गुलियुक्त सुमेरु पर्वत को छूने वाली जटाभार सम्पन्न नृसिंह मूर्त्ति ग्रहण की थी, देवता लोग उस मूर्त्ति की उपासना नहीं करके आप के पशुपाश पेषण दक्ष-गजासुर नाशक आकार की सेवा किया करते हैं। हे जननि! जो जिस किसी आकार में आप की सेवा करें, उन को शत्रु का भय नहीं हो सकता ॥ २ ॥ हे चण्डि! आप पुरुष प्रकृति स्वरूपिणी हैं, यह बात ब्रह्मादि देवता कहा करते हैं। मैं संपूर्ण देवगण सागर शोभायमान आप के कमलरूपी श्रीचरणों का आश्रय करने में समर्थ होऊं अर्थात् सदा आप के चरण कमलों को चूमता रहूं ॥ ३ ॥ हे माता! कौल धर्म का आश्रय करने पर कोई मेरी निन्दा करे तो करो, इस जगत् में मेरी कीर्त्ति न हो और केशव कौशिकादि देवताओं के सेवक मेरे निकटस्थ न हों तो मत हों इस में मेरी कोई हानि नहीं है, किन्तु हे जननि! ब्रह्मा इन्द्र शिव, अग्नि और विष्णु द्वारा सेवित आप के चरण कमलों की चिन्ता में मेरा चित्त निरन्तर आसक्त रहे ॥४॥

ऽस्मि यदि त्वदीयपदयुक्पूर्वापरीभावेन निर्दिष्टस्य तदा ममापि विरलं किंवास्तु सिद्धास्पदम् । तस्माद्देवि ! कृपाभवाञ्छितभवं श्रीपादपद्मद्वयं मच्चित्ते सततं हृदि प्रसरतु क्षेमङ्करि ! क्षम्यताम् ॥५॥ स्वात्मानं परिरभ्य भूतपतिरप्युन्मादमासादितः स्वैरं जीवनरक्षणे सचकृती नैवाभविष्यत् प्रभुः। दैवाद्विच्युतचन्द्रचन्दनवनप्रागल्भगर्भस्त्रवन्माध्वीपूर्णभवत्पदैककमलामोदेन नास्वादितः ॥ ६॥ हाहा मातरनादिमोहजलधिव्याहारसिद्धाखिलब्रह्मानन्दरसाभिषेकनिरसस्वान्तोदरैर्मादृशः । अस्माकं सुरवृन्दनिर्भरमनस्तापाभिभूतिक्षमश्रीमद्भक्तिरसातिदुर्दिनपरीणाहः सदा सर्पतु ॥ ७ ॥ यत्पादस्फुरदंशुजालजठराचण्डांशुकोटिस्खलत्स्वान्तध्वान्तविसारिनिर्मलचिदानन्दत्रयं—दैवतम् । स्वर्गं संसृजते स्थितिं वितनुते सृष्टिं पुनर्लुम्पते प्रोद्भिन्नाऽजननीलनीरजमहाच्चित्ते तदेवास्तु नः॥८॥या शरवन्महिषच्छलस्फुरमिलद्गर्भाब्धिधारस्फुरद्धक्कान्तः प्रसरत्समस्तमशिरो दैत्यं समालम्बते । सा दुर्गा भयदुर्गदुर्गतिहरा लम्बान्तरत्रासिनी दृप्यद्दैवत वैरिमारणपटुज्जीयाज्जयाह्लादिनी ॥ ९ ॥ नृत्यत्खेटकचामरां जनचरच्चक्राद्यखड्गावर स्फायच्छैलशिली मुखोच्छलदनल्पाजिच्छुतास्त्रायुधौ ।

हे मातः ! मैं आप के दोनों चरण कमलों का ध्यान करने में निरत हूं इस वास्ते मुझ को सिद्ध क्षेत्रादि की क्या आवश्यकता है ? मैं केवल यही प्रार्थना करता हूं कि मेरे हृदय में आप के दोनों चरण कमल सदा स्थित रहें । हे मैया ! आप क्षेमकरी हैं मेरे अपराध को क्षमा कीजिये ॥ ५ ॥ हे माता ! उन्मत्त भूतपति भी कपूर और चन्दन स्रावी मधुपूर्ण आप के चरण कमलों का बिना आस्वाद किये जीवन धारण करने में समर्थ नहीं होते, अर्थात् आपको आश्रय करके ही वे परमेश्वर बने हैं,अन्यथा वे जीवन धारण करने में समर्थ नहीं हैं ॥ ६ ॥ हे माता ! हम अनादि मोहसागर में डूब रहे हैं हमारा अन्तः करण ब्रह्मानन्द का रस चखने में असमर्थ है, अतएव जिस भक्ति रस के चखने पर देवताओं के मन का अतिशय संताप दूर हो गया है उसी भक्तिरस का आस्वाद हमारे मन में उपस्थित होवे ॥ ७ ॥ हे जननि ! तुम्हारे जिन चरण कमलों के निर्मल अंशु जाल से विमल चिदानन्द मूर्ति ब्रह्मा,विष्णु और रुद्र उत्पन्न होकर सृष्टि स्थिति और संहार कार्य करते हैं वे नीरद कान्ति चरणयुगल हमारे चित्त में निरन्तर स्थित रहें ॥ ८ ॥ हे माता ! जो इन्द्रादि द्वारा पूजित आप की ऐसी विमल मूर्ति का ध्यान करते हैं, जो पराये पुर को संक्षोभादि करने में समर्थ होते हैं अर्थात् शत्रु पक्ष का नाश कर सकते हैं और राज्य लाभ तथा वैरियों को परास्त कर सकते हैं उन की

वाञ्छावात-विसर्पिनार्त्तितशिरः साटोपदुष्टासुरत्रुट्यत्खण्डविखण्डिता-खिलशङ्कुंतक्षुत्पिपासाकुलैः ॥१०॥ काञ्चीकल्पविरामकालकलितां तीव्रोरुसम्पादकोन्माथ्यन्माहिषातिर्य्यगायतशिरः शृङ्गान्तरालस्थले । वर्णैर्वर्णसुपत्रमध्यकलिते रक्षाश्रुती मातृभिः सेव्ये चारुवराङ्गने रणमुदा चूर्णायमानां स्मरेत् ॥ ११ ॥ ऊर्ध्वाधःक्रमसव्यवामकरयोश्चक्रं दरं कर्तृका खेटं बाणधनुस्त्रिशूलभयकृन्मुद्रां दधानां शिवाम्। श्यामां नीलघनोच्चकुन्तलचयप्रोन्नद्धजूटास्फलद्धारास्फाललसत्करालवदनां-घोराट्टहासोद्भटीम् ॥ १२ ॥ एवं ये भवदेवि! मूर्त्तिमनघां ध्यायन्ति दुर्गादिभिः। शक्राद्यैरपि पूजितां परपुरक्षोभादिकं कुर्वते । राज्यं शत्रुजयः सदर्थधिषणा काव्यामृतं देशिकः स्तम्भोच्चाटनमारणादिकृतिनां तेषां स्वयं जायते॥ १३ ॥ स्तोत्रं ते चरणारविन्दयुगलध्यानावधानात्मया मंत्रोद्धारकुलोपचाररचितं गुप्तोपदेष्टा यदि । ये शृण्वन्ति पठन्ति देवि ! सहसा श्रीमोक्षकामादयस्तेषां हस्तगता भवन्ति जगतां मातर्नमस्ते जयः । इति स्तुतिःसमाप्ता ॥

चितामध्ये च यो दद्यात् बलित्रितयमुत्तमम् । कालरात्रि महाकालि ! कालिके ! घोरनिःस्वने ! । गृहाणेमं बलिं मातर्देहि सिद्धि-

---

बुद्धि सदर्थ में जाती है, वे काव्यामृत का आस्वाद करनेमें समर्थ होते हैं और सरलता पूर्वक स्तंभन उच्चाटन और मारणादि कर्म कर सकते हैं ॥ ६ ॥ १३ ॥ हे जननि ! मैंने आप के दोनों चरण कमलों का ध्यान करके इस स्तोत्र की रचना करीहै हे देवि ! जो पुरुष इस को सुनते वा पढ़ते हैं उन की तत्काल सम्पद कामना पूर्ण होती है और अन्त में मुक्ति मिल जाती है । आप जगत् की माता हैं मैं आप को प्रणाम करता हूं । आप की जय हो ! ॥ १४ ॥

(इति स्तुति समाप्त)

हे कालिके ! हे महाकालि ! तुम्हीं कालरात्रि और तुम्हीं जगत्की जननी हो। मेरी यह बलि ग्रहण करो। और मुझको अत्युत्तम सिद्धि प्रदान करो। यह कहकर चिता में श्रेष्ठ विधान से तीन बलिप्रदान करें। हे सुन्दरि ! बलिप्रदान करके पञ्चगव्य द्वारा अस्थिसम्प्रोक्षण पूर्वक पीठमंत्र न्यास करे। भोजपत्र वा वटपत्र पर पीठ

मनुत्तमाम् । कालिकायं वलिं दत्त्वा पंचगव्येन सुन्दरि ! ॥ अस्थि-
संप्रोक्षणं कृत्वा पीठमंत्रं न्यसेत्ततः । भूर्जे वा वटपत्रे वा तत्र पीठमनुं
न्यसेत् ॥ पीठमास्तीर्यतस्मिन् वै न्यसेद्वीरासनं ततः । वीरासनेन
देवेशि ! रक्षां दिक्षु प्रकल्पयेत् ॥ कूर्चयुग्मद्वयं देवि ! मायायुग्मं ततः
परम् । कालिके घोरदंष्ट्रे ! च प्रचण्डे ! चण्डनायिके ! ॥ दानवान्
द्रावयेत्युक्त्वा हनेति द्वितयं ततः । शवशरीरमहाविघ्नं छेदय
द्वितयं ततः ॥ द्विठांते वर्मशस्त्रान्ते वीराद्रक्षोऽयं मनुर्मतः । अनेन
मंत्रेण लोष्ट्रं पार्श्वे दिक्षु विनिः क्षिपेत् ॥ तन्मध्ये भैरवो देवो न
विघ्नैः परिभूयते । यदि प्रमादाद्देवेशि ! साधको भयविह्वलः ॥
ततस्तैस्तैः सुहृद्वर्गै रक्षिता नाभिभूतयः । अर्केन्दुसितवाट्यालसूत्रै-
र्निर्मितवर्त्तिकाम् ॥ प्रदीपं तत्र संस्थाप्य अस्त्रं तत्र प्रपूजयेत् । हते
तस्मिन् महादीपे विघ्नैश्च परिभूयते ॥ तदधश्चास्त्रमन्त्रेण निखनेत्
कुलदीपकम् । तत्तत् कल्पविधानेन भूतशुद्ध्यादिकं चरेत् ॥ षोढां
वा तारकं वापि विन्यस्य पूजनं ततः । मन्त्रध्यानपरो भूत्वा जपेन्मं-
त्रमनन्यधी ॥ एकाक्षरी यदि भवेत् दिक्सहस्रं ततो जपेत् । द्व्यक्षरे
चाष्टसाहस्रं त्र्यक्षरे त्वयुतादूर्ध्वकम् ॥ अतः परन्तु मंत्रज्ञो गजांतक-
सहस्रकम् ॥ निशायान्तं समारभ्य उदयांतं समाचरेत् ॥

मंत्र न्यस्त करना चाहिये । उसमें पीठ आस्तीर्ण करके वीरासन न्यास करै । हे देवेशि!
उसी वीरासनद्वारा चारों ओर रक्षा कल्पना करके प्रथम दोनों कूर्च अनन्तर "कालि-
काघोरदंष्ट्रे प्रचण्डचण्डे नायिके दानवान् द्रावय हन हन शवशरीर महाविघ्नं छेदय
छेदय स्वाहा फट्" इस प्रकार प्रयोग करै । इसका नाम पीठमन्त्र है । इस मंत्र द्वारा
पार्श्व में और संपूर्ण दिशाओं में लोष्ट्र निक्षेप करै । तो फिर समस्त विघ्न आक्रमण
नहीं करसक्ते । हे देवेशि ! साधक यदि प्रमादवशतः भयविह्वल हो, तो उन्हीं २
सुहृद्वर्गों से रक्षित होता है । फिर अभिभूत नहीं होता । तिस काल अर्केन्दु सित
वाट्याल की वर्त्तिका प्रदीप और अस्त्र तहां संस्थापन करके पूजा करनी चाहिये ।
उस प्रदीपके विनष्ट होनेपर विघ्न परम्परा पराभूत करते हैं । उसके अधोभाग में
अस्त्रमंत्र से कुलदीप खनित और तत्तत् कल्प विधानानुसार भूतशुद्धि इत्यादि करै ।
एवं षोढा अथवा तारक न्यास करके फिर पूजा में प्रवृत्त और मंत्र ध्यान परायण
होकर अनन्य चित्त से जप करै । एकाक्षरी होनेपर दस हजार जपे द्व्यक्षरी होनेपर
अष्टसहस्र त्र्यक्षरी होनेपर अयुतार्द्ध और इसके उपरांत आठ हजार जपकरै । प्रातः
कालसे उदयास्त पर्यंत जप करना चाहिये ॥

अन्यत्रापि—

पंचोपचारेण पुरतो देवतां परिपूजयेत्। यद्यसत्यमयं वापि नेत्रे वस्त्रेण बन्धयेत् ॥ ततोऽर्द्धरात्रिपर्यन्तं यदि किंचिन्न पश्यति। जयदुर्गामेननार्घ्यं तनैव सर्षपान् क्षिपेत् ॥

जयदुर्गामन्त्रो यथा।

तदुक्तं बृहन्मत्स्यसूक्ते—

तारो दुर्गे युगं रक्षि ततो ढांतं सलोचनम्। द्विठान्ता जयदुर्गेयं विद्या वेद्या दशाक्षरी ॥ तिलोऽसि सोमदैवत्यो गोसवः सृष्टिकारकः। पितृणां स्वर्गतुष्ट्यर्थं मर्त्यानांतु स रक्षकः ॥ भूतप्रेतपिशाचानां विघ्नेषु शान्तिकारकः। इति क्षिप्त्वा तिलानात्मचतुर्भागे शिवादितः॥ ततः सप्तपदं गत्वा पुनस्तत्रैव संविशेत्। देवं तत्रापि संपूज्य पूजयेन्मनुमुत्तमम् ॥ निर्भयः प्रजपेद् यावत् सिद्धिरग्रे भवेन्नरः। तत् सत्यं कारयित्वा च वरयेद्वर मुत्तमम् ॥ यदा बलिं प्रार्थयते नरं कुंजरमेव वा। दिनांतरे च दास्यामि स्वीकृत्य च गृहं व्रजेत्। परेऽन्हि च ततो दद्यात् पिष्टेन नवकुंजरान् ॥

अन्यत्र भी कहा है—पंच उपचार से देवी की भली भाँति पूजा करै। यदि असत्य भय हो, तो वस्त्र द्वारा दोनों नेत्र बंद करै। अन्तर यदि अर्द्धरात्रि पर्यंत कुछ न देखा जाय, तो जय दुर्गा का मंत्र उच्चारण करके उसके द्वारा अर्घ्य प्रदान कर समस्त सरसों बखेरे। जय दुर्गा का मंत्र, यथा—वृहत् मत्स्यसूक्त में कहा है, प्रथम तार अर्थात् ओं फिर दुर्गे युग्म अर्थात् दुर्गे २इसके उपरान्त सलोचन अर्थात् ह्रस्व इकार युक्त ढांत अर्थात् मूर्द्धन्य णकार सहित रक्षिपद प्रयोग करके फिर द्विठान्ता अर्थात् स्वाहा शब्द प्रयोग करै। तो "ओं दुर्गे दुर्गे रक्षिणी स्वाहा" इस प्रकार मंत्र हुआ। यही जय दुर्गा का दशाक्षर मंत्र है यह मंत्र उच्चारण करके समस्त तिल बखेरे, तिस काल इस प्रकार कहना चाहिये "तिलोसि इत्यादि,,। यह कहकर ईशानादि दिशा के क्रम से आत्म चतुर्भाग में सम्पूर्ण तिल बखेर कर सात (पद) चलकर उसी स्थान में प्रवेश और देवता की पूजाकरकेन्त्मपूयर बजकरैंनकरकनिभंत्रहो जमंती क। सिद्ध सन्मुख न हो तबतक जप करना चाहिये। सिद्धि सन्मुख होने पर उसको सत्य पाश में बद्ध करके वरकी प्रार्थना करै तिस काल वह सिद्धि नर वा हस्ती जिस किसी बलि की प्रार्थना करै, दिनान्तर में दिव कह कर स्वीकार करके गृह में गमन करै। दूसरे दिन यव वा धान्यके लोष्ट्र द्वारा विनिर्मित नौ (९) कुञ्जर प्रदान करै तन्त्रान्तर में भी कहा है, यथा—चन्द्रहास अर्थात् अर्द्धचन्द्राकृति खड्ग द्वारा क्षेत्रमय

यत्रोद्भवेन धान्योद्भवेन वा। तदुक्तं तन्त्रान्तरे—

यत्र क्षेत्रमयं वापि शालिधान्योद्भवं च वा। चन्द्रहासेन-विधिवत् तत्तन्मन्त्रेण घातयेत् ॥ चन्द्रहासेनार्द्धचन्द्राकृतिखड्गेन इत्यर्थः।

नीलतन्त्रेऽपि—

जपादौ तु वलिं दद्यात् पश्चादपि वलिं हरेत्। जपान्ते जपमध्ये वा देहि देहीति भाषते ॥ तदापि च वलिं दद्यात् माहिषं छागमेव वा। न दिक्षु वीक्षणं किंचिन्न च वन्धुसमागमः ॥ जलादिदुर्गसर्पाणां दक्षिणां विभवावधि। गुरवे गुरुपुत्राय तत्पत्न्यै वा प्रदापयेत् ॥ सम्यक् सिद्धैकमन्त्र्यस्य नासाध्यमिह किंचन। बहु मन्त्ररतः पुंसः का कथा शिवएव सः ॥

श्मशानविशेषो यथा तदुक्तं कुलसद्भावे—

श्मशानालयमागत्य मुक्तकेशो दिगम्बरः। जपेदयुतसंख्यन्तु सर्वकामार्थसिद्धये ॥ तत्रैव प्रेतमारुह्य प्रजपेन्मन्त्रमुत्तमम्। अयुतं मैथुनीभूत्वा विभीः सत्यपरायणः ॥ स याति परमां सिद्धिं देवैरपि सुदुर्लभाम्। आकर्षणवशीकारमारणोच्चाटनादिकम् ॥ स्तम्भनं मोहनञ्चैव द्रावणं त्रासनं तथा। वाग्मित्वञ्च धनित्वंच बहुपुत्रत्वमेव च

वा शालिधान्यमय तत्तत् हस्त्यादि यथा विधान से मंत्रोच्चारणपूर्वक निपातित करै नीलतंत्र में कहा है-जप के आदि में वलिप्रदान पूर्वक शेष में भी वलिप्रदान करै। और जप के अन्त में वा जप में जब दो दो कहै, तब ही छाग वा मेष की वलि देवे। किसी ओर भी दृष्टिपात न करै। अथवा बंधुबान्धवों के सहित सम्मिलित न होवे। अकेले ही इस कार्य को करै जिस प्रकार अपना विभव हो उसी के अनुसार गुरुको अथवा गुरुके पुत्र को वा गुरुकी स्त्री को दक्षिणा देनी चाहिये। यदि एकमात्र भली भांति सिद्ध न हो तो भी कुछ असाध्य नहीं होता। इस स्थल में बहुत मंत्र रत पुरुष का अधिक क्या वर्णन करै वह व्यक्ति साक्षात् शिव है ॥

श्मशान में विशेष विधि है जिस किसी प्रकार से मंत्र साधन नहीं होता कुलसद्भाव में कहा है —श्मशानालय में जाय मुक्तकेश और दिगम्बर होकर सर्वकामार्थ सिद्धि के लिये अयुत जप करै। प्रेत के ऊपर आरोहण करके इस प्रकार अनुष्ठान में प्रवृत्त होवे। मैथुनीभूत और सत्य परायण होकर भय दूर करने के उपरान्त इस प्रकार अयुत जप करने से देवगणों को भी सुदुर्लभ परमसिद्धि लाभ होती है। अधिक क्या आकर्षण वशीकरण, मारण, उच्चाटन, स्तम्भन, मोहन, द्रावण, त्रासन, वाग्मित्व, बहु

बहुवल्लभतामेति सर्वाग्निस्त्वमेव हि । स याति खेचरत्वं च देवैरपि सुदुर्लभम् ॥ न जरा न च मृत्युश्च न रोगो न च घातनम् । अथवा स भवेन्नित्यं कतुर्विंशतिसिद्धियुक् ॥ स्वदेहरुधिराक्तैश्च विल्वपत्रैः सहस्रशः । श्मशानेऽभ्यर्च्य देवीं च वागीशसमतां व्रजेत् ॥

कालीतन्त्रे च—

महाचीनद्रुमलतामज्जाभिर्विल्वपत्रकम् । सहस्रं देवीमभ्यर्च्य श्मशाने साधकोत्तमः ॥ तदा राज्यमवाप्नोति यदि नैवं पलायते । अनादित्यं यथा दृष्ट्वा लक्षं जपति भूमिपः ॥ निर्मलांच ततो दृष्ट्वा वश्यार्थमयुतं जपेत् ॥.

भैरवतन्त्रेऽपि—

श्मशाने योषितं मन्त्री संपूज्य ऋतुगां शुभाम् । रक्तचन्दन-सिक्ताङ्गीं रक्तवस्त्रैरलंकृताम् ॥ तावत् पुष्पैर्मनुं प्रोष्य ततोध्यायेच्च चण्डिकाम् । पूजयित्वा लभेत् राज्यं यदि न भ्रितयायते ॥ मेषमहि-षरक्तेन वाग्मित्वं तस्य जायते । धनित्वं जायते तस्य सर्वसिद्धिः प्रजायते ॥ वचसा स भवेज्जीवो धनेन च धनाधिपः । आज्ञया देव-

---

पुत्र और बहु वल्लभा इन सम्पूर्ण की प्राप्ति होती है। इसके अतिरिक्त सम्पूर्ण का प्रिय होजाता है और देवगणों को भी दुर्ल्लभ खेचरत्व लाभ होता है। जरा(बुढापा)आक्रमण नहीं कर सकता मृत्यु भी फिर नहीं होती, समस्त रोग भी फिर त्रिसीमा में नहीं आ सक्ते शोक दुःखादि भो दूर होजाते हैं। श्मशान में इस प्रकार शवपर अरोहण करके अपनी देह के शोणिताक्त सहस्र विल्वपत्र से देवी की आराधना करन पर वागीशकी समान होजाता है। कालीतंत्र में भी कहा है? महा प्राचीन द्रुमलता की मज्जा संयुक्त सहस्र विल्वपत्र द्वारा श्मशाम में देवी की पूजा करके यदि पलायन किया जाय तो राज्य लाभ होता है। अनादित्य में अवलोकन करके लक्ष जप करने से जिस प्रकार राजा होता है निर्म्मालिा में दर्शन करके तिसी प्रकार सम्पूर्ण वशीकरण के लिये अयुत जप करै। भैरवतन्त्र में भी कहा है साधक श्मशान में ऋतुगामिनी सत्स्वभाव रमणी को पूजा करके रक्तचन्दन सिक्ताङ्गी रक्तवस्त्र मण्डिता चण्डिका के ध्यानमें प्रवृत्त होवे तो राज्य लाभ करने में समर्थ होता है। मेष और महिष के रक्त द्वारा पूजा करने से वाग्मित्व लाभ होता है, धनित्व प्राप्त होता है, और सर्व सिद्धि समुत्पन्न होती है। अधिक क्या? वह वाक्य में वाक्पति की समान होता है। धन में कुवेर होता है। आज्ञा में देवराज होता है, रूप में कामदेव होता है, बल में पवन की

राजोऽसौ रूपेणैव मनोभवः। बलेन पवनो ह्येष सर्वतत्त्वार्थसाधकः। साधितं शोधितं मांसं सास्थि दद्यात् सदा बलिम् ॥ मूषमांसं छाग-मांसं मैषं माहिषमेव च। सर्वं सास्थि प्रदातव्यं तथा लोमसमन्वितम्॥ ॥ अजीवं नखनखच्छिन्नं केशं संमार्जनास्पदम् । निवेदयेत् श्मशाने च सर्वसिद्धिप्रदं भवेत् ॥ नारीरजोऽन्वितं कृत्वा पत्राणां शतमुत्तमम् । प्रत्येकं प्रजपेन्मन्त्रं ततो होमं समाचरेत् ॥ युगानामयुतं देवि! पूजि-ता दक्षिणा भवेत् । सर्वसिद्धिर्भवेत्तस्य वाग्मी धीरश्च जायते ॥ न तस्य दुर्लभं किंचित् पृथिव्यां तस्य जायते ।

कुलसद्भावेऽपि—

रेतोयुक्तेन पुष्पेण चार्कस्यैव सहस्रशः। श्मशानेऽभ्यर्च्य कालीं तु सर्वसिद्धिं स विन्दति ॥ धनवान् बलवान् वाग्मी सर्वयोषित्प्रियः सुखी। जायते नात्र सन्देहो महाकालवचो यथा ॥ श्मशाने शयनं यस्य शवासनगतः पुमान्। असकृच्च जपेन्मन्त्रं सर्वसिद्धिप्रदो भवेत्॥ तर्पयेच्च शवास्ये तु रक्तमांसादिभिस्तथा। त्रिभिर्मन्त्रमुदीर्यैवं सर्व सिद्धिर्भवेत्ततः ॥ तर्पयेच्च पयोभिश्च रक्तधारायुतैस्तथा। रेतोभिश्च तथा तद्वत् स्वकीयेन कचेन च॥ मैथुनार्जितयोषायाः कुलप्रक्षालनेन च।

समान होता है। इसप्रकार वह सर्वविध तत्त्वार्थसाधक होता है । साधित और शोधित करके अस्थि के सहित मांस बलि प्रदान करै। मूषिकमांस छागमांस, समस्त लोम और अस्थि के सहित प्रदान करना चाहिये। अपने नखद्वारा छिन्न और संमार्जनास्पद केश श्मशान में निवेदन करने से सर्वसिद्धिप्रद होता है । नारी के रजोयुक्त करके शतविल्वपत्र प्रदान पूर्वक होम करै। प्रत्येक पत्रप्रदान के समय मंत्र प्रयोग करना चाहिये। अयुतवार जप करके पूजा करने से दक्षिणा देनी चाहिये। इस प्रकार दक्षिणा के अनन्तर फल सर्वविध सिद्धि संघटित होती है। इसके अतिरिक्त वाग्मी और धीर होजाता है, पृथिवी में भी फिर कुछ दुर्लभ नहीं होता। कुलसद्भाव में भी कहा है, शुक्रसंयुक्त सहस्र अर्क पुष्प द्वारा श्मशान में देवी कालिका की पूजा करने से सर्वविधसिद्धि लाभ होती है, एवं धनवान्, बलवान्, समस्त स्त्रियों का प्रिय और सुखी होता है। महाकाल ने स्वयं यह कहा है, अतएव इस विषय में किसी प्रकार सन्देह नहीं। जो व्यक्ति शव के आसन और श्मशान में शयन करके बारम्बार जप करता है, वह सर्वसिद्धिप्रद होता है। रक्त और मांसादि द्वारा शव वदन में तर्पण करने से सर्वविधिसिद्धि लाभ होती है। तीन मंत्र उच्चारण करने चाहिये। रुधिर युक्त रक्तधारायुक्त दुग्ध द्वारा शुक्र द्वारा अपने कच द्वारा, मैथुनप्रसक्त

मेषमाहिषरक्तेन नररक्तेन चैव हि ॥ मूषमार्जाररक्तेन वाग्मित्वं तस्य जायते । बलित्वं जायते तस्य सर्वासिद्धिश्च जायते ॥

भावचूड़ामणौ—

सर्वसिद्धिप्रदं साक्षान्महापातकनाशनम् । सर्वपापहरञ्चैव सर्व रोगविनाशनम् ॥ नान्यत् सिद्धिप्रदं देवि ! वीरसाधनवर्जितम् । महाबलो महा बुद्धिर्महासाहसिकः शुचिः ॥ महास्वच्छो दयावांश्च सर्वभूताहितेरतः । तेषां कृते महादेवि ! वीरसाधनमुत्तमम् ॥

बृहत्श्रीक्रमसंहितायाम्—

अस्मात्परतरं किंचित्सत्वरं सिद्धिदायकम् । सर्वसिद्धिर्भवत्येव अहो रात्रे कलौयुगे ॥ द्वापरे त्वच्च मासेन त्रेतायां वत्सरेणच । कृते च दशभिर्वर्षैः सत्ये सिद्धिर्न संशयः ॥

अथाष्टम्यां चतुर्दश्यां कुजवारे वा प्रथमप्रहराभ्यंतरे गुरुं देवीञ्च नत्वा वीरवेशो यात्रां कुर्य्यात् ॥

तदुक्तं तन्त्रान्तरे—

घटीबन्धनवस्त्रं च मूलेन परिधाय च । तदार्थेन पुनर्वस्त्रं मूलेनाङ्ग बिलेपनम् ॥ कृतोष्णीषश्च मूलेन सिंदूरेणोर्द्धवे पुण्ड्रकम् । इष्टदेवं गुरुं

रमणी के कुलप्रक्षालन द्वारा, मेष, महिष, और मनुष्य रक्त द्वारा एवं मूष और मार्जार के शोणित द्वारा तर्पण करने से वाग्मित्व, बलशालित्व, और सर्वसिद्धि का अधीश्वरत्व उत्पन्न होता है, भावचूडामणि में भी कहा है हे देवि ! वीर साधन जिस प्रकार साक्षात्कार से सर्वसिद्धि प्रदान करता है, संपूर्ण महापातक नष्ट करता है, समस्त पाप हरण करता है और संपूर्ण रोगों को दूर करता है इस प्रकार अन्य किसी सिद्धि से संभव नहीं । महाबल महाबुद्धि महासाहसिक शुचि महास्वच्छ दयावान् और सर्व्वभूतों के हितनिरत, व्यक्तिगणों के लिये वीर साधन की सृष्टि हुई है । वृहत् श्रीक्रमसंहिता में भी कहा है, इसकी अपेक्षा शीघ्र सिद्धिदायक और कुछ नहीं है । कलियुग में अहोरात्रि के मध्य में ही सर्वविध सिद्धि लाभ होती है । द्वापर में एक मास में त्रेता में एक वर्ष में, और सत्ययुग में दश वर्षमें सिद्धिलाभ होती है । इस में सन्देह नहीं । अनन्तर अष्टमी में वा चतुर्दशी में मंगलवार में प्रथम प्रहर के मध्य में गुरु और देवी को प्रणाम करके, वीर वेशमें यात्रा करे । तन्त्रांतर में कहा है, मूलमंत्र में घटीवस्त्रपरिधान, मूलमंत्र में अङ्ग विलेपन, मूलमंत्र में उष्णीषबन्धन, और मूलमंत्र में ही सिंदूर का ऊर्द्धपुण्ड्र विधान करके इष्टदेवता और

नत्वा यात्रा प्रहरमध्यतः ॥ कार्य्या च साधकैः सार्द्धं हृदि मंत्रं परामृशन् । अत्तुब्धो भुक्तभोज्यस्तु यदि स्याद्वीरसाधकः ॥ दिव्यां वा पशु भावो वा भुक्त्वा साधनमाचरेत ॥

अथ साधनस्थानम् ।

तदुक्तं भावचूडामणौ—

शून्यागारे नदीतीरे पर्वते निर्जनेऽपि वा । बिल्वमूले श्मशाने वा तत्समीपे वनस्थले ॥ अष्टम्यांच चतुर्दश्यां पक्षयोरुभयोरपि ॥ भौमवारे तमिस्रायां साधयेत् सिद्धिमुत्तमाम् । उपचारं समादाय कुलामृतरसन्तथा ॥ गुडार्द्रकरसेनैव सुरा तु ब्राह्मणस्य च । गौड़ी च क्षत्रियस्यैव माध्वी वैश्यस्य तत्र वै ॥ कदलीमधुसंमिश्रश्वानत्वचि रसैः सुरा । सर्वं शूद्रस्य संप्रोक्तं यत्र वा तद्रुचिर्भवेत् ॥ गृहीत्वा तत्र दातव्यं सर्वं नैव च संस्पृशेत् ॥

अन्यत्रापि—

द्विजानामनुकल्पन्तु न साक्षाच्च विकल्पितम् ॥

तदुक्तं रुद्रयामले—

सत्यक्रमाच्चतुर्वर्णैः क्षीराज्यमधुपिष्टकैः । त्रेतायां पूजिता देवी घृतेन सर्ववर्णिभिः ॥ मधुभिः सर्ववर्णैश्च पूजयेद् द्वापरे युगे ।

गुरु को प्रणाम एवं हृदयमें मन्त्र परामर्शन पूर्वक साधक गणों के समभिव्याहार में पहर में यात्रा करैं । यदि वीर साधक हो, तो किसी प्रकार क्षुब्ध न होवे, भोजन करले । दिव्यही हो, अथवा पशुभावही हो, भोजन करके साधन में प्रवृत्त होवे ।

साधनस्थान यथा—भावचूड़ामणिमें कहा है, शून्यागार, नदीतीर, पर्वत, निर्ज्जन. विल्वमूल, श्मशान, इसके समीप का प्रदेश, अथवा वनस्थल इन सम्पूर्ण स्थान में दोनों पक्षकी अष्टमी वा चतुर्दशी में भौमवार में रात्रि में उत्कृष्ट सिद्धिसाधन में प्रवृत्त होवे । उपचार, कुलामृतरस, ब्राह्मण होने से गुड़ और अदरकरस निर्मित सुरा एवं क्षत्रिय गौड़ी और वैश्य माध्वी सुरा समभिव्याहार में लेवे । शूद्रके पक्ष में कदली और मधुमिश्रत कुक्कुरत्वके रसनिर्मित्त सुरा प्रशस्त है यह समस्त ग्रहण करके वहां देवे । स्वयं कुछ स्पर्शन करै । अन्यत्र भी कहा है, द्विजगणों का अनुकल्प साक्षात विकल्पित नहीं । रुद्रयामल में कहा है, सत्ययुग में चारो वर्ण यथा क्रमसे क्षीर, आज्य, मधु, और पिष्टक द्वारा, त्रेतामें सम्पूर्ण वर्णही घृत द्वारा द्वापर

पूजनीया कलौ देवि ! केवलैर्वासवैश्च तैः ॥ मांसं भक्तं च शुद्धान्नं धूपदीपादिकं तथा । तिलाः कुशाश्च सर्वाश्च स्थापनीयाः प्रयत्नतः ॥

अथ पूर्वोक्तान्यतमस्थानं गत्वा सामान्यार्घ्यं विधाय पूर्वमुखो मूलान्ते फट्कारं दत्वा यागभूमिं प्रोक्ष्य गुरुगणेशवटुकयोगिनीभ्यः पूर्वादितः संपूज्य पूर्वोक्तविधानेन मंत्रं भूमौ विलिख्य ये चात्रेत्वादि पूर्वोक्तमंत्रेण भूमौ पुष्पांजलित्रयं दत्त्वा प्रणम्य श्मशानाधिपतिभ्यः पूर्ववद्बलिं दत्वा अघोरमंत्रेण शिखाबन्धनं विधाय स्वदर्शन मंत्रांते आत्मानं रक्ष रक्षेति हृदि हस्तं दत्त्वा हृद्रक्षां विधाय पूर्वोक्तक्रमेण भूतशुद्ध्यादिकं विधाय जयदुर्गामंत्रेण दिक्षु सर्षपं विकीर्य्य तिलोऽसीत्यादिना तिलान् विकीर्य्य विहितासन समीपं गच्छेत् ॥

तदुक्तं तन्त्रांतरे—

गुरुपूजादिकं सर्वं पूर्वोक्तमन्त्रमुच्चरेत् । ये चात्रेत्यादि मंत्रेण भूमौ पुष्पांजलिं क्षिपेत् ॥ श्मशानाधिपतीनांतु पूर्ववद्बलिमाहरेत् । अघोरास्त्रेण मंत्रेण शिखाबन्धनमाचरेत् ॥ स्वदर्शनेन वा रक्षामुभाभ्यां परिकल्पयेत् । मायास्फुरद्वयं वर्म प्रस्फुरद्वितयं पुनः ॥ घोरघोर-

में मधुद्वारा, और कलियुग में संपूर्ण वर्ण केवल आसव द्वारा देवी की पूजा करें । मांस भक्त शुद्धान्न, धूप और दीपादि एवं तिल और संपूर्ण कुश यत्न सहित स्थापन करने चाहिये ।

अनन्तर पूर्व कथित अन्यतम स्थान में गमन करके सामान्य अर्घ्य विधान के सहित पूर्वमुख बैठ मूलान्त में फट्कार दान पूर्वक यागभूमि प्रक्षालन और पूर्वादि दिशा में गुरु, गणेश, बटुक और योगिनी गणों की पूजा करके पूर्वोक्त विधानानुसार भूमि में तीन पुष्पाञ्जलि दान और प्रणाम करै । फिर श्मशान के अधिपति गणों को पूर्व की समान बलि देकर अघोर मन्त्र से शिखाबंधन विधान और स्वदर्शन मन्त्र के अन्त में आत्मा की रक्षा कर, इत्यादि कहकर, हृदय में हाथ लगाय हृद् रक्षा करै। फिर पूर्वोक्त क्रमसे भूतशुद्ध्यादि करके और जयदुर्गा मन्त्र से दशोंदिशाओं में सरसों बखेर, तिलोसि इत्यादि मन्त्र से सम्पूर्ण तिल फेंक कर, विहित आसन के समीप गमन करैं ।

तन्त्रान्तर में भी कहा है । सम्पूर्ण गुरुपूजादि में पूर्वोक्त मंत्र उच्चारण और चात्र इत्यादि मंत्र से भूमि में पुष्पाञ्जलि निक्षेप और श्मशानाधिपतिगणों के उद्देश से पूर्व की समान बलि आहरण अघोरास्त्र मन्त्र से शिखाबन्धन समाचरण और स्वदर्शन मंत्रसे रक्षा कल्पना करनी चाहिये। ह्रीं ह्रीं स्फुर स्फुर हुं हुं प्रस्फुर प्रस्फुर घोर

तरेत्यन्ते तनुरूपपदं ततः । चटयुग्मं तदन्ते च प्रचटद्वितयं पुनः । हनयुग्मं समुद्धृत्य सहस्रारस्वरूपकम् । वर्मास्त्रान्तं महामन्त्रं सुदर्शनं प्रकीर्त्तितम् ॥ भूतशुद्धिं ततः कृत्वा न्यासजालं प्रविन्यसेत् । जलदुर्गाख्येन मनुना सर्षपान् दिक्षु निःक्षिपेत् ॥

अथ विहितशवो यथा तदुक्तं भावचूड़ामणौ—

यष्टिविद्धं शूलविद्धं खड्गविद्धं पयोमृतम् । रज्जुबद्धं सर्पदष्टं चण्डालं चाभिभूतिकम् ॥ तरुणं सुन्दरं शूद्रं रणे नष्टं समुज्ज्वलम् । पलायनविशून्यन्तु सम्मुखे रणवर्त्तिनम् ॥ एतेषामन्यतमं ग्राह्यमित्यर्थः ।

अथ निषिद्धशवो यथा तदुक्तं तत्रैव—

स्वेच्छामृतं द्विवर्षंच वृद्धं स्त्रियं द्विजं तथा । अन्नाभावे मृतं कुष्ठिनं सप्त वर्षार्द्धकं तथा ॥ एवं चाष्टशवं त्यक्त्वा पूर्वोक्तान्यतमं शवम् ॥ गृहीत्वा मूलमंत्रेण पूजास्थानं समानयेत् ॥

नीलतन्त्रे च—

चाण्डालं चाभिभूतं वा शीघ्रं सिद्धिफलप्रदम् ।

कालीतन्त्रेऽपि—

ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनम् ।

घोरतरा चट चट प्रचट प्रचट हन हन फट् "। इसका ही नाम सुदर्शन मंत्र है अनन्तर भूतशुद्धि करके, न्यासजाल प्रविन्यस्त और जयदुर्गा मन्त्र से सम्पूर्ण सरसों समस्त दिशाओं में बखेरे ।

विहित शव यथा – भावचूडामणि में कहा है यष्टिविद्ध, शूलविद्ध, खड्गविद्ध, जलमृत, रज्जुबद्ध, सर्पदष्ट, चण्डाल, तरुण सुंदर शूद्र जो पलायन न करके सन्मुख समर में युद्ध करके विनष्ट हुआ हो ऐसे व्यक्तियों में से अन्यतम व्यक्तिको आसनार्थ ग्रहण करै ।

निषिद्ध शव यथा–उसी में यह कहा है अपनी इच्छा से मरा द्विवर्ष, वृद्ध, स्त्री, द्विज, अन्न के अभाव से मरा कुष्ठी, सप्तवर्षार्द्धक, यह अष्टविध शव त्याग करके पूर्वोक्त अन्यतम शवग्रहण और मूलमंत्र से उसको पूजास्थान में लावे । नीलतंत्र में कहा है–चाण्डाल अथवा अभिभूत यह दो शव शीघ्र सिद्धिफल प्रदान करते हैं । कालीतंत्र में कहा है–ब्राह्मण और गोमय वर्ज्जन करके वीरसाधन में प्रवृत्त होवे । अनन्तर शव-समीप, गमन और 'ओं फट्' मंत्र से शव को अभ्युक्षण और 'ओं हुं मृतकाय, इत्यादि

अथ शवसमीपं गत्वा ओं फट् इति शवमभ्युक्ष्य ओं हुं मृतकाय नमः फट् इति शवोपरि पुष्पाञ्जलित्रयं दत्वा स्पर्शपूर्वकम् वक्ष्यमाणमन्त्रेण प्रणमेत् ॥

तदुक्तं भावचूड़ामणौ—

प्रणवाद्यस्त्रमन्त्रेण शवञ्च प्रोक्षणञ्चरेत् । प्रणवं कूर्चवीजञ्च मृतकाय नमः फट् ॥ पुष्पांजलित्रयं दत्वा प्रणमेत् स्पर्शपूर्वकम् ॥ हे वीर ! परमानन्द ! शिवानन्द ! कुलेश्वर ! आनन्दभैरवाकार ! देवीपर्य्यङ्कसंस्थित ! ॥ वीरोऽहं त्वां प्रपद्यामि उत्तिष्ठ चण्डिकार्चने । प्रणम्यानेन मन्त्रेण क्षालयेत् तदनन्तरम् ॥ अथ सुगन्धिजलेन शवं सुस्नाप्य वाससा जलमुद्धृत्य धूपैर्धूपिते गन्धचन्दनादिभिः शवं प्रलिप्य तत् कटिदेशे धृत्वा पूजास्थानं समानयेत् ।

तदुक्तं नीलतन्त्रे —

तारं कूर्चं मृतकाय नमोऽन्तं मन्त्रमुद्धरेत् । शवस्नपनमन्त्रोऽयम् इत्यादि । धूपैः सुधूपितं कृत्वा गन्धादिना प्रलिप्य च । रक्ताक्तो यदि देवेश ! भक्षयेत् कुलसाधनम् ॥ ततः कुशशय्यायां पूर्वशिरः कृत्वा शवं स्थापयेत् ।

मंत्र से शव के ऊपर तीन पुष्पांजलि प्रदान एव स्पर्श पूर्वक वक्ष्यमाण मंत्र से प्रणाम करे । भावचूडामणि में कहा है । यथा-प्रणवादि अस्त्रमन्त्र से शवको प्रोक्षण 'ओं हुं, इत्यादि मंत्रसे तीन पुष्पांजलि दान और स्पर्श करके प्रणाम करे । हे वीर हे परमानन्द ! हे शिवानन्द ! हे आनन्द भैरवाकार ! मैं वीर और कुलेश्वर देवीके पर्यंकमें अवस्थिति करके तुम्हारी शरणागत हुआ हूं । तुम चण्डिका की अर्चना में उत्थान करो । इस मंत्रसे प्रणाम करके तिसके पीछे उसका अभ्युक्षण करै ॥

अनन्तर सुगन्धित जल से भली भांति शवको स्नान कराकर और वस्त्र द्वारा उत्तम रूप से पोछकर धूप द्वारा धूपित और गंध चंदनादि द्वारा प्रलिप्त करके उस की कमर पकडकर पूजास्थान में लावे । नीलतंत्र में कहा है यथा—'ओं हुं कूर्च्चमृतकाय नमः' यह मंत्र उच्चारण करै । यह शवके स्नान कराने का मंत्र है । धूप द्वारा धूपित और गंधादि द्वारा विलिप्त करने से यदि रक्ताक्त हो तो कुलसाधक को भक्षण करती है । अनन्तर कुशशय्यामें शवको पूर्वशिर करके स्थापन करे । नीलतंत्र में

तदुक्तं तत्रैव—

कुशशय्यां परिष्कृत्य तत्र संस्थापयेत् शवम् । एलालवङ्गकर्पूर-जातीखदिरसारकैः । ताम्बूलं तन्मुखे दत्वा शवं कुर्य्यादधोमुखम् ॥ स्थापयित्वा तस्य पृष्ठं चन्दनेन विलेपयेत् । बाहुमूलादि कट्यन्तं चतुरस्रं विभाव्य च ॥ मध्ये पद्मं चतुर्द्वारं दलाष्टकसन्वितम् । ततश्चै नेयमजिनं कम्बलान्तरितं न्यसेत् ।

तन्त्रान्तरे च—

गत्वा शवस्य सान्निध्यं धारयेत् कटिदेशतः । यद्युपद्रावयेदस्य दद्यान्निष्ठीवनं शवे॥ पुनः प्रक्षालनं कृत्वा जपस्थानं समानयेत्॥ ततो द्वादशांगुलमानानि यज्ञकाष्ठानि दशदिक्षु संस्थाप्य पूजयेत् तत्र इन्द्रादि दशदेवताः ।

विषमिन्द्राय संलिख्य सुराधिपतये ततः । इमं बलिं गृह्ण युगं गृह्णापरयुगं ततः ॥ विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छ ठद्वयम् । अनेन मनुना पूर्वे बलिं दद्याच्च सामिषम् ॥ साध्यनामादिकं कृत्वा पूर्ववद्बलिमाहरेत् । सर्वेषां लोकपालानां ततः साधकसत्तमः ॥

कहा है यथा--कुशशय्या स्वच्छ करके उस में शवको स्थापनपूर्वक इलायची लवङ्ग (लौंग) कर्पूर चमेली, और खदिरसार द्वारा तांबूल प्रस्तुत करके शव के मुख में देवे। उसका अधोमुख और उसका पृष्ठदेश चन्दन द्वारा अनुलिप्त करै। अनंतर बाहु मूल से कटि पर्यंत चारों ओर भावना करके मध्य में दलाष्टक समन्वित चतुर्द्वार पद्म भावना और कम्बलान्तरित आसन विन्यस्त करना चाहिये। तन्त्रान्तर में कहा है। शव के समीप में गमन करके कटिदेश धारण करै। यदि उपद्रव करै,तो उसके गात्रमें निष्ठीवन देवे। पुनर्वार प्रक्षालन करके जपस्थान में लावे। अनन्तर द्वादश अंगुल परिमाण यज्ञकाष्ठ सम्पूर्ण दिशाओं में स्थापन करके उसमें इन्द्रादि दश देवताकी पूजा करनी चाहिये।"विषम् इन्द्राय„ इत्यादि मंत्रसे पूर्वकी ओर आमिष सहित बलि देवे। साध्यनामादि करके पूर्व की समान सम्पूर्ण लोकपालों के उद्देश से बलिप्रदान करनी चाहिये। बलिप्रदान का मन्त्र यह है"लं इन्द्राय"इत्यादि इसप्रकार सम्पूर्ण लोक-पालों की बलि आहरण करके शवके अधिष्ठात्री देवता इत्यादि को भी बलिप्रदान करै उसका मंत्र यह है। 'चतुःषष्टियोगिनीभ्योनमः इत्यादि ॥

तत्र अयं क्रमः। लं इंद्राय सुराधिपतये ऐरावतवाहनाय वज्रहस्ताय शक्तिपारिषदाय सपरिवाराय नमः। इति संपूज्य वलिं दद्यात् यथा-ओं इं द्राय सुराधिपतये इमं वलिं गृह्ण गृह्ण गृह्णापय गृह्णापय विघ्ननिवारणं कुरु सिद्धिं प्रयच्छ स्वाहा। एष बलिः इन्द्राय नमः वं वह्नये तेजोऽधिपतये मेषारूढाय शक्तिहस्ताय इत्यादि पूर्ववत् संपूज्य बलिं दद्यात्। ओंवह्नये तेजोऽधिपतये इत्यादिना पूर्ववत् यं यमाय प्रेताधिपतये दण्डहस्ताय महिषवाहनाय इत्यादिना संपूज्य बलिं दद्यात् अनेन ओं यमाय प्रेताधिपतये इत्यादिना पूर्ववत् क्षां निर्ऋतये रक्षोऽधिपतये स्ववाहनाय खड्गहस्ताय इत्यादि पूर्ववत् संपूज्य वलिं दद्यात् अनेन ओं निर्ऋतये रक्षोऽधिपतये इत्यादि पूर्ववत् वं वरुणाय जलाधिपतये मकरवाहनाय पाशहस्ताय इत्यादिना पूर्ववत्। वं वायवे वाय्वधिपतये अंकुशहस्ताय मृगवाहनाय इत्यादिना पूर्ववत् संपूज्य बलिं दद्यात् अनेन। ओं वायवे वाय्वधिपतये इत्यादि पूर्ववत्। ओं कुवेराय यक्षाधिपतये गदाहस्ताय नरवाहनाय इत्यादिना संपूज्य बलिं दद्यात् अनेन। ओं कुवेराय यक्षाधिपतये इत्यादिना पूर्ववत् ओं ईशानाय भूताधिपतये शूलहस्ताय वृषवाहनाय इत्यादिना पूर्ववत् निर्ऋृतिवरुणयोर्मध्ये ओं अनन्ताय नागाधिपतये चक्रह-

---

अनन्तर समीपस्थ भूप्रदेश में पूजासामग्री और उत्तरसाधक को स्थापन मूलान्त में „ह्रीं फट् इत्यादि" मंत्र से आसन की पूजा, मूलोच्चारण के सहित अश्वारोहण और क्रमसे शवके ऊपर बैठ, अपने पादतल में सम्पूर्ण कुश दान शवके केशपाश प्रसारण शिखाबन्धन, गुरु और देवीको नमस्कार प्राणायाम और षड़ङ्गन्यास समाधान पूर्वोक्त वीरासन बंधन और दशोदिशाओं में मंत्र द्वारा लोष्ट्र निक्षेपकरके संकल्प करना चाहिये। भावचूडामणि में कहा है। यथा-समीप में पूजा द्रव्य और दूर में उत्तरसाधक को स्थापन करै। यह उत्तर साधक समान गुण सम्पन्न हों मंत्रवित् और विजितेन्द्रिय हों अनन्तर स्वम ग्रांतर में आत्मा की अभ्यर्चना करके फिर "फट्" इत्यादि मंत्र से अश्वारोहण क्रमसे उपवेशन, पादतल में संपूर्ण कुशदान, शव के केशकलाप प्रसारण और दृढ़प्रकार से शिखाबंधन करके, कृतसंकल्प होवे। तन्त्रांतर में कहा है,शवके ऊपर आरोहण, और गुरुपूजादि,समाचरण एवं प्राणायाम विधान करके सम्पूर्ण दिशा में समस्त लोष्ट्र निक्षेप करै। अनन्तर अपने वाम में शवसमीप में अर्घ्यपात्रादि स्थापन और शव की तुण्डिकामें पीठपूजादि विधान षोडशउपचार से देवी की आराधना करके, शवके मुख में कारण द्वारा तीन बार तर्पण कर

स्ताय रथवाहनाय इत्यादिना पूर्ववत् संपूज्य बलिं दद्यात् अनेन ओं अनन्ताय इत्यादि पूर्ववत्। इन्द्रेशानयोर्मध्ये आं ब्रह्मणे लोकाधिपतये पद्महस्ताय हंसवाहनाय इत्यादिना पूर्ववत् संपूज्य आं ब्रह्मणे इत्यादिना पूर्ववत् शवाधिष्ठातृ देवताभ्यो बलिं दद्यात् चतुषष्टियोगिनीभ्यो नमः डाकिनीभ्यो नमः।

अथ पूजासामग्रीं सन्नीधौ सुधि चोत्तरसाधकञ्च संस्थाप्य मूलांते ह्रीं फट् शवाय नमः इत्यादिना आसनं संपूज्य मूल मुच्चरन् अश्वारोहणक्रमेण शवोपरि उपविश्य स्वपादतले कुशान् दत्वा शवकेशान् प्रसार्य्य जुटिकान् बध्वा गुरुं देवींच नमस्कृत्य प्राणायामषड्ङ्गन्यासान् कृत्वा पूर्वोक्तवीरासनं दशदिक्षु मनुना लोष्ट्राणि निःक्षिप्य संकल्पं कुर्य्यात्।

तदुक्तं भावचूड़ामणौ—

पूजाद्रव्यं सन्निधौ च दूरे चोत्तरसाधकम्। समानगुण सम्पन्नं मान्त्रिकं विजितेन्द्रियम्॥ अभिषेकविधि ज्ञात्वा देवतां भावयेत् पराम्। संस्थाप्यात्मानमभ्यर्च्य स्वमन्त्रान्ते ततः परम्॥ फाड्त्यनेन मन्त्रेण तत्राश्वारोहणं विशेत्। कुशान् पादतले दत्वा शवकेशान् प्रसार्य्य च॥ दृढं निबद्ध्य जुटिकां कृतसङ्कल्पसाधकः॥

तन्त्रान्तरे—

शवोपरि समारुह्य गुरुपूजादिकं चरेत्। प्राणायामं विधायाथ दिक्षु लोष्ट्राणि निःक्षिपेत्॥

भावचूड़ामणि में कहा है। यथा-वहां देवी की सम्यक् प्रकार से पूजाकरके सुविस्तर उपचार द्वारा इत्यादि। नीलतंत्र में भी कहा है—शवके मुख में यथा विधान से देवी और देवता का आप्यायन करके, शव से उठे। उसके सन्मुख गमन पूर्वक वक्ष्यमाण मंत्र पाठ करै। भावचूड़ामणि में कहा है। यथा—उठ और सन्मुख में अवस्थान करके भक्तिपरायण होकर "ओं शवो में" इत्यादि मंत्र पाठ करें। अनन्तर मूल मंत्र पाठके अन्त में पट्टसूत्र द्वारा शवके दोनों पाद दृढ़ रूप से बांध कर वक्ष्यमाण मंत्र से रक्त चन्दनादि द्वारा त्रिकोण चक्र लिखना चाहिये। तंत्रांतर में कहा है, यथा—साधक मूल मंत्र उच्चारण करके फिर पट्ट सूत्र द्वारा शव के दोनों पाद दृढ़प्रकार से बांधे। तो शव फिर उठ नहीं सकता, भाव-

ततः स्ववामे शवसमीपे अर्घ्य पात्रादिकं संस्थाप्य शवजुटिकायां पीठपूजादिकं कृत्वा षोड़शोपचारैः देवीं संपूज्य शवमुखे देवीं कारणेन त्रिः सन्तर्पयेत् ।

तदुक्तं भावचूड़ामणौ—

तत्र देवीं सुसंपूज्य उपचारैः सुविस्तरैः ।

नीलतन्त्रे च—

शवास्ये विधिवद्देवीं देवताप्यायनं ततः ।

ततः शवादुत्थाय तस्य संमुखं गत्वा वक्ष्यमाणमन्त्रं पठेत् ।

तदुक्तं भावचूड़ामणौ—

उत्थाय संमुखे स्थित्वा पठेद्भक्तिपरायणः । ओं वशो मे भव देवेश ! ममामुकपदं ततः ॥ सिद्धिं देहि महाभाग ! कृताश्रमपदां वर ! । ततो मूलमन्त्रं पठन् पट्टसूत्रेण शवपादद्वयं निबध्य वक्ष्यमाणमन्त्रेण रक्तचन्दनादिना त्रिकोणचक्रं विलिखेत् ।

तदुक्तं तन्त्रान्तरे—

मूल मन्त्रमुच्चरन् मन्त्री शवपादद्वयं ततः । पट्टसूत्रेण बध्नीयात् येनोत्थातुं न शक्यते ॥

चूड़ामणि में कहा है, "ओं भीम भीरुभयो" इत्यादि मंत्र से शवके पदतल में त्रिकोण चक्र लिखे । तो शव उठ नहीं सकता और चलभी नहीं सकता । शवके दो हस्त, दो पार्श्व, प्रसारित और उसके ऊपर समस्त कुशस्थापित, और उसमें अपने दोनों पद-स्थित करके, पुनर्वार प्रणाम के सहित मस्तक में गुरु का और हृदय में देवी का ध्यान पूर्वक ओष्ठाधर संपुटित करके निर्भय जप करना चाहिये । उसमें कहा है, यथा—पुनर्वार उपविष्ट होकर, दोनों पार्श्व में दोनों बाहु प्रसारित और दोनों हस्तों में कुश आस्तृत करके उसमें दोनों पद स्थापित करै । एवं स्थिरचित्त और स्थिर इन्द्रिय होकर, अधर और औष्ठ संपुटित करके देवी के ध्यान सहित मौली जपमें प्रवृत्त होवे । इस स्थल में भी श्मशान साधन के क्रम से जप करना कर्त्तव्य है । यदिअर्द्धरात्रि पर्यंत कुछ भी न देखा जाय, तो पूर्व की समान अर्घ्य और तिल बिखेर एवं सप्तपद गमन

भावचूड़ामणौ—

ओं भीमभीरुभयद्राव ! द्रव्यलोचनभावक ! त्राहि मां देवदेवेश ! शवानामधिराधिप ! ॥ इति पादतले तस्य त्रिकोणं चक्रमुल्लिखेत् । येनोत्थातुं न शक्नोति शवश्च निश्चलो भवेत् ॥

शवहस्तद्वयं पार्श्वयोः प्रसार्य्य तदुपरि कुशान् दत्त्वा तत्र स्वपादौ निधाय पुनः प्राणायामं कृत्वा शिरसि गुरुं हृदि देवींच ध्यात्वा ओष्ठाधरसंपुटौ विहितमालया विमीर्जयेत् ।

तदुक्तं तत्रैव—

उपविश्य पुनस्तस्य बाहू निःसार्य्य पार्श्वयोः । हस्तयोः कुशमास्तीर्य्य पादौ तत्र नीधापयेत् ॥ ओष्ठौ संपुटकौ कृत्वा स्थिराचित्तः स्थिरेन्द्रियः । तदा देवीं हृदि ध्यात्वा मौखीं जपमथाचरेत् ॥

अत्रापि श्मशानसाधनक्रमेण जपः कार्य्यः । यथर्द्धरात्रिपर्य्यन्तं किञ्चिन्न लक्ष्यते । तदा पूर्ववत् अर्घ्यं तिलान् विकिरन् ससपादगमनादिकं कृत्वा जपं कुर्य्यादिति ।

करके जप करै । आसन चलित होनेपर भय न करे । तिस समय इस प्रकार कहै. हे देवि ! मैंने हस्ती इत्यादि जो प्रार्थना की हैं वह दिनांतर में दान करो । इस समय आपका नाम क्या है, कहो । संस्कृत में इसप्रकार कहे पुनर्वार निर्भय होकर जप करै फिर यदि मधुरभाव से बात कहै तो मधुरभाव से उसका उत्तर देना चाहिये । अनन्तर सत्य कहलाकर बरकी याचना करैं यदि सत्य न कहै. और वर भी न दे तो पुनर्वार एकाग्र चित्त से जप करै नररूप के अतिरिक्त तहां देवता भी अपलर्पण नहीं करते । इसीलिये यत्न सहित समझना चाहिये. कि मनुष्य अथवा देवयोनि कोई नहीं। तिस काल मातः मातृष्वसा अथवा मातुलानी इन सम्पूर्ण के वेश में आगमन करके चिह्न करती हैं और इस प्रकार कहती हैं हे वत्सः ! उठो निःसंदेह ही तुम्हारा कार्य नष्ट हुआ । यह देख प्रातःकाल हुआ है. तुम्हारे पिता गृह में आक्रोश प्रकाश करते हैं। सम्पूर्ण मनुष्य भी प्रायः मत्सर विशिष्ट और राजागण भी दण्ड प्रयोग करते हैं। कदाचित् कोई देखले तो क्या होगा ? इत्यादि विविध वाक्य प्रयोग करने पर भी जप परित्याग न करै । तिस समय मृत पितृगण और दूर देश वासी मृत बांधवगण देवतारूप धारण करके तहां आगमन करते हैं । इनसे भी यदि साधक को क्षोभ न हो और यदि कुछ क्षोभ न करसके तो दैवी स्त्री रूप धारण और द्विजरूप धर पुरुष वेष ग्रहण करके तीन रात्रि के अंत में तहां आगमन पूर्वक "वर ग्रहण कर,, यह कहकर

चलासने भयं नास्ति भये जाते वदेत्ततः । यद्यत् प्रार्थयसे देवि ! दातव्यं कुञ्जादिकम् ॥ दिनान्तरे तु दास्यामि स्वनाम कथयस्व मे । इत्युक्तः संस्कृतेनैव निर्भयस्तु पुनर्जपेत्॥ पुनश्चेत् मधुरं वाक्त व्यक्तव्यं मधुरं ततः । ततः सत्यं कारयित्वा वरन्तु प्रार्थयेत्ततः॥ यदि सत्यं न करोति वरं वा न प्रयच्छति । तदा पुनर्जपेद्धीमान् एकाग्रमानसस्तथा ॥ नररूपंनातत्रदेवोऽपिनापसर्पति।यत्नतस्तेनबोद्धव्यो नरो वा देवयोनयः माता मातुःस्वसावापि मातुलानी तथैवच आगत्य चिन्हं कुरुते मायया च्छाद्य विग्रहम्॥ उत्तिष्ठ वत्स! ते कार्यं सर्वं यातु न संशयः॥ प्रभात समयोजातस्त्वत्पिता क्रोशते गृहम् प्रायो विमत्सरा लोका राजानां दण्डधारिणः । कदाचित् केन वा दृष्टस्तदा किंचिद् भविष्यति ॥ इत्यादि विविधैर्वाक्यैर्न च जापं परित्यजेत् । मृताः पितृगणास्तत्र दूर देशनिवासिन ॥ बान्धवास्तत्र गच्छन्ति देवरूपधरास्तथा । स्त्रीपुत्रसेवकादींश्च गृहीत्वा नियतः परे ॥ रुदन्तः पुत्रका सर्वे भ्रातरोऽनुजाशीश्यकाः निजकांताङ्गसंस्पर्शं वस्त्राद्याभरणादिकम् ॥ गृहीत्वा नयितेतत्र

शब्द करती हैं। इस प्रकार अच्छा या बुरा जो हो, देवी के स्त्री वेश से वरदेने में उद्यत होनेपर वीर पति का क्या नहीं साधित होता ? सन्मुख अथवा असन्मुख यदिसंस्कृत करके बात कहें, तो वह स्त्री निसन्देह स्वयं देवी, और वह पुरुष निःसंदेह ही साक्षात् भैरव है यदि वह न हो तो मायाघटित विग्रह समझना चाहिये फिर किसी प्रकार वर की प्रार्थना न करें। और किसी प्रकार बात भी न कहे। पुरुष यदि संस्कृतमें बात कहै तो इस प्रकार कहे। अथवा यदि कुछ नील लोहितवर्ण उत्कट ज्योति आविर्भूत, किम्बी प्रकार शब्द सम्भूत और सम्यक् प्रकार से अमृत लाभ हो, तो विचार करके ग्रहण करे स्वयं शिव ने यह बात कही है। क्योंकि देवगणों के कार्य अनेक प्रकार हैं। वह सहज में जानने दुष्कर हैं। भैरव और सम्पूर्ण वटुक कुल शास्त्र परायण हैं। इस लिये परित्याग में दोष उत्पन्न होने से वर लाभ करके जपादि त्याग करना चाहिये। और फल लगाया है यह जानने पर छुटिका भी छोड़ देवे। अन्यत्र भी कहा है। यथा– शवको प्रक्षालन और स्थापन करके बन्धन खोल देवे। और पदस्थित चक्र का मार्जन कर के पूजा करता हुआ जलमें निक्षेप करके स्नान करे। अनन्तर अपने गृह में गमन करके दिनान्तरमें बलिप्रदान करे। उसका मंत्रयह है, "अस्मिन् रात्रौ., इत्यादि। भावचूडामणि में इस प्रकार कहा है।

अनन्तर पिष्टक निर्मित पूर्व याचित नर, कुक्कुर और शूकर दान करके उस दिन उपवास करना चाहिये दूसरे दिन नित्य कर्म के अन्त में पंच गव्य पान करके पचीस

पानकैस्तद्वर्ज्यंत्यजेत् । बान्धवैस्तत्र दिवसे शङ्का तत्र प्रजायते ॥ यदि न लुभ्यते तत्र तदा किं वा न लभ्यते । स्त्रीरूपधारिणी देवी द्विजरूपधरः पुमान् ॥ वरं गृह्णेति शब्दं वै त्रिरात्रान्ते वरं लभेत् । साधुना साधुना वापि योषिच्चेद् वरदायिनी ॥ तदा वरिपतेस्तस्य किं न सिध्यति भूतले । निष्पापपुरुषेणै व कुलीनेनैव संस्कृता ॥ असंस्कृता वरा देवी पापं युङ्क्ते न संशयः॥ संमुखेऽसंमुखे चापि संस्कृतं वाक्ति चापरम्॥ सैव देवी न सन्देहा स देवो भैरवः स्वयम् । न चेदेवं भवेच्चैव माया घटितविग्रहः । वरं न वरयेत्तत्र न किञ्चित् प्रवदेत्ततः । स चेत् संस्कृतमाख्यानं वक्ति वक्तव्यमीदृशम् ॥ न चेत् स्वयं कौलिकोऽपि वरं ग्राह्यं निराकुलम् । अथवा उत्कटं किञ्चित् ज्योतिर्वा नीललोहितम् ॥ शब्दो वा जायते सम्यगमृतं वापि लभ्यते । विचार्य्य तद्गृहीतव्य मेवं शिवेन भाषितम् ॥ एवं कृत्वा तु बहुधा न चाकृतविशुद्धयः । अवश्यं तत्र दातव्यं न च प्रत्यचतां क्वचित् ॥ भैरवा वटुकाश्चैव कुलशास्त्रपरायणाः । एतच्छास्त्रप्रसङ्गेन कृत्याकुटिलविग्रहाः ॥पुत्रो भूत्वा हरेद्विद्यां नारी भूत्वा विमोहयेत् । तस्मात्तु भवेद्दोषात् विचारे यत्नमाचरेत् ॥ सत्ये कृते वरं लब्ध्वा सत्यजेच्च जपादिकम् । फलं जातमिति ज्ञात्वा जुटिकां मोचयेत्ततः ॥

ब्राह्मणों को भोजन करावे । पन्द्रह या दश ब्राह्मणों के भोजन कराने पर भी हानि नहीं है ब्राह्मण भोजन के उपरांत स्नान और भोजन करके उत्तम स्थल में अवस्थिति करै । ब्राह्मणों को भोजन न कराने से साधक निर्धन होता है, और यदि निर्धन हो तो देवता रुष्ट होते हैं तीन रात्रि वा छय रात्रि अथवा नौ रात्रि गुप्त रहना चाहिये । स्त्री शय्या में गमन करने से, व्याधि ग्रस्त होता है, गीत श्रवण करने से बधिर होता है । नृत्य देखने से नेत्रहीन होता है । दिनमें बात कहने से मूक होता है । पन्द्रह दिन के उपरांत देह में देवता का अधिष्ठान होता है । गो ब्राह्मण की निन्दा कभी न करै । शुद्ध होकर नित्य देव, गौ और ब्राह्मण को स्पर्श करना चाहिये । प्रातःकाल के समय नित्य क्रिया के उपरांत विल्वपत्रोदक पान करै । फिर सोलहवां दिन उपस्थित होने पर गंगा में स्नान करना चाहिये । तिसकाल स्वाहा के अन्त में मूल उच्चारण करके, तर्पण के अन्त में' नमः'शब्द प्रयोग करै । इस प्रकार जल द्वारा तीन सौ से ऊर्द्ध्व देवता गणों का तर्पण करना चाहिये । स्नान और तर्पण शून्य होनेसे देव तर्पणमें अधिकार नहीं होता । इस प्रकार विधानानुसारही लोकमें सिद्धि होती है और इस लोकमें संपूर्ण उत्कृष्ट भोग भोग करके परलोकके समय हरिपद

अन्यत्रापि-

शवं प्रक्षाल्य संस्थाप्य बन्धनं मोचयेत् पदम् । पदे चक्रं मार्जयित्वा पूजयित्वा जले क्षिपेत् ॥ शवं जलेऽथ गर्त्ते वा निःक्षिप्य स्नानमाचरेत् । ततस्तु स्वगृहं गत्वा बलिं दद्यात् दिनान्तरे ॥

अस्यां रात्रौ येषां देवानां यजमानोऽहं ते गृह्णन्तु इमं बलिम् ।

इति भावचूड़ामणौ-

अथ तैस्तु चितश्मशाननरकुञ्जरशूकरात् । दत्त्वा पिष्टमयानेवं कर्तव्यमुपबोधनम् ॥ परेऽन्हि नित्यमाचर्य्य पञ्चगव्यं पिबेत्ततः । ब्राह्मणान् भोजयेत्तत्र पञ्चविंशतिसंख्यकान् ॥ पञ्च पञ्च विहीनान् वा क्रमाच्चैव दशावधि । ततः स्नात्वा च भुक्त्वा च निवसेदुत्तमस्थले ॥ यदि न स्याद्विप्रभोज्यं तदा निर्धनतां व्रजेत् । तेन् चेन्निर्धनस्तस्य तदा देवः प्रकुप्यति ॥ त्रिरात्रं वाथ षड्रात्रं नवरात्रन्तु संयमेत् । स्त्रीशय्यां यदि गच्छेद्वै तदा व्याधि र्भवेत् च हि ॥ गीतं श्रुत्वा च बधिरो

में लीन होता है । और निष्फल सफल होता है, इसके अतिरिक्त यह शव साधन करने से शक्ति का प्रियतर होजाता है। शव का अभाव होने से श्मशान में घोर साधन करना चाहिये जिनका जो भाव, कथित है, वह यदि उस भाव से अर्च्चना न करै तो वृथा क्रमयोग में ही भ्रष्ट हो जाता है, इस विषय में भावउपदेश न करै । रूप भी निर्देश न करै । कुलसे मंत्र ग्रहण करके जिस प्रकार समझे उसी भावमें प्रवृत्त होवे॥

इतिश्रीमहामहोपाध्याय श्रीपरमहंसपरिव्राजक श्रीपूर्णानन्दगिरिविराचित

श्याम रहस्य भाषाटीका सहित त्रयोदश परिच्छेदः समाप्तः॥१३॥

अब प्रकारान्तर साधन कहते हैं-काली तन्त्र में कहा है. हे देवि ! श्रवण करो सम्पूर्ण साधनों से श्रेष्ठ वीर साधन कीर्त्तन करता हूं । लोक में शीघ्र फलप्राप्तिके लिये प्रकारान्तर वर्णित होता है । पुरुष चतुष्पथ में चारों ओर हृद खनन और ब्रह्मरन्ध्र में ओजित प्रदीप प्रज्वलित करै। मध्यभाग में अन्य एक खनन करना चाहिये । उससे ही शुद्धासन होता है । पूर्वोक्त मार्गानुसार उसमें संस्कार आरम्भ करना चाहिये । मशकादि देवगण को पूर्व की समान बलिप्रदान करै। कल्पोक्त पूजा करके एकाग्रचित्त से जप करना चाहिये । नग्न होकर दन्त और अक्षमाला एवं राजदन्त और मेरु माला द्वारा सर्वदैव मन्त्र अयुतवार जप करै । जपान्त में बलिप्रदान पूर्वक विभव के अनुसार दक्षिणा दान करने से, सर्वसिद्ध का अधीश्वर, विद्वान् और सम्पूर्ण देव

निश्च नुर्नृत्यदर्शनात् । यदि वक्ति दिने वाक्यं तदास्य मूकता भवेत् ॥ पञ्चदशदिनान्ते तु देहे देवस्य संस्थितिः । गोब्राह्मणानां निन्दाञ्च न कुर्य्याच्च कदाचन ॥ देवगोब्राह्मणादींश्च प्रत्यहं संस्पृशेत् शुचिः । प्रातर्नित्याक्रियान्ते तु विल्वपत्रोदकं पिबेत् ॥ ततः स्नायाच्च गङ्गायां प्राप्ते षोड़शवासरे । स्वाहान्तमूलमुच्चार्य्य तर्पणान्ते नमः पदम् ॥ एवं शतत्रयादूर्द्ध्वं देवान् वै तर्पयेज्जलैः । स्नानतर्पणशून्यस्य न स्याद्देवस्य तर्पणम् ॥ इत्यनेन विधानेन सिद्धिं प्राप्नोति मानवः । इह भुक्त्वा वरान् भोगान् अन्ते याति हरेः पदम् । असाङ्गं वापि साङ्गं स्यात् निष्फलं सफलं भवेत् ॥ कृत्वा साधनमेवैतत् शक्तेः प्रियतरो भवेत् ॥ शवाभावे श्मशाने वा कार्य्यं वै वीरसाधनम् ॥ यो भावो यस्य वै प्रोक्तस्तैर्भावैर्यदि नार्चयेत् । दशाहक्रमयोगेन भ्रष्टो भवति साधकः कुलमन्त्रं गृहीत्वा न यावत् बुद्धिः प्रजायते । नोपदिश्येत्तत्र भावं नरूपं तत्र सन्दिशेत् ॥

इति श्यामारहस्ये त्रयोदशः परिच्छेदः ।

नमस्कृत होजाता है अथवा निर्जन बन में अस्थि की शय्या और अस्थि का आसन करके उदयास्त दिनमान जप करने से सर्व्वसिद्धि का अधीश्वरत्व संग्रह होता है। अथवा विल्ववृक्ष में अपनी गोदी में शव को यत्नपूर्वक बैठाल करके नृसिंह मुद्रा प्रदर्शन सहित मातृका द्वारा जप करै इस प्रकार सहस्र जप करने पर सर्व्व प्रकार की सिद्धि आधीन होती है। अथवा बटवृक्ष के मूलदेश में शवको लाकर देवीकी पूजा करके उसमें शयन करता हुआ मंत्र जप करने परभी सर्व्वसिद्धिका ईश्वर होजाता है अथवा शवगणों को काष्ठा ग्रहण करके मुण्डमाला में विभूषित होकर उससे ही तिलक और उस भस्म से ही अङ्गविलिप्त करें उस अवस्था के समय श्मशान में सकृत जप करनेसे सर्व्वसिद्धि का अधीश्वर होता है। कुंकुम, अगर, कस्तूरी, रोली, घनचन्दन कर्पूर, पद्मराग, केशर, हरिचन्दन एकत्र साधित करके प्रत्येक को साधित करै, इसके द्वारा वटिका करके फिर भद्रकाली नीला, नीलपताका लोलजिह्वा और कराल का का जप करता हुआ ललाट में तिलक करने से वीरमणों को भी भयोत्पादन किया जाता है। महाष्टमी और नवमी की संधि में सन्मुख अवस्थिति करके चारों ओर छाग महिष और मेष सबकेशवको निक्षेप करै। तिससमय सम्पूर्ण कबन्ध और दीपादि समूहमें अलंकृत सम्पूर्ण मुण्ड भी इस प्रकार निक्षेप करने चाहियें। मध्यमें कबन्ध आस्तरण पूर्व्वक ताम्बूल पूर्ण द्वारा वदनमण्डल रक्तवर्ण और दोनों नेत्र अञ्जनाङ्कित करके मंत्र जप करनेसे सर्व्वसिद्धि का अधीश्वर होजाता है। नेत्रांत और वह्निभूषित तीनों आकाश प्रत्येक देवता के ही बीज हैं मूलमंत्र सहित यह बीज सार्द्ध लक्ष जप करै।

अथ चतुर्दशः परिच्छेदः ।

अथ प्रकारान्तरसाधनम् ।

तदुक्तं कालीतन्त्रे—

शृणु देवि ! वरारोहे ! वीरसाधनमुत्तमम् । नृणां शीघ्रज्ञामाप्त्यै प्रकारान्तरमुच्यते ॥ चतुष्पथे चतुर्दिक्षु पुरुषं हृदयं खनेत् । जीवितं ब्रह्मरन्ध्रेवै दीपं प्रज्वालयेदथ ॥ मध्ये तथा खनेदेकं तत्र शुद्धासनं भवेत् । पूर्वोक्तेन च मार्गेण तत्र संस्कारमारभेत् ॥ महाकालादिदेवेभ्यो वलिं पूर्ववदाहरेत् । कल्पोक्तपूजां संपूज्य जपेत् प्रयतमानसः ॥ दन्ताक्षमालया चैव राजदन्तेन मेरुणा । दिग्वासाः प्रजपेन्मन्त्र मयुतं सर्वदैवतम् ॥ जपान्ते च वलिं दत्वा दक्षिणा विभवावधि । सर्वसिद्धीश्वरो विद्वान् सर्वदेवनमस्कृतः ॥ अथवा विजनेऽरण्ये अस्थिशय्यासनो नरः । उदयान्तं दिवा जप्त्वा सर्व सिद्धीश्वरो भवेत् ॥ विल्ववृक्षे निजक्रोड़े शवमारोप्य यत्नतः । नृसिंहमुद्रया वीक्ष्य जपेन्मातृकया यदि ॥ सहस्रं तत्र वै जप्त्वा सर्वसिद्धीश्वरोभवेत् । वटमूले शवं नीत्वा तत्र देवीं प्रपूज्य च ॥ सुप्त्वा तत्र मनुं जप्त्वा सर्व सिद्धीश्वरो भवेत् । करकाञ्ची समादाय मुण्डमाला विभूषितः ॥ तेनैव तिलकं कृत्वा तत्तद्भस्मविभूषितः । श्मशाने च सकृज्जप्त्वा सर्व सिद्धीश्वरो भवेत् ॥ कुंकुमागुरुकस्तूरी रोचना घनचन्दनम् । कर्पूरं पद्म-

---

तिस समय इस प्रकार कहै।हे चामुन्डे ! हेघोर नस्वने ! जिह्वाग्र में रुधिर ग्रहण करो वलि छेदन करके वरदो वीरगणों की हित कामना से देवी कालिका का विषय कीर्त्तन किया । देवी कालिका रणस्थल में पताका की समान जय श्री विधान करती हैं इसलिये नील साधन में नील पताका की योजना करनी चाहिये । हे प्रिय ! मैंने जो पूर्व में महाविद्या उग्र चण्डा का विषय कीर्त्तन कियाहै उसको लोलजिह्वा कहतेहैं । भाद्रमास के समय पुष्कर योग में चिरचिटा लाकर मंत्र भूमि में निक्षेप और उसमें उसका साधित करके उसदिन एक मट्टी की हांडी में प्रसारित मत्स्य लाकर प्रदान करै । अनन्तर उस जलसे पूर्व की समान शवके ऊपर अभिषेक करके उसके उदर में मुख मार्गयोग में साधित विजया निक्षेप करता हुआ अञ्जनाङ्कित लोचन से मत्स्य को खनित करै । फिर पूर्व द्रव्य से तिलक करके, उत्थान पूर्वक जपमें प्रवृत्त होवे।

रागञ्च केशरं हरिचन्दनम् ॥ एकत्र साधितं कृत्वा प्रत्येकं साधयेत् सुधीः । जिह्वाग्रे रुधिरं वीर आकाशे च समाहरेत् ॥ तेनैव वटिका कृत्वा मन्त्रकालीं ततो जपेत् । नीलां नीलपताकाञ्च लोलजिह्वां करालिकाम् ॥ ललाटे तिलकं कृत्वा साधको वीरभावः स्वयम् । महाष्टमीनवम्यास्तु संयोगे पुरतः स्थितः ॥ छागमहिषमेषाणां चतुर्दिक्षु शवान् क्षिपेत् । कबन्धान् मुण्डजाञ्च दीपादिभिरलंकृताम् ॥ मध्ये कबन्धमास्तीर्य्य तत्र गन्धर्वरूपधृक् । ताम्बूलपूररक्तास्य मञ्जनाञ्जितलोचनम् ॥ कृत्वा तत्र मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत् । वियत्रययुतं देवि ! नेत्रान्तं चन्द्रभूषितम् ॥ बीजं प्रत्येकदेवानामिति तासाञ्च पार्वति ! ॥ मूलमन्त्रेण मन्त्रज्ञो जपेत् सार्द्धशतद्वयम् ॥ जिह्वाग्रे रुधिरं गृह्ण चामुण्डे ! घोरनिःस्वने ! । बलिं छित्वा वरं देहि रुधिरं गगनेऽमले ॥ कालि ! कालि ! प्रचण्डोग्रे ततोऽस्त्रं कवचं ततः । कालिकेयं समाख्याता वीराणां हितकाम्यया ॥ कूर्चयुग्मं महादेवि ! लीलया कथितं तव । चन्द्रखण्डसमायुक्तं ततो नीलपदं ततः । पताके हुँ फडन्ते च पूर्वकूटमनुर्मतः ॥ सुगुप्तेयं महाविद्या तव स्नेहाद्विहोदिता । जयश्रीकिरणी देवी पताकेव रणस्थले ॥ तेन नीलपताकेयं

स्वयं भगवान् भैरव लगुडांकित होकर तहां आविर्भूत होते हैं । उन का दर्शन करके मंत्र जप करै । हे देवि ! यदि वहां भाग्यवश से न ड़लाभ हो, तो साधक स्वयं भैरव होता है । हे देवेशि ! उल्लिखित मत्स्य लाकर, पितृकानन में निक्षेप पूर्वक तहां बारंवार जप करने से, देवता के सहित मेल होता है । हे भाविनि ! तहां महादेव और महादेवी को नमस्कार करके उनकी भस्म से तिलक करने पर, स्वयं वीरेश्वर होजाता है हे देवि ! रात्रिकाल के समय श्मशान प्रदेश में नग्नवेश मुक्तकेश भस्म भूषित कलेवर शुद्धमानस कृपाण और खड्गहस्त से यदि मातृका द्वारा जप कियाजाय । तो सम्पूर्ण सिद्धिसम्पन्न होता है । डाकिनी, योगिनी, अथवा भूत गना को तहां लाकर, पूजा करनेसे सर्वविध सिद्धि का अधीश्वर होजाता है । नील साधन में ब्राह्मण और गोमय वर्ज्जन करके अन्यान्य सम्पूर्ण जन्तुओं की शव लाकर, वीरसाधन करै । मृतासन के अतिरिक्त देवी पार्वती की पूजा करने से यावत् प्रलय तक घोर नरक में वास करना होता है । कालिका और वीरसाधन में संपूर्ण महाशव प्रशस्त हैं । और समस्त क्षुद्र शव प्रयोग समय में प्रशस्त और सर्वसिद्धि की हेतु होती हैं । हे देवि ! मैंने यह तुम्हारे निकट नीलक्रम कीर्त्तन किया । हे महेश्वरि! हमारी प्रसन्नता के लिये इसे अन्य किसी से न कहो ॥

याज्या वै नीलसाधने । उग्रचण्डा महाविद्या या पुरा कथिता प्रिये ! ॥ लोलजिह्वा तु सा प्रोक्ता संयोज्या नीलसाधने । या सा विद्या महातारा सा करालेति कीर्त्तिता ॥ भूमिपुरसमायुक्ता सामावस्या शुभोदया । भाद्रेपुष्करयोगे च तस्यां वीरवरोत्तमः ॥ विष्णुकान्तां समानीय निःक्षिपेत् मन्त्रभूमिषु । तत्र तां साधितां कृत्वा तद्दिने मृतहट्टके ॥ तत्र प्रसारितं मत्स्यमेकं मूल्येन दापयेत् । तज्जलेनाभिषेकञ्च पूर्ववच्च शवोपरि ॥ साधितां विजयां तस्य उदरे मुखवर्त्मना । क्षिप्त्वा तत्र खनेन्मत्स्यमञ्जनाञ्जितलोचनः ॥ तिलकी पूर्वद्रव्येण उत्थाय च मनुं जपेत् । स्वयं वै तत्र भगवान् भैरवो लगुड़ाङ्कितः॥ भ्रमातीतस्ततो वीरस्तं विलोक्य जपेन्मनुम् । यदि भाग्यवशाद्देवि ! लगुड़स्तत्र लभ्यते ॥ तदा स्वयं भैरवोऽसौ स्वयं वीरेश्वरो भवेत् । मत्स्य मानीय देवेशि ! निःक्षिपेत् पितृकानने ॥ तत्रासकृज्जापित्वा च देवतामेलनं भवेत् ।तत्र नत्वा महादेवं महादेवीञ्च भाविनि॥ तत्कुस्मातिलकं कृत्वा स्वयं वीरेश्वरो भवेत् । निशायां मृतहट्टे च उन्मत्तानन्दभैरव ॥ दिग्वासा विमली भस्मभूषणो मुक्तकेशकः । कृपाणखड्गहस्तश्च जपेन्मातृकया यदि ॥ तदा तस्य महादेवि ! सर्वसिद्धिः प्रजायते । डाकिनीं योगिनीं वापि अन्यां वा भूतकाङ्गनाम् ॥ तत्र

श्रीदेवी ने कहा हे देव महेश्वर ! मैं आपके प्रसाद द्वारा इससे अवगत हुई अब अशक्तपक्षका पुरश्चरण कीर्त्तन कीजिये ॥

भैरव ने कहा है, हे देवि ! श्मशानही दुर्लभ पुरश्चर्य्यानिर्दिष्ट हुई है । अथवा अन्य प्रकार भी पुरश्चरण होता है । कहता हूं श्रवण करो ! मङ्गलवार वा शनिवार में पंचगव्य विशेष करके चन्दनादि द्वारा मिलित और संयुक्त नरमुण्ड भूमि अथवा वनमें आधे हाथकी परिमाण निक्षेप करके यदि उस दिन रात में अकेलो सहस्र जप कर। तो वह व्यक्ति कल्पवृक्ष होता है । अथवा अन्य प्रकार भी पुरश्चरण किया जाता है । शव लाकर उसी द्वार में खनन कर उस दिन अष्टोत्तर शत जप करने से सर्व विध सिद्धिका अधीश्वर हो जाता है । इसमें द्विधा करने की आवश्यकता नहीं । अथवा अन्य प्रकार भी पुरश्चरण किया जाता है । दोनों पक्षकी अष्टमी और चतुर्दशी में सूर्योदय से अस्त पर्यंत निरातङ्क होकर जप करने से सर्व सिद्धिका अधिनायक हो जाता है । अथवा अन्य प्रकार भी पुरश्चरण किया जाता है । चंद्र और सूर्यके ग्रहण समय ग्राससे मोक्ष पर्यंत यावत् संख्यक मंत्र जप करके जपका दशांश परिमाण होम करे । सूर्यग्रहण की अपेक्षा अन्य काल श्रेष्ठ नहीं है । इस समय जिस जिस कार्यका

चानीय संपूज्य सर्वसिद्धीश्वरो भवेत्। सर्वेषां जीवहीनानां जन्तूनांनीलसाधने॥ ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनम्। मृतासनं विना देवि पूजयेत् पार्वतीं शिवाम् ॥ तावत्कालं वसेद्घोरे यावदा हूतसंप्लवम्। महाशवाः प्रशस्ताः स्युः कालिकावीरसाधने ॥ क्षुद्राः प्रयोगे कर्त्तॄणां प्रशस्ताः सर्वसिद्धिदाः। एवं नीलक्रमं देवि! कथितञ्च तवानघे!॥ न कस्यचिद् प्रवक्तव्यं मम प्रीत्या महेश्वरि!॥

श्रीदेव्युवाच।

ज्ञातमेतन्मया देव! त्वत्प्रसादान्महेश्वर!। अशक्तानान्तु मे देव! पुरश्चरणमुच्यताम् ॥

भैरव उवाच—

श्मशानेषु पुरश्चर्य्या कथिता देवि! दुर्लभा॥ अथवाऽन्यप्रकारेण पुरश्चरणमुच्यते। कुजे वा शनिवारे वा नरमुण्डं समायुतम् ॥ पंचगव्येन मिलितं चन्दनाद्यैर्विशेषतः। निक्षिप्य भूमौ हस्तार्द्धमानतः कानने वने ॥ तत्र तद्दिवसे रात्रौ सहस्रं यदि मानवः। एकाकी प्रजपेन्मन्त्रं स भवेत् कल्पपादपः ॥ अथवान्यप्रकारेण पुरश्चरणमिष्यते। शवमानीय तद् द्वारि तेनैव परिखन्यते॥ तद्दिनात् तद्दिनं यावत् जपेदष्टोत्तरं शतम्। स भवेत् सर्वसिद्धीशो नात्र कार्य्या वि-

अनुष्ठान किया जाता है वह सम्पूर्ण ही अनन्त फल प्रसव करता है चन्द्र सूर्यके ग्रहण से पूर्व दिन उपवास करके शुचि पूर्वक समुद्रगामिनी नदी में नाभि पर्यंत अवस्थिति करके समाहित चित्त से शुद्धोदक में स्नान पूर्वक शुद्ध प्रदेश से स्पर्श मुक्ति पर्यन्त अनन्य मनसे जप करै अनन्त दशांश परिमाण क्रमसे होमादि करके पीछे देवीकी भली भांति पूजा पूर्वक ब्राह्मणोंको भोजन करावे। अनन्तर मंत्रसिद्धि के लिये गुरुकी अभ्यर्चना करके उनका परितोष करै॥

कालीतंत्र में कहा है शरत्काल के समय चतुर्थी से नवमी पर्यंत भक्ति सहित भली भांति पूजा करके रात्रिमें केवल अकेला अधेरेमें बैठकर हजार जप करै। अष्टमीसे नवमी पर्यंत उपवास परायण होवे। अन्यत्र गुरु मार्गको उलंघन न करै। अथवा अन्य प्रकारभी पुरश्चरण किया जाता है अष्टमीकी सन्धि वेलामें अष्टोत्तरलतागृह में प्रवेश और यथाविधान से यत्नसहित उन सबकी पूजा करके पूर्वोक्त फल लाभ होने पर पूजादि में प्रवृत्त होवे। अष्टोत्तरशत जप करने से कामदेव होता है। उ के मूल पत्र

धारणा ॥ अथवान्यप्रकारेण पुरश्चरणमिष्यते । अष्टम्यांच चतुर्दश्यां पक्षयोरुभयोरपि ॥ सूर्य्योदयात् समारभ्य यावत् सूर्य्योदयान्तरम् । तावज्जप्त्वा निरातङ्कः सर्वसिद्धीश्वरो भवेत् ॥ अथवान्यप्रकारेण पुरश्चरणमिष्यते । चन्द्रसूर्य्यग्रहे चैव ग्रासावधि विमुक्तितः ॥ यावत्संख्यं मनुं जप्त्वा तावद्धोमादिकं चरेत् । सूर्य्यग्रहणकालाद्धि नान्यः कालः प्रशस्यते ॥ अत्र यद्यत् कृतं सर्वमनन्तफलदं भवेत् । तावदिति जपदशांश होमादिकमित्यर्थः ॥ ग्रहणे चन्द्रसूर्य्यस्य शुचिः पूर्वमुपोषितः । नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः ॥ यद्वा शुद्धोदकस्नात्वा शुचौ देशे समाहितः।स्पर्शाद्विमुक्तिपर्य्यंतं जपं कुर्य्याद नन्यधीः॥ अनन्तरं दशांशेन क्रमाद्धोमादिकं चरेत्। तदन्ते महतीं पूजां कुर्य्याद् ब्राह्मणभाजनम्॥ततो मन्त्रस्य सिद्ध्यर्थं गुरुंसंपूज्य तोषयेत्॥

अथ कालीतन्त्रे—

शरत्काले चतुर्थ्यादि नवम्यंतं विशेषतः । भक्तितः पूजयित्वा रात्रौ तावत् सहस्रकम् ॥ जपदेकाकी विजने केवलं तिमिरालये। अष्टम्यादि नवम्यंतमुपवासपरो भवेत् ॥ अन्यच्च गुरुमार्गस्य लङ्घनं

द्वारा उसकी अर्च्चना करने से लतादर्शन और उसका पूजन प्रयुक्त शीघ्र मंत्रसिद्धि संघटित होती है। अथवा अन्य प्रकार भी पुरश्चरण होता है। कृष्णवर्णा रमणीकी कुलागार में मंत्र भावना और उसमें पूजा एवं संस्कार करके उस रमणी को निवेदन पूर्वक कुछ एक परिमाण मंत्र जप करै। फिर देवताकी समान तत्पर होकर उस रमणीका नमस्कार के अनंतर विदा देकर स्वयं भलीभांति संयम रहित जप के अंत में प्रातःकाल के समय सम्पूर्ण स्त्रीको बलिप्रदान करनेसे निःसंदेह मंत्रसिद्धि होती है। अथवा अन्य प्रकार भी पुरश्चरण किया जाता है। गुरुको बुलाय स्थापन पूर्वक देवता की समान पूजन और वस्त्र अलंकार एवं होमादि द्वारा उनका संतोष सम्पादन और उनके पुत्र कन्या विशेष करके पत्नीकी अर्च्चना करके मंत्र जप करने से सम्पूर्ण सिद्धि आधीन होती हैं। अथवा अन्य प्रकार भी पुरश्चरण किया जाता है। सहस्रधार गुरुके चरणकमलों का ध्यान और पूजा करके केवल देवभाव में जप करने से सिद्धेश्वर हो जाता है। गुरुको विभव के अनुसार दक्षिणा देवे। गुरुकी आज्ञा मात्र से इष्टमंत्र भी सिद्ध होता है। गुरुको लंघन करके सुरगणों को भी इस शास्त्र में अधिकार उत्पन्न नहीं होता। हे देवि! गुरुसे विमुख होकर इन सम्पूर्ण मंत्र तंत्रोंका प्रयोग करने से सिद्धिकी हानि होती है। यह तंत्र और मंत्र शिष्यगणों को भी न दिखावे दिखाने से निःसन्देह प्रेतराज के भवन में गमन करना होता है॥

नैव कारयेत् । अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥ अष्टमीसन्धिवेलायां अष्टोत्तरलतागृहम् । प्रविश्य मन्त्री विधिवत् ताः समभ्यर्च्य यत्नतः ॥ पूर्वोक्तफलमासाद्य पूजादिकं समाचरेत् । केवलं कामदेवोऽसौ जपेदष्टोत्तरं शतम् ॥ तासान्तु पत्रमूलेन उग्रां संपूज्य कर्णिके । मन्त्रसिद्धिर्भवेत् सद्यो लतादर्शनपूजनात् ॥ अथवान्यप्रकारेण पुरश्चरणमिष्यते । आकृष्णयोः कुलागारे भावयेन्मन्त्रमेव च ॥ प्रपूज्य तत्र संस्कारं कृत्वा तस्यै निवेद्य च । किंचित् जपं मनुं नीत्वा देवताभावतत्परः ॥ तां विसृज्य नमस्कृत्य स्वयं जप्त्वा सुसंयतः । प्रातः स्त्रीभ्यो बलिं दत्त्वा मन्त्रसिद्धिर्न संशयः ॥ अथवान्यप्रकारेण पुरश्चरणमिष्यते । गुरुमानीय संस्थाप्य देववत् पूजनं विभोः ॥ वस्त्रालङ्कारहेमाद्यैः सन्तोष्य गुरुमेव च । तत्सुतं तत्सुताञ्चैव तत्पत्नीञ्च विशेषतः ॥ पूजयित्वा मनुं जप्त्वा सर्व सिद्धीश्वरो भवेत् । अथ वान्यप्रकारेण पुरश्चरणमिष्यते ॥ सहस्रारे गुरोः पादपद्मं ध्यात्वा प्रपूज्य च । केवलं देवभावेन जप्त्वा सिद्धीश्वरो भवेत् ॥ गुरवे दक्षिणां दद्यात् यथाविभवमात्मनः ॥ गुरोरनुज्ञामात्रेण दुष्टमन्त्रोऽपि सिध्यति ॥ गुरुं विलङ्घ्य शास्त्रेऽस्मिन् नाधिकारः सुरैरपि । एषाञ्च मन्त्रतन्त्राणां प्रयोगः क्रियते यदि ॥ गुरुवक्त्रं विना देवि ! सिद्धिहानिः प्रजायते ।

अब कालिका का दर्शनार्थ साधनान्तर लिखते हैं । सायंकाल के समय शून्यगृह में गमन और उत्तराभि मुख बैठकर भूतशुद्धि इत्यादि से न्यासपर्यन्त विधान और सिंदूर द्वारा नवकोण वृत्त अष्टदल वृत्त चतुरस्र और चतुर्द्वारात्मक यंत्र अंकित करै । फिर सन्मुख कुमारी का शक्तिबीज लिख कर पुराभाग में स्थापन और उसमें पीठपूजा विधान एवं द्वादश प्राणायाम समाधान करके देवी का ध्यान करना चाहिये । यथा—नर कपाल में अधिरूढ नरमाला से बिभूषित कृष्णाभ्रसन्निभा, रक्तवस्त्र के ऊपर विराजित चारभुजा धारण किये दिव्यालङ्कार शोभित देवी की निशा मुख से दो यामद्वयपुजा और ध्यान करके उनका दर्शनोत्सुक होकर मंत्रजपमें प्रवृत्त होवे । तिस काल चारों ओर घृत का दीप रखकर शवके ऊपर बैठ मोह भय रहित होवे । और मुण्डके ऊपर मुण्ड होवे । ऊर्द्ध्वास्य और दीपदर्शन तत्पर होकर मंत्र जप और मुण्डके ऊपर दीप सन्निविष्ट करै । और मूल मंत्र से पूजा करके देवीके देखने में प्रवृत्त होवे । फिर नवकोणसमन्वित सिन्दूर मण्डल विधान करके उसमें शक्ति बीज विन्यस्त और अन्य वीज समूह में उस शक्ति बीजको परिवृत करै । अनन्तर सिंदूर द्वाराही बहिर अष्टदलपद्म लिख कर उसमें जगद्धात्री कृष्णविग्रहा कालिका का

एतत्तन्त्रंच मन्त्रंच शिष्येभ्योऽपि न दर्शयेत् । अन्यथा प्रेतराजस्य भवनं याति निश्चितम् ॥

अथ कालिकादर्शनार्थं साधनान्तरमालिख्यते—प्रदोषे शून्यगृहं गत्वा उत्तराभिमुख उपविश्य भूतशुद्ध्यादिकं न्यासान्तं विधाय सिन्दूरेण नवकोणवृत्ताष्टदलवृत्तचतुरस्रचतुर्द्वारात्मकं यन्त्रं विलिख्य संमुखे कुमार्य्योः शक्तिबीजं लिखित्वा पुरतः संस्थाप्य तत्र पीठपूजां विधाय द्वादशप्राणायामं कृत्वा देवीं ध्यायेद् यथा -

नृकपालसमारूढ़ां नरमालाविराजिताम् । कृष्णाभ्रसन्निभां रक्तवासोपरि विभूषिताम् ॥ चतुर्बाहुधरां देवीं दिव्यालङ्कारशोभिताम् । निशामुखं समारुह्य यावद् यामद्वयं भवेत् ॥ तावत्कालं जपेन्मन्त्रं कालिकादर्शनोत्सुकः । चन्दनावीतन्नृशिरः शवोपरि विराजितः ॥ घृतप्रदीपमालाभिस्तथैव परिवेष्टितः । मुण्डोपरि भवेन्मुण्डो भयमोहविवर्जितः ॥ ऊद्ध्र्वास्यः प्रजपेन्मन्त्रं दीपालोकनतत्परः । मुण्डोपरि भवेन्मुण्डस्तद्दीपंच निधापयेत् ॥ पूजयेन्मूलमन्त्रेण कुर्य्याद्देव्या बिलक्षणः । सिंदूरमण्डलं कृत्वा नवकोणसमन्वितम् ॥ शक्तिबीजन्तु तन्मध्ये लिखित्वान्यैः समावृतम् । वहिरष्टदल पद्मं तेनैव कारयेद्बुधः । तत्रावाह्य जगद्धात्रीं कालिकां कृष्णविग्रहाम् । पूजयेद्विधिवद्देव्यै नवरात्र समाहितः ॥ ततस्तुष्टा जगद्धात्री कालिका परमेश्वरी ।

आवाहन करके समाहित होकर नवरात्रि यथा विधान से उनकी पूजा करनी चाहिये । तो जगद्धात्री परमेश्वरी कालिका तुष्ट होकर दया प्रकाशके पीछे साधक को सर्वविध सम्पत् प्रदान करती हैं । प्राण कण्ठगत होने पर भी इसको प्रकाश न करे ॥

इति श्री महामहोपाध्याय श्रीपरमहंस परिव्राजक श्रीपूर्णानन्द
गिरि विरचित श्यामारहस्य भाष टीका सहित
चतुर्दश परिच्छेदः समाप्तः ॥ १४ ॥

अब काम्यहोमार्थ कुण्डनियम लिखते हैं । यथा— यामल में कहा है, शांति और आरोग्य कर्म में चतुरस्र विधान करे । उच्चाटन में त्रिकोण कुंड करना चाहिये उच्चाटन में गोलाकार करे । मारण में भी गोलकुंड की योजना करनी कर्त्तव्य है ॥

सर्वसम्पत्तिदा देवी साधकस्यानुकम्पया ॥ नेदं प्रकाशयेद् मन्त्र प्राणैः कण्ठगतैरपि । शिष्याय भक्तिहीनाय भैरवेन हि भाषितम् ॥

इति श्यामारहस्ये चतुर्दशः परिच्छेदः ।

— - :o: — —

अथ पंचदशः परिच्छेदः ।

अथ काम्यहोमार्थं कुण्डनियमो यथा--

तदुक्तं यामले–

शान्त्यै प्रोक्तं तथारोग्ये कुण्डञ्च चतुरस्रकम् । आकर्षणे त्रिकोणं स्यात् उच्चाटे वर्त्तुलं तथा ॥ मारणेच तथा योज्यं वर्त्तुलं मंत्रभिः सदा ॥

देव्युवाच—

देवदेव ! महादेव ! भक्तानां प्रीतिवर्द्धन ! । कालिका या महाविद्या निर्दिष्टा न प्रकाशिता ।

श्री देवी ने कहा हे देव देव ! हे महादेव ! आप भक्तगणों की प्रीतिवर्द्धन करते हो आपने पूर्व में जो महाविद्या कालिका का विषय निर्देश किया था वह प्रकाश नहीं किया, उसको कहो मैं सुनने के लिये उत्सुक हुई हूं ।

श्री महादेव ने कहा, मैं तुमको लक्ष २ सहस्रवार निवारण करता हूं तथापि तुम स्त्रीस्वभाववशतः पुनर्वार जिज्ञासा करती हो । देवी कालिका का यह कवच अत्यन्त दुर्लभ और सर्वविध कामना पूर्ण करता है । तथापि तुम्हारे प्रति प्रीति वशतः अब वह कहता हूं । यह कवच न जानने से विद्या सिद्ध नहीं होती ॥

श्री देवी ने कहा । हे विभो ! यदि मेरे प्रति स्नेह हो, तो कवच कीर्त्तन कीजिये अन्यथा हे जगत् के नाथ ! निश्चय ही प्राण त्याग करूंगी ॥

श्रीमहादेवने कहा अति दुर्लभ कवच कीर्त्तन करताहूं, अतियत्न के सहित अपनी योनिकी समान इसको गुप्त रखना चाहिये । कालि पूर्वदिक् में रक्षा करें । कपाली दक्षिणदिक् में रक्षा करै । कुल्ला पश्चिम में और कुरुकुल्ला उत्तर में, विरोधिनी ऐशान में, विप्रचित्त अग्निकोणमें, उग्रा नैॠत में उग्रप्रभा वायुकोण में, दीप्ता

श्री महादेव उवाच—

लक्षं लक्षसहस्राणि वारितासि मया पुनः । स्त्रीस्वभावान्महादेवि! पुनस्त्वं परिपृच्छसि ॥ अत्यन्तदुर्लभं देवि! कवचं सर्वकामदम् । तथापि कथयाम्यद्य तव प्रीत्या वरानने! ॥ उक्तं पुरा महादेवि! श्रूयतां तत् कृपामयि! । कवचाज्ञानतो देवि! विद्यासिद्धिर्न जायते ॥

श्रीदेव्युवाच—

कथ्यतां कवचं देव! यदि स्नेहो मयि प्रभो । अन्यथा जगतां नाथ! प्राणांस्त्यजामि निश्चितम् ॥

श्रीमहादेव उवाच—

कवचं कथयिष्यामि सुगोप्यमतिदुर्लभम् । गोपनीयं प्रयत्नेन स्वयोनिवद्वरानने! ॥ पूर्वस्यां पातु काली च कपाली दक्षिणेऽवतु ।

मस्तक में, नीला मुखमण्डल में, घना कण्ठ में बलाका हृदय में मात्रा नाभि में मिता दोनों जंघाओं में, मुद्रा ध्वज में, और ब्राह्मणी इत्यादि महादेवीगण सर्वत्र मेरी रक्षा और पालन करें।

हे देवि! जो तीन श्लोक परम पवित्र और जिनके जानने से, मेरी समान होता है। अब तुम्हारे स्नेह के अनुरोध से यह दुलभ तीन श्लोक कीर्त्तन करता हूं । जिनका आशय पवित्र है । वही सर्पीःसागर में शोभमान मणिमय द्वीप में दमम्यान्वित रत्न गृह में शव के हृदय में सघछिन्न कर परं परा में सुशोभित क्रीं रूपणी, श्री दक्षिणा कालिका का जो ध्यान करता है ॥ १ ॥ जो तद्दीय भावना रूप परमानन्द सन्दोह भोग करता है । वही सिद्धि के लिये भगवती कालिका का वक्ष्यमाण ध्यान करता है । पानवशतः तीनों नेत्र घूर्णायमान होजाने से उनकी अत्यन्त शोभा उत्पन्न हुई है। लक्ष लक्ष स्त्रियें उनके दोनों चरणारविंदों की सेवा करती हैं। उन्हों ने सर्वशोभाढ्य और सर्व सौभाग्य सम्पन्न काल के मुख में मुख स्थापन करके चान्द्री कला धारण

कुल्ला रक्षतु पाश्चात्ये कुरुकुल्ला तथोत्तरे ॥ विरोधिनी तथैशान्यां विप्रचित्ताग्निकोणके । नैर्ऋते पातु चोग्रा च वायावुग्रप्रभावतु ॥ दीप्ता तु रक्षतां शीर्षे नीलाव्यान्मुखमण्डले । घना रक्षतु कण्ठे च बलाका हृदयेऽवतु ॥ नाभौ मात्राजङ्घयोश्च मिता मुद्रावतु ध्वजे । ब्रह्माण्याद्या महादेव्याः सर्वत्र पान्तु सर्वदा ॥ श्लोकत्रयं महापुण्यं यज्ज्ञात्वा मत्समो भवेत् । तव स्नेहान्महादेवि कथयामि सुदुर्लभम् ॥

श्रीपरमशिव उवाच ।

सर्पिःसागरविस्फुरन्मणिमयद्वीपे कदम्बान्विते गेहे रत्नमये शवस्य हृदये रत्नामृतेशानने । वर्गाद्याननवामलोचनमयीं श्रीदक्षिणां कालिकां सद्यश्छिन्नशिरःकरां भगवतीं ध्यायन्ति पुण्याशयाः ॥ मद्याघूर्णितलोचनत्रयमहाशोभामयीं योषितां लक्षैः सेवितपादपद्मयुगलां श्रीभैरवीद्योतिताम् । श्रीमत्कालमुखे मुखं निदधतीं चान्द्रीं कलां बिभ्रतीं तां ध्यायन्ति सुसिद्धये भगवतीं तद्भावनानन्दिताः ॥ मांसासृग्दुग्धखण्डच्छुरितमधुमहापानमत्तां हसन्तीम् अट्टाट्टं कालकालं कहकहडमिति प्रोल्लसन्तीं सखीषु । नृत्योद्दामहासोन्मदमुदितमहाभैरवानन्दवीचीं मातङ्गं खण्डयन्तीमभयवरकरां कालिकां तां भजामः ॥ इदन्तु दिव्यं कवचं मनोज्ञं देयं कदाचिद् गुरवेऽपि नैव । महद्भयात् स्नेहरसेन दत्वा हानिः शरीरेण च साधकेषु ॥

यस्मादिदन्तु कवचं लभ्यते बहुपुण्यतः । तेन दत्तन्तु सकलं सद्गुरुं परम प्रिये ! ॥ यस्मै तस्मै न दातव्यं प्राकृतेभ्यो विशेषतः । प्रकाशे सिद्धिहानिः स्यात् तस्माद् यत्नेन गोपयेत् ॥ गुरुपादप्रसादेन यदि कालीं

की है । ॥ २ ॥ जो माँस और असृग्रूप दुग्ध खण्ड में विच्छुरित मधु अतिमात्र पान करके मत्तभावापन्न हुई हैं । जो नृत्यवशतः अतिशय उद्दामभावापन्न और महा हास्योन्मद से परम आमोदित महाभैरव के आनन्दलहरीस्वरूप और जो हस्ती को पकड़कर खंड २ करती हैं । उसी वराभयकरा कालिका की भजना करता है ॥ ३ ॥ यह विद्या मनोज्ञ कवच गुरु को भी न देवे । महाभय वा स्नेह रस प्रयुक्त दान करने से शरीर के सहित साधक की हानि होती है । क्योंकि पुञ्जीकृत पुण्यप्रभाव सेही यह कवच लाभ होता है । इसीकारण जिसको तिसको विशेषतः प्राकृत व्यक्तिगणों को न देवे और प्रकाश करने से भी सिद्धि की हानि होती है । इसलिये यत्नसहित गुप्त रक्खे । गुरु के पादप्रसाद से यदि देवी कालिका को

प्रलभ्यते जप्त्वा कालीं महाविद्यामिदन्तु कवचं मठेत्॥ अज्ञात्वा कवचं देवि ! कालिका चेत् प्रजप्यते । स नाप्नोति फलं तस्मात् परत्र नरकं व्रजेत् ॥ सर्वत्र सुलभा विद्या कवचन्तु सुदुर्लभम् ॥ शरीर धनदारेण गुरुं सन्तोष्य तत् पठेत्॥ सफला रजनी पूजा दिवापूजा च निष्फला। तस्मात् सर्वप्रयत्नेन रजन्यां कवचं स्मरेत् । विवादे च रणे द्यूते विद्यायां कवितागमे । राजगेहे विचारे च सर्वत्रेदं पठेन्नरः ॥ मोहन-स्तम्भनाकर्षमारणोच्चाटनं तथा । कवचस्मरणाद्देवि ! जायंते सर्वासि-द्धयः ॥ अथवा किमिहोक्तेन सत्यं सत्यं मम प्रिये ! प्रत्यक्षा दक्षिणा काली वरं यच्छति सुन्दरि ! ॥ गुरौ च कवचे तंत्रे यंत्रे देवीं सदा भजेत् । गुरुस्त्राता महादेवः कवचं यः प्रयच्छति ॥ इदंतु कवचं प्राप्य हेलनं कुरुते तु यः । अचिरान्मृत्युमाप्नोति मम तुल्योऽपि साधकः ॥ स माता जनकश्चैव स गुरुः स च पूजितः । स सर्वदः स आचार्य्यः कवचं यः प्रयच्छति ॥

इति श्रीरुद्रयामले महातंत्रे श्रीदक्षिणकालिकायाः परमशिवोक्तं सर्वसिद्धिदं कवचं समाप्तम् ॥

लाभ किया जाये तो काली महाविद्या का जप करके यह कवच पाठ करै । हे देवि ! यह कवच न जानकर काली का मंत्र जप करने से उसका फल लाभ नहीं होता। और अन्तकाल के समय नरक संघटित होता है । काली का मन्त्र सर्वत्र सुलभ, किंतु कवच अत्यन्त दुर्लभ है । इसलिये शरीर, धन और स्त्री द्वारा गुरु को सन्तुष्ट करके, यह पाठ करना चाहिये। रात्रि में पूजा करने से वह सफल होती है । दिन में पूजा निष्फल होती है, इसलिये सर्वयत्न से रात्रि में कवच स्मरण करै । विवाद, युद्ध, द्यूतक्रीडा, विद्या, कवितागम, राजगृह विचार सर्वत्र यह कवच पाठ करै। हे देवि ! इस कवच के स्मरण मात्र से ही मोहन, स्तम्भन, आकर्षण, मारण और उच्चाटन इत्यादि सर्वविध सिद्धि लाभ होजाती है। अथवा इस विषय में और क्या कहूं ? सत्य सत्य ही कहता हूँ, देवी दक्षिणा कालिका प्रत्यक्ष होकर वरदान करती हैं गुरु में कवच में तंत्र में और यंत्र में सर्वदा देवी की भजना करै। गुरुही त्राणकर्त्ता है । क्योंकि यह कवच दान करते हैं। जो व्यक्ति इस कवच को प्राप्त करके उनके प्रति अश्रद्धा करता है वह मेरी समान होने पर भी अचिरात् मृत्यु के मुख में पतित होता है । जो व्यक्ति यह कवच प्रदान करै । वही माता, वही पिता, वही गुरु वही पूजित, वही आचार्य्य, और वही सम्पूर्ण दान करता है ।

इति दक्षिणकालिका का परमशिवोक्त सिद्धिदायक कवच समाप्त ॥

नमामि कृष्णरूपिणीं कृष्णाङ्गयष्टिधारिणीम् । समग्रतत्वसागरमपारपारगह्वराम् ॥ शिवाप्रभां समुज्ज्वलां स्फुरच्छशाङ्कशेखराम् । ललाटरत्नभास्करां जगत्प्रदीप्तिभास्कराम् ॥ महेन्द्रकश्यपार्चितां सनत्कुमारसंस्तुताम् । सुरासुरेन्द्रवन्दितां यथार्थनिर्मलाद्भुताम् ॥ अतर्क्यरोचिरूर्जितां विकारदोषवर्जिताम् । मुमुक्षुभिर्विचिन्तितां विशेषतत्वसूचिताम् ॥ मृतास्थिनिर्मितस्रजां मृगेन्द्रवाहनाग्रजाऽम् ।

देवी कालिका को नमस्कार करता हूं। वह साक्षात् कृष्णरूपिणी अर्थात् संहार स्वरूप हैं। उनकी अङ्गयष्टि कृष्ण अर्थात् तमोगुण ले व्यवच्छिन्न है। वह सम्पूर्ण तत्त्व की सागर स्वरूप हैं। वह अपार अर्थात् उनकी सीमा वा अवधारण नहीं है, और सहज में भी उनको प्राप्त नहीं किया जाता। वह पारा अर्थात् भक्तगण उनको सहज में ही लाभ करते हैं। वह गहवरा अर्थात् अतीव दुर्विज्ञेय स्वरूप हैं। वह शिवा अर्थात् कल्याणस्वरूप हैं। वह प्रभा अर्थात् सूर्य्य चन्द्रादि ज्योतिरूप से सम्पूर्णको प्रकाश करती हैं। वह समुज्ज्वला अर्थात् विज्ञान ज्योतिस्वरूप हैं। वह स्फुरत् अर्थात् सत्स्वरूप प्रकृति हैं। वह शशाङ्का अर्थात् अमृत की आधार हैं। वह शेखरा अर्थात् सबसे श्रेष्ठ हैं। वही सब की ललाट अर्थात् अदृष्ट स्वरूप हैं वही रत्न अर्थात् सब से उत्कृष्ट हैं। वह भास्करा अर्थात् सम्पूर्ण प्रभाकी खानस्वरूप हैं। वह जगत् अर्थात् जन्म मृत्यु हैं। प्रभास्वरूप से वारंवार आविर्भाव और तिरोभाव साधन करती हैं। वह प्रदीप्ति अर्थात् सम्पूर्ण चैतन्यज्योति स्वरूप हैं। वह भास्करा अर्थात् वही चैतन्य ज्योति को नित्य प्रकाश करती हैं। वही महेश्वर अर्थात् सम्पूर्ण महत् पदार्थ से श्रेष्ठ हैं और वही कश्यप अर्थात् सम्पूर्ण के आश्रय हैं। वह आदि देव भी उनकी अर्चना करते हैं। जो सनत् अर्थात् सर्वदाही विराजमान हैं। किसी समय जिनका अभाव वा क्षय नहीं और जो कुमार अर्थात् सम्पूर्ण अमङ्गल विनाश करते हैं। वह भी उनका स्तव करते हैं। सुर और असुरगण के भी ईश्वर सम्पूर्ण उनकी वन्दना करते हैं। वह यथार्थ चरम सत्यस्वरूप हैं। वह निर्मला अर्थात् शुद्धसत्वस्वरूप हैं। वह अद्भुता अर्थात् परम आश्चर्य्यस्वरूप हैं। तर्क द्वारा उनको प्राप्त नहीं किया जाता। वह साक्षात् ज्योतिस्वरूप हैं। वह ऊर्ज्जिता अर्थात् अपने स्वरूप से संपूर्ण को अधःकृत करती हैं। मुमुक्षुगण उनकी चिन्ता करते हैं। विशेष तत्त्व अर्थात् जगत् भ्रम निराकृत होने से, जो विज्ञानयोग उत्पन्न होता है, उसके प्रभाव से ही उन को जाना जाता है। विशेष अर्थात् सांख्य, तत्त्व अर्थात् ज्ञानयोग द्वारा ही उनका स्वरूप व्यक्त हुआ है। वह मृतास्थि अर्थात् काल के समय अपनपं में सम्पूर्ण हरण करती हैं वह निर्मित स्रजा अर्थात् सम्पूर्ण को माया के बल से निर्माण करके उस माया जनित अज्ञान से समुद्भूत ममतापाश में बद्ध करके रखती हैं वह मृगेन्द्रवाहना

सुशुद्धतत्वतोषणां त्रिवेदपारभूषणाम् ॥ भुजङ्गहारहारिणीं कपाल खण्डधारिणीम् । सुधार्मिकोपकारिणीं सुरेन्द्रवैरिघातिनीम् ॥ कुठारपाशचापिनीं कृतान्तकामभेदिनीम् । शुभांकपालमालिनीं सुवर्णकल्पशाखिनीम् ॥ श्मशानभूमिवासिनीं द्विजेंद्रमौलिभाविनीम् । तमोऽन्धकारयामिनीं शिवस्वभावकामिनीम् ॥ सहस्रसूर्य्यराजिकां धनञ्जयोग्रकारिकाम्।सुशुद्धकालकन्दलां सुभृङ्गवृन्दमंजुलाम्॥ प्रजापिनीं प्रजावतीं नमामि मातरं सतीम् । स्वकर्मकारणे गतिं हरप्रियांच

अर्थात् उन्होंने स्वयं हिंसा धर्म को अपने आधीन किया है । वह अग्रजा अर्थात् सब के आगे उत्पन्न हुई हैं । वह सुशुद्धा अर्थात् निरवच्छिन्नस्वत्वस्वरूप हैं। वह तत्वतोषणा अर्थात् एकमात्र सत्य द्वारा ही संतोष लाभ करती हैं । वह तीनों बेद के पार अर्थात् अतीत हैं । वह भूषणा अर्थात् सबको ही आविर्भावमात्र से सुशोभित करती हैं । वह सदा अर्थात् सत्स्वरूप से सम्पूर्ण व्याप्त करती हैं । वह औचित्यैकलक्षणा अर्थात् जो कुछ न्यायसङ्गत है, वह वही हैं । वह मनोजवैरी अर्थात् उन्होंने संसारबन्धन का हेतुभूत रजोगुण का ध्वंस किया है । वह लक्षणा अर्थात् संसार की सर्वत्र सर्वदा समस्त वस्तु में उनको देखा जाता है । वह भुजङ्ग अर्थात् भोगासक्त पुरुषों की हार अर्थात् संसार की प्रीति हरण करती हैं । वह कपालखण्डधारिणी अर्थात् सम्पूर्ण ही अदृष्ट को परिचालन करती हैं । वह धार्मिकगणों का उपकार और सुरेन्द्रगणों के वैरी विनाश करती हैं । वह कुठारपाशचापिनी अर्थात् छेदन बन्धन निराकरण करती हैं । वह कृतान्तकी कामनाभेद अर्थात् मृत्यु निवारण करती हैं । वह सम्पूर्ण सौभाग्य रूपिणी हैं । वह कपालमालिनी अर्थात् तमोगुणभूषित हैं । वह सुवर्णा हैं । वह कल्पशाखिनी अर्थात् समस्त की मनोकामना पूर्ण करती हैं । वह श्मशान अर्थात् प्रलयस्वरूप हैं । वह भूमि अर्थात् सम्पूर्ण की स्थितिस्वरूप हैं । वह वासिनी अर्थात् उन्होंने सम्पूर्ण को व्याप्त और आवृत किया है । वह द्विजेन्द्रमौलिभाविनी अर्थात् सम्पूर्ण द्विजेन्द्र मस्तकद्वारा उनकी पूजा करते हैं । वह तमोन्धकारयामिनी अर्थात् महाप्रलयरात्रि हैं । वह शिवकी अर्थात् सर्वमङ्गलमय पुरुष की स्वभावकामिनी अर्थात् प्रकृति हैं वह सहस्र सूर्य्यकी समान प्रकाशयुक्त हैं । वह धन और वही जय हैं । वह उग्रकारिका अर्थात् महाप्रलयादि संघटित करती हैं । वह प्रजापिनी अर्थात् सब ही उनका जप करते हैं । वह प्रजावती अर्थात् संपूर्ण संसार ने उनसे जन्म ग्रहण किया है । वह सब की माता हैं । वह सती अर्थात् सर्वकाल सर्वदेश में स्थिति करती हैं । उनको प्रणाम करता हूं । वह हरप्रिय अर्थात् साक्षात् मायारूप से सम्पूर्ण को मोहित करके उनकी प्रीति आकर्षण करती हैं । वह पार्वती अर्थात् अङ्कारस्वरूप हैं । वह अनन्त शक्ति हैं ।

पार्वतीम् ॥ अनन्तशक्तिकान्तिदां यशोऽर्थभुक्तिमुक्तिदाम् । पुनः पुनर्जगद्धितां नमाम्यहं सुरार्चिताम् ॥ जयेश्वरी ! त्रिलोचने ! प्रसीद देवि ! पाहिमाम् । जयन्ति ते स्तुवन्ति ये शुभं लभन्त्यमोघतः ॥ सदैव ते हतद्विषः परं भवन्ति सज्जुषः । नराः परे शिवेऽधुना प्रसाधि मां करोमि किम् ॥ अतीव मोहितात्मानो वृथा विचेष्टितस्य मे । कुरु प्रसादितं मनो यथाऽस्मि जन्मभंजनः ॥ तथा भवन्तु तावका यथैव घोषितालकाः । इमां स्तुतिं ममेरितां पठन्ति कालिसाधकाः । न ते पुनः सुदुस्तरे पतन्ति मोहगह्वरे ॥

इतिश्रीब्रह्मकृत्कालिस्तवः समाप्तः ।

इति श्री पूर्णानन्दगिरि परिव्राजक परमहंसविरचितं
श्यामारहस्यं समाप्तम् ॥

यह कान्तिदा अर्थात् माया प्रसव करती हैं। वह भुक्ति मुक्ति और यश का साधन हैं। यह जगत् का हित करने वाली और सुख देने वाली है। इसलिये सम्पूर्ण उनकी अर्चना करते हैं। मैं भी इसी कारण बारम्बार उनको नमस्कार करता हूं। तुम्ही जया, तुम्हीं ईश्वरी. तुम्हीं त्रिलोचना अर्थात् त्रिभुवन के लोचन अर्थात् ज्ञानस्वरूप हो। अतएव प्रसन्न हो और मेरी रक्षा करो। जो तुम्हारा स्तव करते हैं, वह जयलाभ करते हैं। वही शुभसंग्रह करते हैं। वही सर्वदा शत्रुसंहार करते हैं। एवं वही सर्वदा सत् सम्भोग करते हैं। हे शिवे ! अब आज्ञा करो, मुझको क्या करना चाहिये। मेरी आत्मा मोह से अतीव आच्छन्न है। इसलिए मैं वृथा कार्य्य में सर्वदा प्रवृत्त होता हूं। अतएव जिससे फिर मेरा जन्म न हो, वही विधान करो। काली साधकगण मेरा यह स्तोत्र पाठ करने से पुनर्बार मोहगह्वर में पतित नहीं होते ॥

इति श्री ब्रह्मकृतकालीस्तव सम्पूर्णम् ।

कुलार्णवतन्त्रम्

(ऊर्ध्वाम्नायतन्त्रात्मकम्-'कल्याणी'-हिन्दी व्याख्या सहितश्च)

सम्पादक एवं भूमिका लेखक : डॉ. सुधाकर मालवीय

हिन्दी अनुवादक : पं. चितरञ्जन मालवीय

कौल शब्द 'कुल' शब्द से निष्पन्न होता है। कुल शब्द के अन्यान्य अर्थ पाये जाते हैं—1. मूलाधारचक्र, 2. जीव, प्रकृति, दिक्, काल, पृथ्वी, अप, तेज, वायु, आकाश—इन नौ तत्त्वों की 'कुल' संज्ञा है। ३. श्रीचक्र के अन्तर्गत त्रिकोण की कुल संज्ञा है, इसी को योनि भी कहते हैं। सौभाग्यभास्कर ग्रन्थ में कौलमार्ग शब्द का स्पष्टीकरण 'कुल' = शक्ति, अकुल = शिव के रूप में किया गया है। कुल से अकुल का अर्थात् शक्ति से शिव का सम्बन्ध ही कौल है। कौलमतानुसार शिवशक्ति में कोई भेद नहीं है। कुलार्णव तन्त्र कौल सम्प्रदाय का अत्यन्त प्राचीन एवं प्रामाणिक ग्रन्थ है।

प्रस्तुत संस्करण का मूल पाठ आर्थर एवलोन के संस्करण पर आधृत है। महामना संस्कृत शोध संस्थान के विद्वान् पं. चितरञ्जन मालवीय द्वारा इस ग्रन्थ की इदं प्रथमतया हिन्दी व्याख्या प्रस्तुत की गयी है। इस ग्रन्थ के सम्पादक एवं भूमिका लेखक डॉ. सुधाकर मालवीय, संस्कृत विभाग, कला संकाय, का. हि. वि. वि. वाराणसी के लब्धप्रतिष्ठ विद्वान् हैं। इस प्रकार काशी के लब्धप्रतिष्ठ विद्वानों द्वारा संशोधित एवं व्याख्यात यह ग्रन्थ अत्यन्त उपादेय है और शोधार्थियों द्वारा संग्रहणीय है।

पृ. 392 मूल्य : रु. 200/-

ज्ञानार्णवतन्त्रम्

सम्पादक एवं भूमिका लेखक : डॉ. सुधाकर मालवीय
हिन्दी अनुवादक : पं. रामरञ्जन मालवीय

ज्ञानार्णव तन्त्र का प्रस्तुत संस्करण श्रीविद्या के उपासकों के समक्ष इदं प्रथमतया हिन्दी के साथ प्रस्तुत है। प्रस्तुत संस्करण का मूल आनन्दाश्रम के मुद्रित मूल पर आधारित है तथा अनेक स्थानों पर पाठों को मन्त्रमहोदधि आदि अन्य ग्रन्थों से मिलाकर शुद्ध किया गया है। श्रीविद्याविषयक अनेक ग्रन्थ सम्प्रदायानुसार प्राप्त होते हैं। ज्ञानार्णव तन्त्र का उनमें एक विशिष्ट स्थान है। त्रिपुरसुन्दरी की उपासना इस तन्त्र का मुख्य विषय है।

श्रीविद्या के कादि, हादि और कहादि नामक तीन भेद प्रसिद्ध हैं। कादियों की देवी काली, हादियों की त्रिपुरसुन्दरी और कहादियों की तारा (अथवा नीलसरस्वती) हैं। तीनों सम्प्रदायों के अपने-अपने मान्य ग्रन्थ हैं, जिनमें त्रिपुरसुन्दरी की उपासना पद्धति का तन्त्र ग्रन्थ ज्ञानार्णव है।

प्रस्तुत ज्ञानार्णव तन्त्र की हिन्दी व्याख्या प्रथमतः महामना संस्कृत शोध संस्थान के विद्वान् पं. रामरञ्जन मालवीय द्वारा की गई है। ग्रन्थ के सम्पादक एवं भूमिका लेखक डॉ. सुधाकर मालवीय का. हि. वि. वि. वाराणसी के लब्धप्रतिष्ठ विद्वान् हैं। इन दोनों विद्वानों द्वारा सम्पादित एवं अनूदित यह तन्त्र ग्रन्थ संग्रहणीय है।

पृ. 344 **मूल्य : रू. 200/-**

दो भागों में प्रकाशित — मूल्य 1000/-, डिमाई साइज, पृष्ठ संख्या - 990

श्रीमद्भगवद्गीता की प्राचीन टीकाओं में सरस्वती के वरद पुत्र मधुसूदन सरस्वती कृत 'गूढ़ार्थ दीपिका' नामक टीका का विशिष्ट स्थान है। इनके सम्बन्ध में यह उक्ति प्रसिद्ध है—

वेत्ति पारं सरस्वत्याः मधुसूदनसरस्वती मधुसूदन सरस्वत्याः पारं वेत्ति सरस्वती ॥

इसमें ज्ञान, कर्म एवं भक्ति के साथ गूढ़ार्थ का सम्यग् विवेचन है। द्वैत एवं अद्वैत की दृष्टि से गीता का निहितार्थ क्लिष्ट संस्कृत में होने के कारण सामान्य पाठक इसके रसास्वाद से वञ्चित थे। महामना मदन मोहन मालवीय जी के अनुरोध पर

(२७२)

श्रीस्वामिनारायणतीर्थविरचित

योगसिद्धान्तचन्द्रिका

भूमिका, परिशिष्ट, टिप्पणी आदि से विभूषित

संपा. - प्रो. विमला कर्नाटक

सत्रहवीं शताब्दी के आचार्य श्री स्वामिनारायणतीर्थविरचित 'योगसिद्धान्तचन्द्रिका' संस्कृत में उपनिबद्ध एक मौलिक टीका है। व्यासभाष्यानुसारी योगसूत्र की टीका होते हुए भी इसमें ऐसे नवीन विषयों की उद्भावना हुई है, जो पातञ्जलयोग की पूर्ववर्ती तत्त्ववैशारदी, योगवार्त्तिक आदि प्रौढ संस्कृत टीकाओं में उपलब्ध नहीं है। इसे योगसूत्र का उपजीव्यग्रन्थ कहा जाय तो कोई अतिशयोक्ति न होगी। षड्दर्शननिष्णात स्वामिनारायणतीर्थ का यह चूडात्र निदर्शन है। योगसूत्र के अनुसन्धानकर्त्ताओं के लिये अत्यन्त उपयोगी होने के कारण प्रोफेसर विमला कर्नाटक ने इस टीका को अपने पूर्ण रूप से प्रकाशित करने के अपने चिरसंकल्प को साकार किया है। इसके लिये डॉ. विमला कर्नाटक ने भारतवर्ष के प्रमुख-प्रमुख संस्कृत शोधप्रतिष्ठानों से सम्बन्धित पाण्डुमातृकाओं का सश्रम संकल्प कर उनका अनुशीलन किया। इस प्रकार सौ वर्ष पूर्व खण्डित अवस्था में प्रकाशित 'योगसिद्धान्तचन्द्रिका' टीका को अनुसन्धान की पाठभेदपरक पद्धति से परिष्कृत एवं संवर्द्धित कर उसे पूर्ण अवस्था में प्रकाशित किया है। इस प्रकार पातञ्जलयोगवाङ्मय की श्रीवृद्धि करने में डॉ. विमला कर्नाटक का भगीरथ प्रयास वर्तमान 'योगसिद्धान्तचन्द्रिका' संस्करण में स्पष्टतः परिलक्षित होता है।

रु. 200/-,

कतिपय महत्त्वपूर्ण ग्रंथ

गौतमीयतन्त्रम् । महर्षिगौतमप्रणीतम् । सम्पादक–भगीरथ झा	५०-००
त्रिपुरारहस्य का तन्त्रविश्लेषण । (प्राचीन भारतीय तन्त्रसाधना एव आधुनिक युगीन मनोविश्लेषणशास्त्र का तुलनात्मक विवेचन) लेखक–डा० अरविन्द वसावडा, हिन्दी व्याख्याकार–डा० भवानीशंकर उपाध्याय	४०-००
रुद्रयामलतन्त्रम् । (उत्तरतन्त्रम्) श्लोकानुक्रमणिका सहित । सम्पादक–डा० रामकुमार राय	३५०-००
गन्धवतन्त्रम् । श्लोकानुक्रमणिका सहित । सम्पादक–डॉ० रामकुमार राय	१५०-००
षट्चक्रनिरूपणम् । पूर्णानन्दयतिविरचितम् कालीचरण-कृत 'श्लोकार्थपरिष्कारिणी' शंकरकृत 'षट्चक्रभेद-टिप्पणी' विश्वनाथकृत 'षट्चक्रविवृत्ति' संस्कृत-सविमर्श 'प्रह्लाद' हिन्दी व्या० सहित । सम्पादक एव व्याख्याकार–गो० प्रह्लादगिरि वेदान्तकेशरी	७५-००
षट्चक्रनिरूपणम् । पूर्णानन्दयतिविरचित । सविमर्श 'प्रह्लाद' हिन्दी व्या० सहित । व्या० प्रह्लादगिरि वेदान्तकेशरी	२०-००
क्रमदीपिका । केशवभट्टप्रणीत । विद्याविनोद श्रीगोविन्द भट्टाचार्यकृत विवरण सहित । डा० सुधाकर मालवीय-कृत सविमर्श 'सरला' हिन्दी व्याख्या सहित	१२५-००
श्रीमाहेश्वरतन्त्रम् । अपौरुषेयम् नारदपाञ्चरात्रान्तर्गतम् । श्रीसुमङ्गलया पराशक्त्याविर्भावित श्रीशिवेनोमाया उपदिष्ट ब्रह्मरहस्यात्मकम् 'सरला' हिन्दी व्याख्योपेतम् । सम्पादक: व्याख्याकारश्च–डा० सुधाकर मालवीय	२५०-००
कुलार्णवतन्त्रम् । 'कल्याणी' हिन्दी टीका सहित । अनु० पं० चितरंजन मालवीय, संपा० डॉ० सुधाकर मालवीय	२००-००
उड्डामरेश्वरतन्त्रम् । 'शान्तीश्वरी' हिन्दी टीका संवलितम् । टीकाकार–डा० बृजेशकुमार शुक्ल	४०-००

सहयोगी प्रतिष्ठान—चौखम्बा कृष्णदास अकादमी, वाराणसी-१

मूल्य : २००-००